हेतुम् इत्यमरः। सः नृपः (२), मन्थात् (३) प्राक् मन्थनात् पूर्व्वम्, अनभिव्यक्ता(४) अप्रकटा रत्नोत्पत्तिः (५) यस्य सः अर्णवः (६) इव, चिरम् अतिष्ठत् (७)। सामग्र्यभावाद्विलम्बो न तु वन्ध्यत्वात् इति भावः।

१। प्रत्ययापेक्षसन्ततिः स नृप मन्थात् प्राक् अनभिव्यक्तरत्नोत्पत्तिः अर्णव इव चिरम् अतिष्ठत्।

२। वाच्यान्तरं, तेन नृपेण प्रत्ययापेक्षसन्ततिना अनभिव्यक्तरत्नोत्पत्तिना अर्णवेन इव अस्थीयत।

३। यथा रत्नगर्भस्यापि सिन्धोः रत्नप्रकाशः पुरा देवादिकृतमन्थनरूपं निमित्तम् अपेक्षते, तथा पुत्रभाग्यवतोऽपि राज्ञ पुत्रजन्म ऋष्यशृङ्गादिकृतयज्ञरूपं निमित्तम् अपेक्षते स्म। पुत्रेष्टिक्रियया राज्ञः पुत्रप्रतिबन्धकीभूते दुरदृष्टे अपनीते पुत्रो जनिष्यतीति सूचितम्। अमृतकौस्तुभादिरत्नसाम्यात् भाविरामपुत्राणाम् अलौकिकत्वं देवोपकारित्वं च, रत्नबाहुल्यात् पुत्रबाहुल्यमपि ध्वनितम्।

৩। সেই রাজা পুত্রদর্শনবিষয়ে নিমিত্তাপেক্ষী হইয়া, মন্থনের পূর্ব্বে যাহার রত্নোৎপত্তি প্রকাশ পায় নাই তাদৃশ সমুদ্রের ন্যায় বহুকাল অতিবাহিত করিলেন।

3. Like the ocean, with its treasures concealed, before the churning, long remained the king, unconscious of the efficient cause (निमित्तकारण), upon which depended the issue of a son unto him.

ऋष्यशृङ्गादयस्तस्य सन्तः सन्तानकाङ्क्षिणः।
आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः॥४॥

४। ऋष्यशृङ्गेति। ऋष्यशृङ्गादयः ऋष्यशृङ्गो (१) नाम कश्चित् ऋषिः तदादय, भानुमन्तौ वा यजमानौति ऋत्विजः याज्ञिकाः।

---

अ aff (३) अम, अद् to go, निप् aff. (६) अर्णस् water, व aff (अर्णांसि सन्ति अस्मिन्). (७) स्था to stay,—तिष्ठति। अतिष्ठत्। अस्थात्।
…, स्थितः, &c. (भावे—स्थीयते। अस्थीयत। अस्थायि। स्थेयं, &c.)।
। (१) (ऋष्यस्य मृगविशेषस्य शृङ्गमिव शृङ्गं यस्य)। (२) तन्, तनु to spread.

ऋत्विग्दधृगित्यादिना क्विन्नन्तो निपातः। जितात्मानः जितान्तःकरणाः सन्तः, सन्तानकाङ्क्षिणः (२) पुत्रार्थिनः, तस्य दशरथस्य पुत्रीयां पुत्रनिमित्ताम्। पुत्राच्छ च इति छप्रत्ययः। इष्टिं (३) यागम्, आरेभिरे (४) प्रक्रान्तवन्तः।

४। ऋष्यशृङ्गादय ऋत्विज जितात्मान सन्त, सन्तानकाङ्क्षिण तस्य पुत्रीयाम् इष्टिम् आरेभिरे।

४। ऋष्यशृङ्ग आदि येषां ते। जित आत्मा यैः ते। सन्तानं काङ्क्षन्तीति तस्य। वाच्यान्तर—ऋष्यशृङ्गादिभिः सद्भिः जितात्मभिः ऋत्विग्भिः पुत्रीया इष्टिः आरेभे।

४। ननु सप्तममिह कथं मरान् माधयतीति विशेषणद्वयेन ऋष्यशृङ्गादीनां परार्थत्वमयीष्यत सचितम्। आदिशब्दात् वशिष्ठ-वामदेव काश्यप-सुयज्ञा गृह्यन्ते। स किल ऋष्यशृङ्गो [illegible] राज्ञः [illegible] पुत्रेष्टिं चकार। [illegible] ऋष्यशृङ्गस्यैव मुख्यतया उपवीतान [illegible] ऋष्यशृङ्गादय तस्य राज्ञ सन्तानकाङ्क्षिण सन्त पुत्रम् इच्छन्त सन्त, [illegible] इष्टिं आरेभिरे।

४। [illegible]

4 Rishyaśringa and other performers of sacrifices who had subdued their passions and were [illegible] commenced a sacrifice, named *Puttreshti*, on account of the king, who was desirous to obtain a son

तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम्।
अभिजग्मुर्निदाघार्त्ताश्छायावृक्षमिवाध्वगाः ॥५॥

५। तस्मिन्निति। तस्मिन् अवसरे पुत्रकामेष्टिप्रवृत्तिसमये, देवाः

---

[illegible] to wish, [illegible] to sacrifice [illegible]
(३) आ, रभ to begin—[illegible]
(१),(२) [illegible] to leap, [illegible]

पुलस्त्यस्य गोत्रापत्यं पुमान् पौलस्त्यः (१) रावणः तेन उपप्लुताः (२) पीड़िताः सन्तः, निदाघार्त्ताः (३) घर्म्मातुराः, अध्वानं गच्छन्तीति अध्वगाः पान्थाः। अन्तात्यन्ताध्वदूरपारसर्व्वानन्तेषु ड इति डप्रत्ययः। छायाप्रधानं वृक्षं छायावृक्षम् इव। शाकपार्थिवादित्वात् समासः। हरिं (४) विष्णुम्, अभिजग्मुः (५)।

५। तस्मिन् अवसरे, देवाः पौलस्त्योपप्लुताः (सन्तः), निदाघार्त्ताः अध्वगाः छायावृक्षमिव, हरिम् अभिजग्मुः।

५। निदाघेन आर्त्ताः। वाच्यान्तरं,—देवैः पौलस्त्योपप्लुतैः निदाघार्त्तैः अध्वगैः छायावृक्ष इव हरिः अभिजग्मे।

५। यथा आतपतापिताः पथिकाः तापशान्त्यै छायाप्रधानं वृक्षम् अगमन् तथा रावणपीड़िताः देवाः रावणभयशान्त्यै विष्णुं शरणं जग्मुः। तर्हि भगवान् आत्मपाल्यानां छायावृक्ष इव विपद्देशानां शरण्य इति भावः।

৫। ইত্যবসরে (রামের পুত্রেষ্টিকালে) দেবগণ পৌলস্ত্য (রাবণ) কর্ত্তৃক উৎপীড়িত হইয়া, যেরূপ আতপতাপিত পথিকগণ প্রশস্ত ছায়াবিশিষ্ট বৃক্ষের নিকট গমন করে, সেইরূপ হরির নিকট গমন করিলেন।

5 In the mean time, the gods being persecuted by Poulastya (রাবণ), repaired to Hari, in the same way, as sun-burnt travellers repair towards an umbrageous tree.

ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः।
अव्याक्षेपो भविष्यन्त्याः कार्य्यसिद्धेर्हि लक्षणम् ॥६॥

६। त इति। ते देवाश्च, उदन्वन्तं (१) समुद्रम्। उदन्वानुदधौ चेति निपातः। प्रापुः (२), आदिपूरुषः विष्णुश्च बुबुधे योगनिद्रां

---

दह् to burn, घञ् aff.), आर्त्त (आ, ऋ to go, क्त aff.) (४) हृ to take इन् aff. (५) अभि, गम् to go,—गच्छति। अगच्छत्। अगमत्। जगाम, &c.

(१) उदक water, मतुप् aff. (उदकानि सन्त्यस्य, उदकस्य उदन्भावो

अष्टौ इत्यर्थः। गमनप्रतिबोधयोरविलम्बार्थौ चकारौ। तथाहि, अव्याक्षेपः गन्तव्य अव्यासङ्गः अविलम्बः इति यावत्, भविष्यन्त्याः (३) कार्यसिद्धेः लक्षणं लिङ्गं हि। उक्तञ्च, 'अनन्यपरता चास्य कार्यसिद्धेस्तु लक्षणम्' इति।

६। ते च [illegible] [illegible] आदिपुरुषश्च बुबुधे, अव्याक्षेप [illegible] कार्यसिद्धे [illegible] हि।

६। वाच्यान्तर,—ते च [illegible] आदिपुरुषेण च बुबुधे [illegible] [illegible] (भूयते)।

६। [illegible] [illegible] विष्णुदर्शनलाभ [illegible] कार्य सिद्धि [illegible]। कार्यसिद्धिलाभ [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible]।

६। [illegible] (Hindi [illegible]) [illegible]

6 No sooner did they arrive at the sea than the [illegible] Being (Vishnu), awoke. Ready interview (thus obta[illegible]) gave ultimate success.

भोगिभोगासनासीनं ददृशुस्तं दिवौकसः।
तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम् ॥७॥

७। भोगीति। द्यौः ओकः येषां ते दिवौकसः देवाः। दिवो दिवादित्वात् साधु। यद्वा दिवशब्दोऽदन्तोऽप्यस्ति। तथा च [illegible], '[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] दिवम्' इति। तत्र [illegible] [illegible] [illegible] दिवम् ओकः येषाम् इति विग्रहः। भोगिनः [illegible] भोगः [illegible]। 'भोगः [illegible] [illegible] [illegible]' [illegible]

[illegible] to obtain—[illegible] [illegible]

सः एव आसनं सिंहासनं तत्र आसीनम् उपविष्टम्। आसेः शानच्, ईदासः इतीकारादेशः। तस्य भोगिनः फणामण्डले ये उदर्चिषः मणयः तैः द्योतितविग्रहं तं विष्णुं ददृशुः।

७। दिवौकसः भोगिभोगासनासीनं तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहं स ददृशुः।

७। तस्य फणामण्डले ये उदर्चिषः (उद्गता अर्चिषो येषां ते) मणयः तैः द्योतितः विग्रहः यस्य तम्। वाच्यान्तर,—दिवौकोभि भोगिभोगासनासीनः तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहः स ददृशे।

७। ते देवा, शेषनागस्य कायरूपे सिंहासने उपविष्ट, तस्य फणामण्डल-स्थितात् मणिमण्डलात् समुत्थितैः प्रभाजालैः उद्भासितदेह त विष्णु दृष्टवन्तः। अनुवादके श्रीकैलासचन्द्रविद्यारत्नकृतम्। अनन्तदर्पकफणियोद्भासितविग्रहविशिष्ट विष्णु दृष्टवन्तः।

৭। দেবগণ দেখিলেন,—তিনি শেষনাগের কায়রূপ আসনে আসীন রহিয়াছেন, তাঁহার দেহ তাঁর ফণামণ্ডলস্থিত মণিমালার ঊর্দ্ধবিসারী প্রভাপুঞ্জে প্রদীপ্ত হইতেছে।

7 The gods found him (Vishnu) seated on the serpent (S'esha), and his body illumined by the ascending rays of the circlet of gems on the serpent's group of hoods.

श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥ ८ ॥

८। श्रिय इति। कीदृशं विष्णुम्? पद्मे निषण्णायाः (१) उपविष्टायाः श्रियः क्षौमान्तरिता (२) दुकूलव्यवहिता मेखला यस्य तस्मिन्, आस्तीर्णौ (३) करपल्लवौ यस्मिन्। विशेषणद्वयेनापि चरणयोः सौकुमार्यात् कठिनस्पर्शासहत्वं सूच्यते। तस्मिन् अङ्के निक्षिप्तौ (४) चरणौ येन तम्।

[८] (१) सद् with नि to sit, क्त aff. (२) क्षौम,—क्षुमा, अण् aff. (३) स्तॄ to spread, क्त aff. (४) क्षिप् with नि, to throw, क्त aff.

८। पद्मनिषण्णायाः श्रियः क्षौमान्तरितमेखले आस्तीर्णकरपल्लवे अङ्के निक्षिप्त चरणम्।

निक्षिप्तचरणः (सः ददृशे) इति वाच्यान्तरम्।

८। पद्मासीना लक्ष्मीः कठिनमेखलास्पर्शेन प्रभोश्चरणपीडा मा भूदिति कोमलदुकूलेन वेष्टितो अङ्के करतलयोः पतिचरणौ निधाय सुखं संवाहयतीव इति भावार्थः।

৮। [illegible] আছেন; তিনি (বিষ্ণু) তাঁহার অঙ্কোপরি করপল্লবে চরণ দুখানি স্থাপিত করিয়াছেন।

8 The goddess Lakshmi, with her silken cloth drawn over the jewelled girdle round her waist, was found seated on a bed of lotuses, with Vishnu's feet on the leaf like palms of her hands kept open on her lap

प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्।
दिवसं शारदमिव प्रारम्भसुखदर्शनम्॥ ९॥

९। प्रबुद्धेति। पुनः कीदृशम्? प्रबुद्धे विकसिते पुण्डरीके इव अक्षिणी यस्य तं (१), दिवसे तु पुण्डरीकम् एव अक्षि यस्य इति विग्रहः; बालातपनिभम् अंशुकं यस्य तं पीताम्बरधरम् इत्यर्थः। अन्यत्र बालातपरूपांशुकम् इत्यर्थः। 'निभो व्याजसदृशयोः' इति विश्वः। प्रकृष्टः आरम्भः योगः येषां ते प्रारम्भाः योगिनः तेषां सुखदर्शनम्। अन्यत्र प्रारम्भे आदौ सुखदर्शनं, शारदं (२) शरत्-कालीनं दिवसम् इव स्थितम्।

९। प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकं प्रारम्भसुखदर्शनं शारदं दिवसमिव (स्थितम्)। [illegible]

---

[९] (१) प्र, बुध् to awake, क्त कर्तरि, पुण्डरीक lotus [illegible] अक्षि, (प्रबुद्धपुण्डरीकाक्ष—बहुव्रीहि समासे [illegible])। (२) शरद् autumn, अण् [illegible].

९। यथा हि शारदीयो दिवसः प्रफुल्लकमलपद्मेन नवसूर्य्यालोकेन च प्रभात
...ान् रञ्जयति, तथा विष्णुरपि प्रफुल्लकमलनिभेन लोचनद्वयेन नवसूर्य्यालोकनिभेन
पीताम्बरेण च योगिगणं रञ्जयामास। शरदि प्रभाते पद्मानि विकसन्ति मेघ-
विमायावरणमुक्ते च गगने सूर्यं समुज्ज्वलं प्रकाशते इति शारदं दिवसमित्युक्तम्।

৯। শরৎকালের দিবস যেমন প্রারম্ভে অর্থাৎ প্রভাতে অতি রমণীয় হয়, এবং বিকশিত পুণ্ডরীকরূপ নয়নে ও বালাতপরূপ বসনে শোভা পায়; তিনিও সেইরূপ, প্রারম্ভ অর্থাৎ যোগিগণের রমণীয়, এবং বিকশিত পুণ্ডরীকের ন্যায় নয়নে এবং বালাতপের ন্যায় রক্তবসনে শোভা পাইতেছেন।

9. Like the day in autumn, which, at its Prárambha or opening (morning), is exceedingly charming, and which looks beautiful with its eyes of full-blown lotuses and its robe of early sunlight, Vishnu is charming to the Prárambhas or the Yogis (devotees), and looks beautiful with his lotus-like eyes and his garments which are of the colour of the morning sun

**प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्।**
**कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा ॥१०॥**

१०। प्रभेति। पुनः किंविधम्? प्रभया अनुलिप्तम् (१) अनुरञ्जितं श्रीवत्सं नाम लाञ्छनं येन तं, लक्ष्म्याः विभ्रमदर्पणं, कौस्तुभः (२) इति आख्या यस्य तम्, अपां सामुद्राणां सारं स्थिरांशं मणिम् बृहता उरसा बिभ्राणम् (३)। इत्यर्थः।

১০। প্রভানুলিপ্তশ্রীবৎসং লক্ষ্মীবিভ্রমদর্পণং কৌস্তুভাখ্যম্ অপাং সারং বৃহতা উরসা বিভ্রাণম্।

[१०] (१) अनु, लिप् to smear, क्त aff. लिप,—लिम्पति। अलिम्पत्। लिलेप। कर्मणि-लिप्यते। अलेपि. &c. (२) कुम्भ ocean, अण् aff. भूमि स्फु भाति व्याप्नोति कुम्भो जलधि, तत्र भव.)। (३) भृ to hold शानच् aff. (आत्मने शानच्, बभ्रत् बिभ्रत्)

१०। श्रीवत्सो नाम विष्णुवक्षसि दक्षिणभागे श्वेतरोमावर्तविशेष । भृगुपदचिह्नमेव श्रीवत्सः इति भागवते। कौस्तुभज्योतिरेव श्रीवत्स इत्यपि भागवते, यथा ;—'कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः । तत्प्रभा व्यापिनी साक्षात् श्रीवत्समुरसा विभुः' अपां सारं क्षीरसिन्धूत्थानां रत्नानां श्रेष्ठम् । विभ्रमदर्पण विलासमण्डनसाधनं मुकुरमिव, अयो कौस्तुभे लक्ष्मी निजरूप दृष्ट्वा केशमल्लारमुखमण्डनादिकं करोतीति भाव ।

১০। তিনি, লক্ষ্মীদেবীর বিলাসদর্পণস্বরূপ সমুদ্রমন্থনোদ্ভূত কৌস্তভ মণি বিশাল বক্ষঃস্থলে ধারণ করিয়াছেন, সেই মণির প্রভায় তাঁহার শ্রীবৎসচিহ্ন সমুদ্ভাসিত হইয়াছে।

10. On his broad breast he wore the gem Kaustubha the essence of the oceanic waters, which served Lakshmî as her toilet glass, and illumined the mark S'rîvatsa by its lustre

## बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः ।
## आविर्भूतमपां मध्ये पारिजातमिवापरम् ॥११॥

११। बाहुभिरिति। विटपाकारैः, शाखाकारैः दिव्याभरण-भूषितैः (१) बाहुभिरुपलक्षितम्, अतएव अपां सैन्धवीनां मध्ये आविर्भूतमपरं द्वितीयं पारिजातमिव (२) स्थितम् ।

११। विटपाकारैः दिव्याभरणभूषितैः बाहुभिः (उपलक्षितः) अपां मध्ये आविर्भूतम् अपरं पारिजातमिव।

११। विटपका आकार इव आकारो जिनका है। दिव्यानि आभरणानि है, भूषिता, है।

११। पारिजातो यथा पल्लवितकुसुमशाखादिशोभित शाखाभि उपलक्षित अवस्थाय क्षीरसमुद्रमध्ये उद्भव, तथा विष्णुरपि दिव्य केयूरादिभूषणशोभित बाहुसमूहे उपलक्षित हइया

[११] (१) भूष् to adorn, क्त affix. (२) पारिजातः देवतरु ...

১১। তিনি [illegible] (চতুর্ভুজ) এবং দিব্য [illegible] ভূষিত [illegible] হইয়া সমুদ্রজলমধ্যে আবির্ভূত দ্বিতীয় পারিজাতের ন্যায় [illegible] হইয়াছেন।

11. He, with his (four) arms, long as the branches (of a tree), adorned with celestial ornaments, appeared like another Párijáta tree in the waters (of the ocean)

दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः ।
हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम् ॥ १२ ॥

१२। दैत्येति। दैत्यस्त्रीगण्डलेखानाम् [illegible] यः मदरागः तं विलुम्पन्ति हरन्तीति मदरागविलोपिनः (१) तैः, चेतनावद्भिः सजीवैः, हेतिभिः २) सुदर्शनादिभिः शस्त्रैः. [illegible] वह्निज्वाला च हेतयः' इत्यमरः। उदीरितजयस्वनं (३) जयशब्दमुद्घोषयन्तीभिः मूर्त्तिमतीभिः [illegible] इत्यर्थः।

१२। दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः चेतनावद्भिः हेतिभिः उदीरितजयस्वनम्।

१०। दैत्यानां स्त्रियः तासां या गण्डलेखा तासाम्। उदीरितः जयस्वनः [illegible] यस्य तम्।

१२। मदरागविलोपिभिः—'पत्रलेखा [illegible] अलंकरण [illegible] ते' इति दिनकरः। तत्र [illegible] इत्यभिप्राय [illegible] परिग्रह्य [illegible] इति भावः। जयशब्दश्च 'जय विष्णो' 'जय [illegible] जगत्पते नारायण जय' इत्यादिरूपः।

১২। অসুরাঙ্গনাগণের গণ্ডস্থলস্থিত মদজনিত রক্তিমার বিলোপকারী [illegible] মূর্তিমান্ হইয়া তাঁহার জয়শব্দ ঘোষণা করিতেছে।

12. His arms, which take away the flush of excite[ment] from the cheeks of Asura women, were proclaiming his vi[ctory] after assuming the forms of living beings

[१२](१)रन्ज to colour, घञ् aff. (राग), वि, लुप् to take off, [illegible] (२) हन् to kill, क्तिन् aff (निपातनात्), (३) ईर with उत् to utte[r]

मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता ॥१३॥

१३। मुक्तेति। मुक्तः भगवत्सन्निधानात् त्यक्तः शेषेण सह विरोधः सहजमपि वैरं येन तेन, कुलिशव्रणाः अमृताहरणकाले इन्द्रयुद्धे ये वज्रप्रहाराः त एव लक्ष्माणि यस्य स तेन, प्रबद्धः अञ्जलिः येन तेन प्राञ्जलिना प्रबद्धाञ्जलिना इत्यर्थः, विनीतेन अनुद्धतेन, गरुत्मता (१) उपस्थितम् उपासितम्। पुरा किल तेन विष्णुना मातलिप्रार्थितेन दुहितुर्गुणकेश्याः पत्युः कस्यचित् सर्पस्य गरुडादभयदाने कृते स्वविपक्षरक्षणक्षुभितं पक्षिराजं स्वदोर्दण्ड एव तावत् वहस्व इति गर्वितं स्वबाहुतर्जनीभारेणैव भगवान् विनिनायेति महाभारतीयां कथां सूचयति विनीतेनेत्यनेन।

१३। मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा प्राञ्जलिना विनीतेन गरुत्मता उपस्थितम्।

१३। '[illegible]' इति [illegible] पाठः। '[illegible]' [illegible] [illegible]। [illegible]

१३। [illegible]

13 Garuda who bears (on his body) the mark of the wound of the Vajra, and whose pride had been [illegible] was praying to him with his palms joined having [illegible] aside [illegible] attitude of enmity to the serpent Sesha

योगनिद्रान्तविशदैः पावनैरवलोकनैः ।
भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् ॥१४॥

[१३] (१) [illegible]

१६। ब्रह्मादिरूपत्रयेण यथाक्रमं स्थावरजङ्गमानां जगतां सृष्टिस्थितिसंहार-
कारणाय तुभ्यं नमः। अत्र, 'यतो वा इमानि भूतानि जायन्ते येन जातानि
जीवन्ति यत् प्रयन्त्यभिसंविशन्ति' इत्यादिश्रुतिः प्रमाणम्। 'तुभ्यम्' इति नमः-
शब्दयोगात् चतुर्थी,—'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति सूत्रात्।

১৬। তুমি অগ্রে এই বিশ্বের সৃষ্টি, তৎপরে পালন, অনন্তর সংহার করিতেছ;
এইরূপে নিজ স্বরূপকে তিন ভাগে বিভক্ত করিয়াছ; তোমাকে নমস্কার।

16 Thou createst, prescrvest, and destroyest this universe in succession, thus Thou hast divided Thy own essence into three parts Obeisance to Thee.

रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः॥ १७॥

१७। ननु कूटस्थस्य कथं त्रैरूप्यमित्याशङ्क्यौपाधिकमित्याह,
रसान्तराणीति। एकरसं मधुरैकरसं, दिवि भवं दिव्यं, (१) पयः
वर्षोदकं, देशे देशे ऊषरादिदेशे अन्यान् रसान् रसान्तराणि लव-
णादीनि, यथा अश्नुते (२) प्राप्नोति, एवम् अविक्रियः निर्विकारः
एकरूप इत्यर्थः। त्वं, गुणेषु सत्त्वादिषु, अवस्थाः (३) सृष्ट्यादि-
रूपाः अश्नुषे।

१७। एकरसं दिव्य पय देशे देशे रसान्तराणि यथा अश्नुते, एवम् अवि-
क्रियः त्वं गुणेषु अवस्थाः (अश्नुषे)

१७। एको रसो यस्य तत् एकरसम्। नास्ति विक्रिया यस्य सः अविक्रियः।

वाच्यान्तरम्,—एकरसेन दिव्येन पयसा अश्यन्ते...अविक्रियेण त्वया अश्यन्ते।

१७। मधुरैकरसमपि मेघजलं यथा समुद्रादिषु पतित स्थानगुणभेदात्
लवणादिरसादभेदान् भजते, तथा एकरूपोऽपि त्वं सत्त्वादिगुणभेदात् सृष्ट्यादि-
रूपान् उपाधिभेदान् भजसे। तथाहि, रजोगुणेन सृजन् ब्रह्मेति, सत्त्वगु...

[१७] (१) दिव् sky, यत् aff (२) अश् to pervade-अश्नुते। आ...
आदिष्ट-आट। आनशे। अश् धातु। (३) अव, स्था to stay, अङ् aff.

धामयम् विष्णुरिति, तमोगुणेन च संहरन् हर इति अभिधीयते । उक्तञ्च,—
'नमो रजोजुषे सृष्टौ स्थितौ सत्त्वमयाय च । तमोमयाय संहारे त्रिगुणाय स्वयम्भुवे' । इति । अयञ्च ते रूपभेद औपाधिको नतु तात्त्विक इति भाव ।

১৭। মেঘজল একবিধস্বাদবিশিষ্ট হইয়াও যেমন স্থানে স্থানে বিভিন্ন আস্বাদ ধারণ করে, তুমি নির্বিকার অর্থাৎ একরূপ হইয়াও তেমনি গুণভেদে অবস্থান্তর ধারণ করিয়া থাক ।

17. As the rain water, though of uniform taste, gains diversity of flavours from different receptacles on earth, so dost Thou, though of unchangeable essence, manifest changes of state in diverse qualities

अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः ।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ॥१८॥

१८। अमेय इति । हे देव ! त्वम् अमेयः (१) लोकैरियत्तया परिच्छेद्यः, मितलोकः परिच्छिन्नलोकः, अनर्थी निःस्पृह । प्रार्थनाम् आवहतीति आवहः, पचाद्यच्, प्रार्थनानाम् आवहः कामद, अतः अन्यैः न जितः, जिष्णुः (२) जयशील अत्यन्तम् अत्यन्तं सूक्ष्मरूप, व्यक्तस्य (३) स्थूलरूपस्य कारणम् ।

१८। त्वम् अमेय मितलोक, अनर्थी प्रार्थनावह, अजित जिष्णु, अत्यन्त [illegible] व्यक्तकारणम् ।

१८। [illegible] इति अभिमत [illegible] निरवधि[illegible] । अनर्थी नि स्पृह —[illegible] इति गीतावचनात् । [illegible]

[१८] (१) मा or मि to measure, यत् aff (२) जि to [illegible] aff [illegible] (३) [illegible] aff.

सर्व्वज्ञस्त्वमविज्ञातः सर्व्वयोनिस्त्वमात्मभूः ।
सर्व्वप्रभुरनीशस्त्वमेकस्त्वं सर्व्वरूपभाक् ॥ २० ॥

२०। सर्व्वज्ञ इति। त्वं, जानातीति ज्ञः इगुपधेति कप्रत्ययः। त्वं सर्व्वस्य ज्ञः सर्व्वज्ञः(१)। अविज्ञातः न केनापि विज्ञात इत्यर्थः। त्वं सर्व्वस्य योनिः कारणं, त्वम्, आत्मन एव भवतीति आत्मभूः (२) न ते किञ्चित् कारणमस्ति इत्यर्थः। त्वं सर्व्वस्य प्रभुः त्वम् अनीशः, त्वम् एकः सर्व्वरूपभाक् त्वमेक एव सर्व्वात्मना वर्त्तसे।

२०। त्वं सर्व्वज्ञः अविज्ञातः, त्वं सर्व्वयोनिः आत्मभूः, त्वं सर्व्वप्रभुः अनीशः, त्वम् एकः सर्व्वरूपभाक्।

२०। त्वं सर्व्वमेव जानासि, त्वमन्यदर्थं तु ईदृशतया इयत्तया वा कोऽपि अव-धारयितुं न शक्नोति। त्वमस्य विश्वस्य कारणमसि त्वय तु स्वप्रकाशत्वात् अका-रणकोऽसि, त्वं सर्व्वस्य नियन्तासि त्वय तु अनियन्तोऽसि, त्वं केवलोऽपि विश्वा-त्मना वर्त्तसे। आत्मभुः स्वयम्भूः, आत्मना आत्मानं सृज्यमीत्यर्थं, अत मनु —
'योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः। सर्व्वभूतमयोऽचिन्त्यः स एव स्वय-मुद्बभौ'। तस्य एकत्वे,—'सदेव सौम्येदमग्र आसीत् एकमेवाद्वितीयं' इति नेह नानास्ति किञ्चन' इत्यादि श्रुतिवचनं प्रमाणम्। सर्व्वाणि रूपाणि भजति सर्व्वरूपभाक्, भजधातो ण्विप्रत्ययः।

२०। তুমি সর্ব্বজ্ঞ, কিন্তু তোমাকে কেহ জানিতে পারে না, তুমি সব
কারণ, কিন্তু তোমার কারণ কেহ নাই
নাই . তুমি এক, কিন্তু অন ... সর্ব

বড় ...

सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥ २१ ॥

२१। सप्तेति। हे देव! त्वां सप्तभिः सामभिः रथन्तरादिभिः उपगीतम्। तद्धितार्थेत्युत्तरपदसमासः। सप्तानाम् अर्णवानां जलं सप्तार्णवजलम्। पूर्ववत् समासः। तत्र शेते यः सः सप्तार्णवजलेशयः (१) तम्। शयवासवासिष्वकालादित्यलुक्। सप्तार्चिः मुखं यस्य तम्। "अग्निमुखा वै देवाः" इति श्रुतेः। सप्तानां लोकानां भूर्भुवःस्वरादीनाम् एकसंश्रयम्, एवम्भूतम्, आचख्युः (२)।

২১। ত্বা সপ্তসামোপগীত সপ্তার্ণবজলেশয় সপ্তার্চির্মুখ সপ্তলোকৈকসংশ্রয়ম্ আচখ্যু।

২১। বাচ্যান্তর,—ত্বং সপ্তসামোপগীত, সপ্তার্ণবজলেশয় সপ্তার্চির্মুখ সপ্তলোকৈকসংশ্রয়: আখ্যায়সে।

২১। সপ্তসামোপগীত সামগানকর্ত্তৃক গানস্থ ষড়্জাদিভিঃ সপ্তভি স্বরৈ উপগীতম্। 'রথন্তর-বৃহৎসাম-বামদেব্য-বৈরূপ-পাবমান-বৈরাজ-চান্দ্রমসাভিধানানি, তৈরিদং ষিড়্‌জাদি বিশেষবাচকানি বা উপগীতম্' ইতি দিনকর। সপ্তার্ণবা যথা,—লবণোদ, ইক্ষুরসোদ, সুরোদ, ঘৃতোদ, দধিমণ্ডোদ, ক্ষীরোদ, স্বাদূদ ইতি। সপ্ত অর্চিষো যস্য স সপ্তার্চি অগ্নি, অর্চি শিখা। সপ্ত শিখা যথা,—কালী, করালী, মনোজবা, সুলোহিতা, সুধূম্রবর্ণা, উগ্রা, প্রদীপ্তা চেতি। সপ্ত লোকা যথা ভূ, ভুব, স্ব, মহ, জন, তপ, সত্য চেতি।

২১। সপ্ত সামবেদে তুমি গীত হইয়া থাক, সপ্ত সমুদ্রের জলে তুমি শয়ন করিয়া থাক, সপ্তার্চিবিশিষ্ট অগ্নি তোমার মুখস্বরূপ, এবং তুমি সপ্ত লোকের একমাত্র আশ্রয়; তোমাকে এইরূপ কীর্ত্তন করিয়া থাকে।

21 Thou art hymned by the seven Sama, Thou lyest on the waters of the seven seas; the seven-flamed Fire is as Thy

[২১] (১) জলে in the waters, শী to sleep, অলুক্ (২) খ্যা, to tell, আখ্যৎ—আখ্যতাম্। আখ্যঃ-আখ্যতম্। আখ্যাম-আখ্যাব। আখ্যাম, &c আখ্যন, &c.

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः ।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥ २० ॥

२०। सर्वज्ञ इति। त्वं, जानातीति ज्ञः सर्वमपि जानातीति सर्वज्ञः। सर्वस्य ज्ञः सर्वज्ञः(१)। अविज्ञातः न केनापि विज्ञात इत्यर्थः। त्वं सर्वस्य योनिः कारणं, स्वम् आत्मन एव भवतीति आत्मभूः (२) न ते किञ्चित् कारणमस्ति इत्यर्थः। त्वं सर्वस्य प्रभुः स्वम् अनीशः, त्वम् एकः सर्वरूपभाक् त्वमेक एव सर्वात्मना वर्त्तसे।

२०। त्वं सर्वज्ञः अविज्ञातः, त्वं सर्वयोनिः आत्मभूः, त्वं सर्वप्रभुः अनीशः, त्वम् एकः सर्वरूपभाक्।

२०। त्वं सर्वमेव जानासि, त्वत्स्वरूपं तु [illegible] कोऽपि अव-धारयितुं न शक्नोति। त्वमेव निखिल कारणमसि स्वयं तु [illegible] [illegible]ऽसि, त्वं सर्वस्य नियन्ताऽसि स्वयं तु अनियन्तृकोऽसि, त्वं [illegible] [illegible] वर्त्तसे। आत्मभूः स्वयम्भूः, आत्मना आत्मानं [illegible], [illegible] [illegible] [illegible] सनातनः। सर्वभूतमयोऽचिन्त्यः स एव स्वयं-[illegible]। तथा च श्रुतिः,—'सदेव सौम्येदमग्र आसीत् एकमेवाद्वितीयं नेति नेति [illegible] [illegible] [illegible]' इत्यादि श्रुतिवचनं प्रमाणम्। [illegible] [illegible] [illegible] सर्वरूपभाक् [illegible] [illegible]।

২০। তুমি সর্ব্বজ্ঞ, কিন্তু তোমাকে কেহ জানিতে পারে না, তুমি সকলের কারণ, কিন্তু তোমার কারণ কেহ নাই, তুমি সকলের নিয়ন্তা, কিন্তু তোমার নিয়ন্তা নাই, তুমি এক, কিন্তু অনন্ত বিশ্বরূপে অবস্থান করিতেছ।

20. Thou knowest all, but none can know Thee, Thou art the cause of all, but Thou Thyself hast no cause (आत्मभूः literally—self-born); Thou art ruler of all, but thou hast no ruler, Thou art One, still Thou art existing as the infinite universe.

---

[२०] (१) सर्व all, ज्ञा to know, क aff. (२) आत्मन् self, भू to be; क्विप् aff.

**सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्।**
**सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम्॥ २१॥**

२१। सप्तेति। हे देव! त्वां सप्तभिः सामभिः रथन्तरादिभिः उपगीतम्। तद्धितार्थेत्युत्तरपदसमासः। सप्तानाम् अर्णवानां जलं सप्तार्णवजलम्। पूर्व्ववत् समासः। तत्र शेते यः सः सप्तार्णवजलेशयः (१) तम्। शयवासवासिष्वकालादित्यलुक्। सप्तार्चिः मुखं यस्य तम्। "अग्निमुखा वै देवाः" इति श्रुतेः। सप्तानां लोकानां भूर्भुवःस्वरादीनाम् एकसंश्रयम्, एवम्भूतम्, आचख्युः २)।

२१। त्वा सप्तसामोपगीत सप्तार्णवजलेशय सप्तार्चिर्मुख सप्तलोकैकसंश्रयम् आचख्युः।

२१। वाच्यान्तर,—त्वं सप्तसामोपगीतः सप्तार्णवजलेशय सप्तार्चिर्मुख सप्तलोकैकसंश्रय' आख्यायसे।

२१। सप्तसामोपगीत सामगानरताश्चकस गानस्य कुटादिभिः सप्तभि स्वरैः उपगीतम्। 'रथन्तर-बृहत्साम-वामदेव्य-वैरूप-पावमान-वैराज-वाम्भ्रसाभि- धानानि, तैरिद त्रिवृत्तिवादि विंशीररात्रमित्युन्नैर्वा उपगीतम्' इति दिनकर। सप्तार्णवा यथा,—लवणोद, इक्षुरसोद, सुरोद, घृतोद, दधिमण्डोद, क्षीरोद, स्वादूदश्चेति। सप्त अर्चिंषी यस्य स सप्तार्चिः अग्नि, अर्चि शिखा। सप्त सप्तशिखा यथा,—काली,कराली, मनोजवा, सुलोहिता, सुधूम्रवर्णा, उग्रा, प्रदीप्ता चेति। सप्त लोका यथा भू, भुव, स्व, मह, जन, तप, सत्य चेति।

২১। সপ্ত সামরবে তুমি গীত হইয়া থাক, সপ্ত সমুদ্রের জলে তুমি শয়ন করিয়া থাক, সপ্তশিখাবিশিষ্ট অগ্নি তোমার মুখস্বরূপ, এবং তুমি সপ্ত লোকের একমাত্র আশ্রয়, তোমাকে এইরূপ কীর্ত্তন করিয়া থাকে।

21 Thou art hymned by the seven Sams, Thou lyest on the waters of the seven seas, the seven-flamed Fire is as Thy

---

[२१] (१) अर्ण in the waters, शी to sleep, अच् aff (२) चा, ख्या, to tell, अचक्षत्—अचक्षत। अचक्षी-अचक्षे। अचक्षिष-ख्यादेः। अचक्षाम, &c अख्याम, &c.

mouth, and Thou art the sole support of the seven worlds. It is thus that Thou art described.

चतुर्वर्गफलं ज्ञानं कालावस्था चतुर्युगा।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥२२॥

२२। चतुरिति। चतुर्णां धर्मार्थकाममोक्षाणां वर्गः चतुर्वर्गः। "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः" इत्यमरः। तत्फलकं तत् ज्ञानं, चत्वारि युगानि कृतत्रेतादीनि यस्यां सा चतुर्युगा कालावस्था कालपरिमाणं, चत्वारः वर्णाः प्रकृताः उच्यन्ते यस्मिन्निति चतुर्वर्णमयः चातुर्वर्ण्यप्रचुरः इत्यर्थः। तत्प्रकृतवचने मयट्। तद्धितार्थेति तद्धितार्थे विषये तत्पुरुषः। अयं लोकः, इत्येवं-रूपं सर्वं चतुर्मुखात् चतुर्मुखस्यापि त्वत्तः जातम् इति शेषः। "इदं सर्वमसृजत यदिदं किञ्चित्" इति श्रुतेः।

२२। चतुर्वर्गफलं ज्ञानं, चतुर्युगा कालावस्था, चतुर्वर्णमयः लोकः, (इत्येतत्) सर्वं चतुर्मुखात् त्वत्त (जातम्)।

२२। [illegible] समास,—'चातुर्वर्ण्य [illegible]' इति [illegible]। [illegible]

२२। [illegible]

22. The knowledge which yields the fourfold objects of life (the four great objects of human life, are (1) merit, (2) wealth, [illegible] and (4) liberation), the time which is measured [illegible] Yugas [illegible] four ages of the world), the men who [illegible] four castes, all these are created out of Thee [illegible]

अभ्यासनिगृहीतेन मनसा हृदयाश्रयम् ।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ॥२३॥

२३। अभ्यासेति। अभ्यासेन (१) निगृहीतं विषयान्तरेभ्यः निवर्त्तितं तेन मनसा, योगिनः हृदयाश्रयं हृत्पद्मस्थं, ज्योतिर्मयं (२) त्वां विमुक्तये मोक्षार्थं विचिन्वन्ति(३) अन्विष्यन्ति ध्यायन्ति इत्यर्थः।

२३। योगिनः अभ्यासनिगृहीतेन मनसा हृदयाश्रयं ज्योतिर्मयं त्वां विमुक्तये विचिन्वन्ति।

२३। हृदयमेव आश्रयो यस्य स तम्। वाच्यान्तर,—योगिभिः हृदयाश्रयः ज्योतिर्मयः त्वं विचीयसे।

२३। मुमुक्षवो योगिनः समाधिवशीकृतेन मनसा हृदयस्थं ज्योतीरूपं त्वां ध्यायन्ति। हृदयम् आश्रयो यस्य तम्, हृदयलक्षणं यथाह वाग्भट,—'यतो निर्याति विषयी यस्मिन्नेव प्रलीयते। हृदयं तद् विजानीयान्मनसः स्थितिकारणम्'। इति। तस्मिन् हृदये अनाहताख्यं द्वादशदलं पद्मम् अस्ति, तत्स्थितम् ज्योतीरूपमिव ईश्वरं योगिनो ध्यायन्ति, यदुक्तं,—'हृदयेऽनाहतं चक्रं दिव्यं प्रकाशते। प्रकाशान्तं तदित्युक्तं सुरं द्वादशभिर्दलैः।' यथा 'अनाहताख्यं यत् तत् मुनिभिः परिकीर्तितम्। आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम्।' इति। ज्योतिर्मयमिति,—'तदेव ज्योतिषां ज्योतिः' इति श्रुतेः। योगी नाम मन्त्री विषयान्तरव्यावृत्तः, जीवात्मपरमात्मनोः संयोगी वा, तदि-यथा योगिनः। अभ्यासयोगयुक्तानां मुक्तौ भगवद्वाक्यं प्रमाणं यथा,—'अभ्यासयोगयुक्तेन चेतसा नान्यगामिना। परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्'। इति।

২৩। যোগিগণ যে অভ্যাসের দ্বারা মনকে নিগৃহীত করিয়া, হৃদয়স্থ জ্যোতির্ময়ী মূর্ত্তি তোমাকে ধ্যান করেন।

23 Controlling their minds by means of assiduous practice,

---

[२३] (१) अभि, अस to throw, घञ् aff. (२) ज्योतिस् light, मयट् aff. (३) वि, चि,—चिनोति चिनुते। अचिनोत् अचिनुत। अचैषीत्-अचेष्ट। चिचाय चिचाय। &c कर्मणि,—चीयते अचायि। &c चित, &c.

*for the sake of final emancipation, the Yogis contemplate within their souls Thy form consisting of light.*

**अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।**
**स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥ २४॥**

२४। अजस्येति। न जायते इति अजः। अन्येष्वपि दृश्यत इति डप्रत्ययः। तस्य अजस्य जन्मशून्यस्यापि जन्म गृह्णतः मत्स्यादिरूपेण जायमानस्य, निरीहस्य चेष्टारहितस्यापि हतद्विषः शत्रून् हतवतः, जागरूकस्य(१) सर्वसाक्षितया नित्यप्रबुद्धस्यापि स्वपतः(२) योगनिद्रामनुभवतः, इत्थं विरुद्धचेष्टस्य तव याथार्थ्यं (३) कः वेद वेत्ति। विदो लटो वेति णलादेशः।

२४। अजस्य जन्म गृह्णतः, निरीहस्य हतद्विषः, जागरूकस्य स्वपतः [illegible] याथार्थ्यं कः वेद।

२४। नास्ति ईहा यस्य सः तस्य। तव याथार्थ्यं केन विद्यते इति वाच्यान्तरम्।

२४। त्वं जन्मरहितोऽपि अवताररूपेण जायसे, चेष्टारहितोऽपि असुरसंहाराय चेष्टसे, नित्यप्रबुद्धोऽपि योगनिद्रां भजसे, एवं तव चेष्टा परस्परविरुद्धा, अतः कस्ते तत्त्वं निरूपयितुं समर्थः। तस्य अजत्वे प्रमाणं यथा,—'नहि जातो न जायेऽहं न जनिष्ये कदाचन। क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः॥' इति। तस्य जन्मग्राहित्वे प्रमाणं यथा,—'अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया'॥ एवमन्यत्रापि गीतावचनमनुसन्धेयम्।

২৪। তুমি জন্মরহিত, অথচ (অবতাররূপে) জন্মপরিগ্রহ করিয়া থাক; তুমি চেষ্টারহিত, অথচ রিপুসংহারে চেষ্টিত হইয়া থাক, তুমি (সর্ব্বসাক্ষিরূপে) জাগরূক, অথচ যোগনিদ্রা ভজনা করিয়া থাক; তোমার তত্ত্ব কে জানিবে!

---

[२४] (१) जागृ to awake, ऊक aff. pos. (२) स्वप् to sleep, शतृ aff. (३) यथार्थ true, ष्यञ् aff.

24. Though self-existent, yet Thou art born (as incarnations); though devoid of passion, Though destroyest the enmies (the demons); though in Thy deepest sleep, Thou art ever-awake, who then knows Thy true nature?

**शब्दादीन् विषयान् भोक्तुं चरितुं दुश्चरं तपः।**
**पर्य्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्त्तितुम्॥२५॥**

२५। शब्दादीनिति। किञ्च, कृष्णादिरूपेण शब्दादीन् विषयान् भोक्तुं, नरनारायणादिरूपेण दुश्चरं तपः चरितुं तथा दैत्यमर्दनेन प्रजाः पातुम् औदासीन्येन (१) तटस्थेन वर्त्तितुञ्च(२), पर्य्याप्तः समर्थः असि। भोगतपसोः पालनौदासीन्ययोश्च परस्परविरुद्धयो-राचरणे त्वदन्यः कः समर्थः इत्यर्थः।

२५। शब्दादीन् विषयान् भोक्तुं, दुश्चरं तपः चरितुं, प्रजाः पातुं, औदासीन्येन वर्त्तितुं, पर्य्याप्तोऽसि। त्वया पर्य्याप्तेन भूयते इति वाच्यान्तरम्।

२५। तुमि भोगशरीरमधिष्ठाय शब्दस्पर्शरूपरसगन्धरूपान् इन्द्रियार्थान् निर्विं शसि, नरनारायणादिरूपेण कठोर तपश्चरण कर, प्रजापतिरूपेण विश्व पालन, पुरुषरूपेण उदासीनता ओ अवलम्ब, एतत् परस्परविरुद्धाचारे तुमिई समर्थ। सांख्यगण प्रकृति कर्त्री पुरुषम् पुष्करपलाशवत निर्लेप इत्यादि वदन्ति, '[illegible]' इत्यादिश्रुतिरत्र प्रमाणम्। शब्द आदिर्येषां ते शब्दादयः तान्।

२५। तुमिइ विषय भोग करिते एवं दुश्चर तपश्चरण करिते, प्रजापालन करिते एवं औदासीन्य ते अवस्थान करिते तुमिइ समर्थ।

25. The enjoyments of sounds and other objects of sense and yet the performance of austere devotions, the government of created beings and yet existence like that of one apparently indifferent, these are (contradictions) of which Thou alone art capable.

---

[२५] (१) उदासीन, indifferent भाव् अर्थ (२) वृत्—वर्त्तते। वर्त्तेत। अवर्त्तत्-अवर्त्तिष्ट। ववृते। वर्त्तिता। वृत्त।

**बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।**
**त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे ॥ २६॥**

२६। बहुधेति। आगमैः (१) त्रयीसांख्यादिभिः दर्शनैः, बहुधा भिन्नाः अपि, सिद्धिहेतवः पुरुषार्थसाधकाः, पन्थानः उपायाः, जाह्नव्याः इमे जाह्नवीयाः गाङ्गाः। वृद्धाच्छ इति छप्रत्ययः। ओघाः(२) प्रवाहाः, ते अपि आगमैः आगतिभिः बहुधा भिन्नाः सिद्धिहेतवश्च, अर्णवइव त्वयि एव निपतन्ति (३) प्रविशन्ति येन केनापि रूपेण त्वामेवोपयान्ति इत्यर्थः। यथाहुराचार्याः "किं बहुना कारवोऽपि विश्वकर्माणमुपासते"।

२६। आगमैः बहुधा भिन्नाः सिद्धिहेतवः पन्थानः, जाह्नवीयाः ओघाः अर्णवे इव त्वयि एव निपतन्ति।

२६। भिन्नं हेतवः। वाच्यान्तरं,—भिन्नैः सिद्धिहेतुभिः पथिभिः जाह्नवीयैः ओघैः इव निपत्यते।

२६। गङ्गाप्रवाहा दिशि दिशि विभिन्नान् मार्गान् अनुसृत्य प्रवहन्तोऽपि यथा पश्चात् समुद्र एव निपतन्ति, तथा, पुरुषार्थसिद्ध्युपायाः, 'वेदा विभिन्नाः स्मृतयो विभिन्ना नासौ मुनिर्यस्य मतं न भिन्नम्' इति शास्त्रकाराणां मतभेदेन विभिन्नरूपा अपि, अन्तिमे ईश्वरे त्वयि एव पर्यवस्यन्ति। एकमेव ईश्वरं त्वां नानादर्शनभेदेन सर्वे उपासते इति भावः।

২৬। যেরূপ গঙ্গার প্রবাহ সকল বিভিন্ন পথে প্রবাহিত হইয়া অবশেষে সমুদ্রে নিপতিত হয়, সেইরূপ পুরুষার্থসিদ্ধির উপায় সকল শাস্ত্রভেদে বিভিন্ন হইলেও তোমাতেই পর্যবসিত হয়।

26. As the streams of the Ganges, after pursuing different courses ultimately fall into the sea, so the ways, leading to everlasting bliss, though different according to the different Śāstras, ultimately terminate in Thee.

---

[illegible] (२) [illegible] to collect, [illegible]
[illegible] (३) [illegible]

**त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम् ।**
**गतिस्त्वं वीतरागाणामभूयःसन्निवृत्तये ॥२७॥**

२७। त्वयीति। त्वयि आवेशितं निवेशितं चित्तं यैः तेषां, तुभ्यं समर्पितानि कर्माणि यैः तेषाम्, "मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि कौन्तेय प्रतिजाने प्रियोऽसि मे॥" इति भगवद्वचनात्। वीतरागाणां (१) विरक्तानाम्, अभूयःसन्निवृत्तये (२) अपुनरावृत्तये मोक्षाय इत्यर्थः, त्वम् एव गतिः साधनम्, "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुतेरित्यर्थः ॥ २७ ॥

२७। त्वय्यावेशितचित्तानां, त्वत्समर्पितकर्मणां वीतरागाणाम् अभूयःसन्निवृत्तये त्वं गतिः।

२७। वीतः रागः येषां ते तेषाम्। भूयः सन्निवृत्तिः सा न भवतीति अभूयःसन्निवृत्तिः तस्यै। तस्या अभूयः इति वाच्यान्तरम्।

२७। ये जनाः भवदन्यात् कामात् सन्यस्य सम्यक् चित्तं त्वयि समाहितवन्तः, सर्वाणि च कर्माणि त्वयि समर्पितवन्तः त्वमेव केवलं शरणम्। अत्र भगवद्वचनस्य प्रमाणम् यथा,—"ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायन्त उपासते। तेषामहं समुद्धर्ता मृत्युसंसारसागरात्॥" इति वीत विगत राग विषयानुराग येषां ते, तेषाम्।

২৭। যাঁহারা তোমাতে চিত্ত সমর্পণ করিয়াছেন এবং তোমাতে সমস্ত কর্ম সমর্পিত করিয়াছেন, সেই বীতরাগ ব্যক্তিগণের এই সংসারে পুনরাবর্তননিবৃত্তিবিষয়ে তুমিই একমাত্র গতি।

27. Thou art the only means by which the return to this world of those dispassionate (ascetics), who concentrate their souls in Thee, and consecrate all their actions to The, is stopped

---

[२७] (१) वि, इण् to go, क्त aff. (वीत), रञ्ज to colour, घञ् aff (राग) (२) अ neg. भूयः again, सम्, नि, वृत् to remain, क्तिन् aff

28. Since the earth and Thine other glorious works, though objects of direct perception, are immeasurable, what can be said of Thee, who art knowable only through authoritative testimony (the Vedas) and inference.

केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ॥२९॥

२९। केवलमिति। स्मरणेन (१) केवलं कृत्स्नम्। "केवलः कृत्स्न-एकश्च" इति शाश्वतः। पुरुषं स्मर्तारं जनं पुनासि (२) यत यत् इत्यर्थः, अनेन एव स्मृतिकार्येण एव. त्वयि त्वद्विषये. याः शेषा अवशिष्टाः वृत्तयः दर्शनस्पर्शनादयो व्यापाराः, ताः निवेदितफलाः ज्ञापितकार्याः। तव स्मरणमेव एतत् फलं दर्शनादीनां गु किमुदिति नावधारयामः इति भावः।

२९। यत स्मरणेनैव केवल पुरुष पुनासि, अनेन त्वयि शेषा वृत्तयः निवेदितफला।

२९। निवेदित फलं यासां ताः निवेदित फला। [illegible] — केवल पुरुष (भक्त) पुनासि, शेषासि ... निवेदितफलाति [illegible]

२९। [illegible] पुरुष [illegible] त्व [illegible] दर्शनस्पर्शनादीनाम् [illegible] [illegible]

२९। [illegible]

[२९] (१) to recollect, [illegible] (२) पु to purify, [illegible]

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा॥२८॥

२८। प्रत्यक्ष इति। प्रत्यक्षः (१) प्रत्यक्षप्रमाणगम्यः अपि तव मह्यादिः पृथिव्यादिः, महिमा (२), ऐश्वर्य्यम्, अपरिच्छेद्यः (३) इयत्तया न अवधार्य्यः, आप्तवाक् वेदः "यतो वा इमानि भूतानि जायन्ते" इत्यादिः श्रुतिः। अनुमानं (४) "क्षित्यादिकं सकर्त्तृकं कार्य्यत्वात् घटवत् इत्यादिकम्, ताभ्यां साध्यं (५) गम्यं, त्वां प्रति का कथा, प्रत्यक्षमपि त्वत्कृतं जगत् अपरिच्छेद्यं तत्कारणमप्रत्यक्षस्त्वम् अपरिच्छेद्य इति किमु वक्तव्यम् इत्यर्थः।

२८। प्रत्यक्षोऽपि तव मह्यादिः महिमा अपरिच्छेद्यः आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा।

२८। अक्षं प्रतिगतः प्रत्यक्षः। मही आदिः यस्य सः। आप्तवाक् च अनुमानं च आप्तवागनुमाने ताभ्याम्। प्रत्यक्षेणापि मह्यादिना महिम्ना अपरिच्छेद्येन (भूयते), कथा कया (भूयते) इति वाच्यान्तरम्।

२८। तव इच्छया प्रादुर्भूतं प्रत्यक्षतः परिदृश्यमानमपि क्षित्यादिकं यदा इयत्तया न अवधारणीयं भवति, तदा वेदानुमानसाध्यः परोक्षस्त्वम् इयत्तया नैव अवधारणीयो भवसि इति किमु वक्तव्यम्। आप्तवाक्,—'द्यावाभूमी जनयन् देव एक आस्ते विश्वस्य कर्त्ता भुवनस्य गोप्ता' इत्यादिरूपा। अनुमानं कार्य्यादिदर्शनेन कारणादिनिर्णयः, यथा;—यत् यत् जन्यं तत् तत् सकर्त्तृकं, यथा घटः; क्षितिः सकर्त्तृका कार्य्यत्वात्। न च तत् कर्त्तृत्वमस्मदादीनां सम्भवति इत्यतः तत्कर्त्तृत्वेन ईश्वरसिद्धिः।

২৮। তোমার পৃথিবী প্রভৃতি ঐশ্বর্য্য সকল প্রত্যক্ষসিদ্ধ হইলেও যখন তাহার পরিমাণ করা যায় না; তখন তোমার নিজের পরিমাণের কথাই নাই, কারণ তুমি কেবল বেদ ও অনুমান দ্বারা জ্ঞেয়।

[२८] (१) प्रति, अक्षि eye, अच् aff. (२) महत् great, इमनिच् aff. (३) अ neg. परि with छिद् to measure, ण्यत् aff (४) अनु, मा to measure, ल्युट् aff. (५) साध् to accomplish, यत् aff.

29. Since Thou renderest him perfectly pure, who merely thinks of Thee, the greatness of the merit that accrues from connecting the remaining faculties with Thee, is declared by the merit which accrues from the simple thinking of Thee.

उदधेरिव रत्नानि तेजांसीव विवस्वतः।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥३०॥

३०। उदधेरिति। उदधेः रत्नानि इव, विवस्वतः (१) तेजांसि इव दूराणि अवाङ्मनसगोचराणि ते चरितानि स्तुतिभ्यः व्यतिरिच्यन्ते (२) निःशेषं स्तोतुं न शक्यन्ते इत्यर्थः।

३०। उदधेः रत्नानीव, विवस्वतः तेजांसीव, दूराणि ते चरितानि स्तुतिभ्यः व्यतिरिच्यन्ते।

३०। यथा हि अनन्तरत्नाकरस्य सिन्धोः रत्नानि, यथा वा अपरिमिततेजोनिधेः सूर्य्यस्य तेजांसि निःशेषं न गण्यन्ते, तथा अनन्तमाहात्म्यनिधेः जगदीश्वरस्य ते चरितानि स्तुतिभिः निःशेषं न गण्यन्ते। त्वं स्तुतिपथमतीतोऽसीति भावः। अत्र यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह इत्यादिश्रुतिः प्रमाणम्। व्यतिरिच्यन्ते इति कर्म्मकर्त्तरि प्रयोगः। उदकानि धीयन्ते अत्र इति उदधिः समुद्रः, कर्म्मण्यधिकरणे च इति धा-धातोः किप्रत्ययः।

৩০। তোমার অবাঙ্মনসগোচর চরিত্রসকল, সমুদ্রের রত্নরাশি ও সূর্য্যের তেজোরাশির ন্যায় স্তুতিপথের অতীত।

30. Like the treasures of the sea, and the fiery splendour of the sun, Thy actions, far beyond the reach of words and thought, exceed all our praises.

---

[३०] (१) वि वस् to cover, क्विप्, विवस् here said to imply various covering, as a garment of light, i. e. the rays of the sun, and मतुप् aff. (२) रिच्,—रिणक्ति। अरिणक्। अरैक्षीत्-अरिचत्। रिरेच। रिक्तः, &c.

**अनवाप्तमवाप्तव्यं न ते किञ्चन विद्यते ।**
**लोकानुग्रह एवैको हेतुस्ते जन्मकर्म्मणोः ॥३१॥**

३१। अनवाप्तमिति। अनवाप्तम् अप्राप्तम् अवाप्तव्यं ते तव किञ्चन किञ्चित् अपि न विद्यते (१) नित्यपरिपूर्णत्वात् इति भावः। तर्हि किंनिबन्धने जन्मकर्म्मणी? तत्राह, लोकेति। एकः लोकानुग्रह एव ते जन्मकर्म्मणो हेतुः, परमकारुणिकस्य ते परार्थैव प्रवृत्तिर्न स्वार्था इत्यर्थः।

३१। अनवाप्तम् अवाप्तव्यं ते किञ्चन न विद्यते, एकः [illegible] जन्मकर्म्मणो हेतुः।

३१। [illegible] जन्म च कर्म च जन्मकर्म्मणी [illegible] —
[illegible] न ते किञ्चन विद्यते [illegible] लोकानुग्रहेण हेतुना [illegible]

३१। नित्यपरिपूर्णस्य ते न हि किञ्चिदपि [illegible] अलभ्यं वा वर्त्त-
तेऽपि मत्स्यकूर्म्मादिरूपेण जन्म, वेदोद्धरण–धराधारण–दैत्यदलनादिकं कर्म्म
च [illegible] विश्वहितार्थमेव स्वीकरोषि। '[illegible]-
[illegible] पुरुष [illegible] लौकिक–वैदिक–सम्प्रदाय–प्रवर्त्तक
[illegible] इति [illegible] साम्प्रतं मत
[illegible]। भगवतो लोकानुग्रहार्थं जन्मकर्म्मस्वीकारे भगवद्वचन-
मेव प्रमाणं, यथा,—'यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत। अभ्युत्थान-
मधर्म्मस्य तदात्मानं सृजाम्यहम्॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे॥ जन्म कर्म्म च मे दिव्यमेवं यो वेत्ति
तत्त्वतः। त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन'॥ इति।

৩১। তোমার অলব্ধ বা লব্ধব্য কিছুই নাই, তুমি যে জন্ম ও কর্ম্ম স্বীকার করিয়া থাক, সে কেবল লোকানুগ্রহের জন্য।

31. There is nothing that Thou hast not or mayst not

---

[३१] (१) विद,—विद्यते। अविद्यत। [illegible]। विविदे। भावे—विद्यते। अवेदि। &c.

३३। [illegible] [illegible]

33. In this way the gods propitiated Him, who cannot be perceived by the senses, or what they said was not praise but strict truth in connection with that greatest God

तस्मै कुशलसंप्रश्नव्यञ्जितप्रीतये सुराः।
भयमप्रलयोद्वेलादाचख्युर्नैरृतोदधेः ॥३४॥

३४। तस्मा इति। सुराः देवाः कुशलस्य संप्रश्न(१)तेन व्यञ्जिता(२) प्रकटीकृता प्रीतिः(३) यस्य तस्मै गदितप्रसादाय हरये। अन्यथा अनवसरविज्ञप्तिः सुरासामिव निष्फला स्यात् इति भावः। तस्मै विष्णवे, अप्रलये प्रलयाभावे अपि उद्वेलात् उन्मर्यादात् नैरृतं राक्षसः सः एव उदधिः तस्मात्, भयम् आचख्युः कथितवन्तः।

३४। सुराः कुशलसंप्रश्नव्यञ्जितप्रीतये तस्मै अप्रलयोद्वेलात् नैरृतोदधेः भयम् आचख्युः।

३४। वाच्यान्तर—सुरैः भयम् आचख्ये इति।

३४। ईश्वरकुशलजिज्ञासनानन्तर विष्णु आगन्तुकवर्गस्य प्रीतिचिह्नं प्रकटयामास, तच्च भगवत्कं तथा प्रसन्नं ज्ञात्वा, अयमेवावसरः यत्र भगवते प्रार्थना विज्ञापयितुम् इति निश्चित्य देवाः, अकाले प्रलयायाय युक्तितास महोदधिरिव राक्षसात् उपस्थितं महाभयं तस्मै निवेदयामासुः। पृष्टतएव प्रीतिचिह्नदर्शनानन्तरैव प्रार्थना, तथा च कुमारसम्भवे—'कालप्रयुक्ता खलु कार्यविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति।' उद्गता वेलाम् उद्वेलः, अत्यादय इति समासः। निरृतेः अपत्यं नैरृतः, तस्यापत्यम् इत्यण्।

৩৪। বিষ্ণু কুশল প্রশ্ন দ্বারা (দেবগণের প্রতি) প্রীতিচিহ্ন প্রকাশ করিলে,

---

[३४] (१) सम्, प्रच्छ् to ask, नङ् aff. (२) वि, अञ्ज् to mix, णिच्, क्त aff. (३) प्री to please, क्तिच् aff.

দেখেন, রাবণরূপ সমুদ্র বিনা প্রলয়ে উদ্বেল হইয়া ভয় উৎপাদন করিয়াছে, ইহা তাঁহারে নিবেদন করিলেন।

34. When Vishnu expressed his good feeling (towards the gods) by inquiring after their welfare, the gods represented to him that the Rákshasa (रावण) like a sea swelling without a storm (प्रलय lit. the destruction of the world after a Kalpa), was creating alarm.

अथ वेलासमासन्नशैलरन्ध्रानुनादिना ।
स्वरेणोवाच भगवान् परिभूतार्णवध्वनिः ॥ ३५ ॥

३५। अथेति। अथ वेलायाम् अब्धिकूले समासन्नानां सन्निकृष्टानां, शैलानां रन्ध्रेषु गह्वरेषु, अनुनादिना प्रतिध्वनिमता, स्वरेण परिभूतार्णवध्वनिः तिरस्कृतसमुद्रघोषः भगवान् उवाच (१)।

३५। अथ भगवान् वेलासमासन्नशैलरन्ध्रानुनादिना स्वरेण परिभूतार्णव ध्वनिः उवाच।

३५। परिभूतार्णवध्वनिना भगवता ऊचे इति वाच्यान्तरम्।

३५। [illegible]

৩৫। অনন্তর ভগবান (বিষ্ণু) [illegible]

35 After that, the Lord of all Riches began to speak in a

---

[३५] (१) [illegible]

voice, which resounded in the caverns of the mountains near the sea shore, and subdued even the roar of the ocean.

पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता।
बभूव कृतसंस्कारा चरितार्थैव भारती ॥२६॥

२६। पुराणस्येति। पुराणस्य (१) चिरन्तनस्य, कवेः (२), तस्य भगवतः वर्णस्थानेषु उरःकण्ठादिषु समीरिता सम्यक् उच्चारिता अतएव कृतः सम्पादितः संस्कारः साधुत्वस्पष्टतादिप्रयत्नः यस्याः सा भारती(३) वाणी, चरितार्था कृतार्था बभूव एव। एवकारस्तस-म्भावनाविपरीतभावनाव्युदासार्थः।

२६। पुराणस्य कवेः तस्य वर्णस्थानसमीरिता (अतएव) कृतसंस्कारा भारती चरितार्था बभूव एव।

२६। चरितः प्राप्तः अर्थः प्रयोजनं यया सा चरितार्था। वाच्यान्तरं,— वर्णस्थानसमीरितया कृतसंस्कारया भारत्या चरितार्थया बभूवे।

२६। तेन खलु भगवता [illegible] नारायणेन प्रयत्नेन उच्चारिता अतएव सा वाणी कृतार्था जाता। वर्णस्थानानि यथा,—'अष्टौ स्थानानि वर्णानाम् उरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च।' इति शिक्षाग्रन्थे। संस्कारः [illegible]। तत्र साधुत्वम् [illegible], स्पष्टत्वं च परिस्फुटेन स्वरेण उच्चारितत्वं, यदुक्तं—'तव [illegible] स्फुटैः स्वरैः' इति। [illegible] कण्ठादिव्यापारः, स च [illegible] द्विविधः, तत्र आभ्यन्तरप्रयत्नो वर्णोत्पत्तेः प्राक्, बाह्यश्च तदुत्पत्तेः पश्चात्। आदौ वेदस्य [illegible] भगवतः पुराणकवित्वम्, यथा,—'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।' अन्यच्च गीतायाम्,—'कविं पुराणम् अनुशासितारम्' इति।

[illegible]

৩৬। বাণী সেই পুরাণ কবির বদনস্থান সকল হইতে উচ্চারিত হইল বলিয়া সর্বথা পরিশুদ্ধ ও যথার্থ হইল।

36. Speech became in every respect pure and perfect when she was pronounced from the organs of speech of that Primeval Poet.

**बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता ।**
**निर्यातशेषा चरणात् गङ्गेवोर्द्धप्रवर्त्तिनी ॥३७॥**

३७। बभाविति । विभोः विष्णोः, वदनात् उद्गता निःसृता, सदशनज्योत्स्ना दन्तकान्तिसहिता, इदञ्च विशेषणं धावल्यातिशयार्थम्, अत एव सा भारती, चरणात् पादात्, निर्याता चासौ शेषा च निर्यातशेषा निःसृतावशिष्टा इत्यर्थः । स्त्रियाः पुंवदित्यनुवर्त्य पुंवत् कर्म्मधारयेति पुंवद्भावः । निर्यातशब्दस्य या निर्याता सावशेषा सा गङ्गेवेति सामानाधिकरण्यनिर्देशः, निर्यातायाः शेषेति विग्रहे पुंवद्भावः दुर्घट एव । ऊर्द्ध्वप्रवर्त्तिनी, ऊर्द्ध्ववाहिनी गङ्गा इव बभौ (१) इत्युक्तं स्यात् ।

३७। विभोः वदनोद्गता सदशनज्योत्स्ना सा (भारती) चरणात् निर्यातशेषा ऊर्द्ध्वप्रवर्त्तिनी गङ्गेव बभौ ।

३७। दशनानां दन्तानां ज्योत्स्नया प्रभया सह वर्त्तते इति सदशनज्योत्स्ना, ऊर्द्ध्वदेशे वर्त्तते इति ऊर्द्ध्वं प्रवर्त्तते इति ऊर्द्ध्ववर्त्तिनी । वाच्यान्तरम्—विभोः वदनोद्गतया सदशनज्योत्स्नया तया चरणात् निर्यातशेषया ऊर्द्ध्वप्रवर्त्तिन्या गङ्गया इव बभौ ।

३७। दन्तकान्तिसम्वलितात् [illegible] भूमिं परित्यज्य यदा सा वाणी भगवतो वदनात् उदगिरत, तदा सर्व्वे मन्यन्ते स्म, यत् तस्य पादाङ्गुष्ठात् निर्गताया गङ्गाया अवशिष्टांश एव अधुना ऊर्द्ध्वगामी भवतीति । [illegible]

[३७] (१) भा to shine,—भाति । अभात् । अभासीत् बभौ । भात., &c भावे—भायते । अभायि । &c

विष्णुपुराणे—'एतमेतत् पदं विष्णोस्तृतीयममलात्मकम्। आधारभूतं लोकानां त्रयाणां वृद्धिकारणं। ततः प्रवर्त्तते ब्रह्मन् सर्व्वपापहरा सरित्।...वामपादाम्बुजाङ्गुष्ठनखस्रोतोविनिर्गता'। इति। वाण्या गङ्गासाम्य शुभ्रत्वपवित्रत्वादिगुणयोगात्। अत्र उपमेयभूताया वाण्याः उपमानभूतया गङ्गया सह अभेदेन सम्भावना, तस्य उत्प्रेक्षालङ्कारः, स च इवशब्दयोगात् वाच्यः। यथा दर्पणे;— 'भवेत् सम्भावनोत्प्रेक्षा, प्रकृतस्य परात्मना। वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता। वाच्येवादिप्रयोगे स्यात्' इति। ज्योतिरस्त्यस्याः ज्योत्स्ना, ज्योत्स्नातमिस्रेत्यादिना ज्योतिष उपधालोपो न-प्रत्ययश्च निपात्यते। गच्छति प्रवाहरूपेण वहति इति गङ्गा, गमधातोः गन्प्रत्ययः।

৩৭। দশনপ্রভায় আলোকিত হইয়া সেই বাণী যখন প্রভুর বদন হইতে বিনির্গত হইল, তখন বোধ হইল, যেন চরণ হইতে পূর্ব্বে যে গঙ্গা নির্গমন করিয়াছিল তাহারই অবশিষ্ট ভাগ এখন উর্দ্ধে প্রবাহিত হইতেছে।

37. When that speech, illumined by the lustre of the teeth, issued from the mouth of the Lord, it seemed as if what remained of the stream of the Ganges, which had previously flowed from his foot, was now flowing upward.

**जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ।**
**अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ ॥३८॥**

३८। यदाह भगवान् तदाह, जाने इति। हे देवाः! वः युष्माकम्, अनुभाव-(१)-पराक्रमौ महिमपुरुषकारौ, रक्षसा (२) रावणेन, अङ्गिनां शरीरिणां प्रथममध्यमौ उभौ गुणौ सत्वरजसी तमसा इव तमोगुणेन इव, आक्रान्तौ जाने (३)। वाक्यार्थः स्पष्टः।

३८। वः अनुभावपराक्रमौ रक्षसा अङ्गिनां प्रथममध्यमौ उभौ गुणौ तमसा इव आक्रान्तौ जाने।

---

[३८] (१) अनु, भू to be, घञ् aff. (२) रक्ष to protect, असुन् aff. (३) ज्ञा to know,—जानाति-जानीते। अजानात्-अजानीत। अज्ञासीत्। अज्ञा-स्त। ज्ञात, &c.

३८। अनुभावश्च पराक्रमश्च तौ अनुभावपराक्रमौ। प्रथमश्च मध्यमश्च तौ प्रथममध्यमौ। वाच्यान्तरं—तम इव रक्षः आक्रान्तवत्, ज्ञायते (मया)।

३८। यथा हि तमोगुणो देहिनां सत्त्वरजसी अभिभूय तान् घोरे अज्ञानान्धकारे निमज्जयति, तथा रावणो युष्माकं तेजःपौरुषे अभिभूय युष्मान् घोरे शोकान्धकारे मज्जयन्, इत्यहं वेद्मि।

৩৮। তমোগুণ যেরূপ দেহিগণের সত্ত্ব ও রজোগুণকে অভিভূত করে, সেইরূপ রাক্ষস (রাবণ) তোমাদিগের তেজ ও পৌরুষ অভিভূত করিয়াছে, তাহা আমি জ্ঞাত আছি।

38 As the quality of darkness (तमस्) overcomes the qualities of activity (रजस्) and goodness (सत्त्व) in corporeal beings, so the demon (राक्षस) has overcome your majesty and might. I know that

## विदितं तप्यमानञ्च तेन मे भुवनत्रयम् ।
## अकामोपनतेनेव साधोर्हृदयमेनसा ॥३९॥

३९। विदितमिति। किञ्च, अकामेन अनिच्छया उपनतेन प्रमादात् आगतेन, एनसा पापेन, साधोः सज्जनस्य, हृदयम् इव, तेन रक्षसा तप्यमानं (१) सन्तप्यमानम्। तपेर्भौवादिकात् कर्मणि शानच्। भुवनत्रयं, मे विदितं मया ज्ञायते इत्यर्थः। मतिबुद्धीत्यादिना वर्त्तमाने क्तः, तस्य च वर्त्तमाने इति षष्ठी।

३९। च (किञ्च), अकामोपनतेन एनसा साधो हृदयमिव, तेन (रक्षसा) तप्यमानं भुवनत्रयं मे विदितम्।

३९। [illegible] इति वाच्यान्तरम्।

३९। [illegible]

[illegible]

---

[३९] (१) तप्—[illegible]। [illegible]। [illegible]। [illegible]। [illegible] [illegible] &c

[illegible]

[illegible]

[illegible]

[illegible]

39. As sins involuntarily committed, afflict the hearts of the virtuous, so that demon is afflicting the three worlds. I know that also.

कार्य्येषु चैककार्य्यत्वात् अभ्यर्थ्योऽस्मि न वज्रिणा।
स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ॥४०॥

४०। कार्य्येष्विति। किञ्च, एककार्य्यत्वात् आवयोः एक-कार्य्यकरत्वात् हेतोः, कार्य्येषु कर्त्तव्यार्थेषु विषये, वज्रिणा इन्द्रेण, अभ्यर्थ्यः इदं कुर्व्विति प्रार्थनीयः, न अस्मि। तथाहि, वातः (१) स्वयमेव अग्नेः (२) सारथ्यं (३) साहाय्यं, प्रतिपद्यते (४) प्राप्नोति, न तु वह्निप्रार्थनया इत्येवकारार्थः। प्रेक्षावतां स्वार्थेषु स्वत एव प्रवृत्तिः न तु परप्रार्थनया, स्वार्थश्चायं ममापि इत्यर्थः।

४०। च (किञ्च), एककार्य्यत्वात् कार्य्येषु वज्रिणा अभ्यर्थ्यः न अस्मि; हि (तथाहि), वातः स्वयमेव अग्नेः सारथ्यं प्रतिपद्यते।

४०। एकं कार्य्यं ययोः तौ एककार्य्यौ तयोः भावः एककार्य्यत्वं तस्मात्। वज्रम् अस्यास्तीति वज्री तेन। वाच्यान्तरे—अभ्यर्थ्येन (मया) न भूयते, वातेन सारथ्यं प्रतिपद्यते।

४०। दुष्कृतां विनाशेन लोकरक्षणं यथा इन्द्रस्य तथा ममापि कार्य्यम्, तदेव इन्द्रस्य प्रार्थनया अलम्। यथाहि पवनः स्वतः प्रवृत्त एव पावकस्य सहायी भवति, तथा अहमपि स्वतः प्रवृत्त एव तारकवधरूपे लोकहिते इन्द्रस्य सहायी

[४०] (१) वा to blow, क्त aff. (२) अग (इ) to go, नि aff, (३) सारथि helper, ष्यञ् aff. (४) प्रति, पद to go,—पद्यते। अपद्यत। अपादि। पेदे। पन्नः, &c.

भविष्यामि। 'समीरणो मोदयिता भवेति व्यादिश्यते केन हुताशनस्य' इति कुमारसम्भवे। विष्णुहितो विष्णोरिन्द्रानुजत्वम् ऋग्वेदेऽपि उक्तम्, यथा,— 'विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे, इन्द्रस्य युज्यः सखा' इति (ऋ०, म०,१,सू०,२२)।

৪০। কর্তব্য বিষয়ে আর ইন্দ্রকে আমার নিকট প্রার্থনা করিতে হইবে না, কারণ আমরা উভয়েই এক কার্যে নিযুক্ত, বায়ু স্বতঃপ্রবৃত্ত হইয়াই অগ্নির সহায়তা করিয়া থাকে।

40 It is not necessary for Indra (वज्री, lit. holding the thunderbolt, an epithet of Indra) to address prayers to me (concerning what should be done in this matter), for both of us are engaged in the same work Váta (wind), of his own motion, helps Agni (fire)

स्वासिधारापरिहृतः कामं चक्रस्य तेन मे।
स्थापितो दशमो मूर्द्धा लभ्यांश इव रक्षसा॥४१॥

४१। पुरा किल त्रिपुरारिप्रीणनाय स्वशिरांसि छिन्दता दशकन्धरेण दशमं शिरोऽवशेषितं तन्मच्चक्रार्पणार्थमिति। स्वासिधारया स्वखड्गधारया, परिहृतः वर्जितः अयं दशमः (१) मूर्द्धा, मे मम चक्रस्य कामं पर्याप्तः लभ्यांशः प्राप्यभाग इव, तेन रक्षसा स्थापितः (२)। तत् सर्वथा तमहं हनिष्यामि इत्यर्थः।

৪১। স্বাসিধারাপরিহৃত দশম মূর্দ্ধা [illegible]

৪১। [illegible]

---

[৪১] [illegible]
(১) [illegible]

४१। पुरा किल समरोत्साही दशाननो दशवर्षसहस्राणि दुष्करं तपश्चचार। ततश्च क्रमेण आत्मनः नव शिरांसि छित्त्वा अग्नौ जुहाव। अथ दशमं शिरः छेत्तुं प्रवृत्ते तस्मिन्, ब्रह्मा समागम्य वरदानेन तं दशमशिरश्छेदात् निवर्तयामास इति पूर्ववृत्तान्तम् अभिसन्धाय विष्णुरवोचत्, मदीय चक्रधारया छेत्तव्यम् इति स तदा आत्मनो दशमं शिरो न स्वयं चिच्छेद, इत्यहं सम्भावयामि। 'ममैव हस्ते रावणस्य विनाशो विधात्रा विहितः', इति भावः।

৪১। সেই রাবণ নিজ খড়্গধারায় স্বকীয় দশম মস্তকটি ছেদন না করিয়া তাহা বুঝি মদীয় চক্রধারার জন্য অংশ বলিয়া রাখিয়াছিল।

41. The demon (रावण) kept his tenth head unsevered by the sharp edge of his own sword, as it were, the portion due to my discus (चक्र).

स्रष्टुर्वरातिसर्गात् तु मया तस्य दुरात्मनः।
अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः ॥४२॥

४२। तर्हि किं प्रागुपेक्षितमत आह, स्रष्टुरिति। किन्तु स्रष्टुः ब्रह्मणः, वरातिसर्गात् वरदानात् हेतोः, मया तस्य दुरात्मनः रिपोः रावणस्य, अत्यारूढम् अत्यारोहणम् अतिवृद्धिः इत्यर्थः। नपुंसके भावे क्तः। भोगिनः सर्पस्य, अत्यारूढं चन्दनेन(१) इव, सोढम्(२)। चन्दनस्यापि तथा सहनं स्रष्टुर्नियतेरिति द्रष्टव्यम्।

४२। तु स्रष्टुः वरातिसर्गात्, मया तस्य, दुरात्मनः रिपोः अत्यारूढं भोगिनः (अत्यारूढं) चन्दनेन इव सोढम्।

४२। वरस्य अतिसर्गः तस्मात्। दुष्टः आत्मा यस्य सः तस्य दुरात्मनः। वाच्यान्तर—चन्दनः भोगिन इव अहं तस्य अत्यारूढं सोढवान्।

४२। यथा हि चन्दनतरुः विधिविधानादेव भीषणभुजगवेष्टनं सहते, तदहं विधातृवरदानादेव त्रिभुवनभयकारिणो रावणस्य अत्याचारम् एतावन्तं कालं सोढ

[४२] (१) चदि to please, (णिच), ल्युट्, (चन्दयति आह्लादयति इति चन्दनः). (२) सह to bear, क्त aff.—सहते। असहत। असहिष्ट। सेहे। &c

याम् । किं करोमि 'विधिदत्ती वरवान् इति मे मतिः' इति भावः । पक्षान्तरे, राक्षसपक्षे लोकक्लिशनमहत्वं, चन्दनपक्षे काष्ठायपर्यन्तमारोहणम् ।

৪২। চন্দনবৃক্ষ যেরূপ সর্পের পীড়ন সহ্য করে, সেইরূপ আমিও যে সেই দুরাত্মা রাক্ষসের অত্যাচার সহ্য করিয়াছি সে কেবল বিধাতা (ব্রহ্মা) বর দিয়াছেন বলিয়াই।

42. I have endured the arrogant excesses of that wicked monster, in the same way as the sandal tree endures the mischievous pranks of serpent, because the Creator (ब्रह्मा) has granted him boons (special favours)

**धातारं तपसा प्रीतं ययाचे स हि राक्षसः ।**
**दैवात् सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ॥४३॥**

४३ । सम्प्रति वरमाह, धातारमिति । स राक्षसः, तपसा प्रीतं सन्तुष्टं, धातारं (१) ब्रह्माणं, मर्त्येषु (२) विषये, आस्थापराङ्मुखः आदरविमुखः सन् मर्त्यानविगणय्य इत्यर्थः, दैवात् (३) सर्गात् (४) अष्टविधायाः देवसृष्टेः, अवध्यत्वं ययाचे (५) हि ।

৪৩। সে রাক্ষস, তপস্যা প্রীত ধাতাকে মর্ত্যেষু আস্থাপরাঙ্মুখ (হইয়া) দৈবাৎ সর্গাৎ অবধ্যত্ব যাচিয়াছিল।

४३ । [illegible]

४३ । [illegible]

[४३। (१) [illegible] to [illegible] &c]

८३। तमिति। हरसूनुसन्निभः स्कन्दसमः, कृपामृदुः राघवः,

[illegible] तं भार्गवं, [illegible]
सन्धितम् (१) अमोघम् आशुगं (२) बाणं च वीक्ष्य, [illegible]
बभाषे।

८३। [illegible]
[illegible]

[illegible]

[illegible]

८३। [illegible]

83 The kind-hearted Râma who resembled the son of Hara (हरसूनु i. e. कार्त्तिकेय), finding Bhârgava shorn of his energy, and his own infallible arrow fixed to the bow, thus addressed.

न प्रहर्तुमलमस्मि निर्दयं
विप्र इत्यभिभवत्यपि त्वयि ।
शंस किं गतिमनेन पत्रिणा
हन्मि लोकमुत ते मखार्जितम् ॥८४॥

---

[८३] (१) सम्, धा to hold, क्त aff. (२) आशु swiftly, गम्, to go, ड aff. (आशु शीघ्रं गच्छति, गमेः ड).

८४। नेति। अभिभवति (१) अपि त्वयि,— विप्र इति हेतोः, निर्दयं प्रहर्तुम् अलं न अस्मि, किन्तु, अनेन पत्रिणा शरेण, ते गतिं गमनं हन्मि (२) उत मखार्जितं लोकं स्वर्गं, हन्मि, शंस (३) ब्रूहि।

८४। अभिभवति अपि त्वयि विप्र इति हेतोः निर्दयं प्रहर्तुम् अलं न अस्मि, अनेन पत्रिणा शरेण ते गतिं हन्मि, उत मखार्जितं लोकं हन्मि, शंस। वाच्यान्तर — (मया) अलम् न भूयते, ते गतिः उत मखार्जितो लोक (मया) हन्यते, (त्वया) शस्यताम्। इति।

८४। [illegible]

८४। [illegible]

84. Though you have sought to overcome me, yet as you are a Brâhmana, I cannot strike you [illegible] say [illegible] destroy your power of locomotion or the world [illegible] you have earned for yourself by your sacrifices.

[८४] [illegible]

प्रत्युवाच तमृषिर्न तत्त्वतः
त्वां न वेद्मि पुरुषं पुरातनम्।
गां गतस्य तव धाम वैष्णवं
कोपितो ह्यसि मया दिदृक्षुणा ॥ ८५ ॥

८५। प्रतीति। ऋषिः भार्गवः, तं रामं प्रत्युवाच। किमिति? तत्त्वतः (१) स्वरूपतः, त्वां पुरातनं (२) पुरुषं पुराणपुरुषं, न वेद्मि इति न, किन्तु वेद्मीव इत्यर्थः; किन्तु गां गतस्य भुवमवतीर्णस्य, तव वैष्णवं धाम (३) तेजः, दिदृक्षुणा (४) द्रष्टुमिच्छुना मया, कोपित (५) हि असि।

८५। ऋषि, तं प्रत्युवाच, त्वां पुरातनं पुरुषं तत्त्वतः न वेद्मि (इति) न, गां गतस्य तव वैष्णवं धाम दिदृक्षुणा मया कोपितः हि असि। वाच्यान्तरं—ऋषिणा स प्रत्यूचे, त्वं पुरातनः पुरुषः (मया) न विद्यसे (इति) न,...दिदृक्षु णा (त्वं) कोपितवान् असि। इति।

८५। भार्गवो राघवमिदं प्रत्यवदत्,—त्वं यस्तुतः परमपुरुषोऽसीति जानाम्येव, किन्तु अधुना पृथिवीमवतीर्णे मानवभावमापन्ने त्वयि स किल मानवदुर्लभो भगवत्स्वभाव सर्वथा विद्यते न वेति परीक्षायै मे मनसि महान् कुतूहलो जातः, अतएव त्वं मया जानतैव क्रोधं गमितोऽसि। तव तत्त्वं जानतापि मया कुतूहलादिदं कृतम्, अतः क्षमस्व मेऽपराधं, इत्यभिप्रायः। 'न वेद्मि न'—अत्र निषेधार्थौ द्वौ नञ्शब्दौ वेद्मि एव इति स्वीकाररूपार्थं गमयतः।

८५। মহর্ষি ভার্গব তাঁহাকে উত্তর দিলেন যে, আপনি পুরাণ পুরুষ, আমি আপনাকে প্রকৃতরূপে জানি না এমন নহে, আপনি মর্ত্ত্যে অবতীর্ণ হইয়াছেন, আমি আপনার বৈষ্ণব তেজ পরীক্ষা করিবার মানসেই আপনাকে কুপিত করিয়াছি।

[८५] (१) तत्त्व truth, तसि aff. (२) पुरा, old, ट्यु aff. (३) धा to hold, मनिन् aff. (४) दृश् to see, सन् (desiderative form) उ aff. (५) कुप् to be angry, (णिच्) क्त aff.

भस्मसात् कृतवतः पितृद्विषः
पात्रसाच्च वसुधां ससागराम् ।
आहितो जयविपर्ययोऽपि मे
श्लाघ्य एव परमेष्ठिना त्वया ॥ ८६ ॥

८६ । भस्मसादिति । [illegible] (१) [illegible] जयविपर्ययः (२) पराजयोऽपि, श्लाघ्यः (३) [illegible] एव ।

८६ । [illegible]

८६ । [illegible]

८६ । [illegible]

[८६] (१) वसु wealth, धा to hold, क and टाप् affs. (२) वि, परि, *implying reverse*, अच् aff. (३) श्लाघ praise, यत् aff.

[illegible]

[illegible]

86. I, who have reduced to ashes the enemies of my father and made an absolute gift of the sea-girt earth to a pi[illegible] person, deem this defeat by thee, the Supreme Deity, as a gl[illegible]

तद्गतिं मतिमतां वरेप्सितां
पुण्यतीर्थगमनाय रक्ष मे ।
पीडयिष्यति न मां खिलीकृता
स्वर्गपद्धतिरभोगलोलुपम् ॥ ८७ ॥

८७। तदिति। तत् तस्मात् कारणात्, हे मतिमतां वर, पुण्यतीर्थ-(१)-गमनाय आप्तुमिष्टाम् ईप्सितां(२) मे गतिं रक्ष पालय, किन्तु खिलीकृता (३) दुर्गमीकृतापि, स्वर्गपद्धतिः अभोगलोलुपं भोगनिस्पृहं मां न पीडयिष्यति (४), अतस्तामेव जहीत्यर्थः।

[८७] (१) पू to purify, यत् aff. धुक् augment (पू धातो. यत् [illegible] इस्वश्च धातो., पुण्यम्), and तॄ to cross, थक् aff. (तीर्थम्) (२) आप् to have, (सन्) क्त aff. (३) खिल unploughed land, च्वि aff.

८७। मतिमतां वर। तत् पुण्यतीर्थगमनाय रक्षितां मे गतिं रक्ष, खिलीकृतापि स्वर्गपद्धतिः अभोगलोलुपं मां न पीडयिष्यति।

८७। मतिः प्रज्ञा बुद्धिः विद्यते एषामिति मतिमन्तः तेषाम्। पुण्यानि तीर्थानि तेषु गमनं तस्मै। अखिला खिला सम्पद्यमाना कृता खिलीकृता। स्वर्गस्य पद्धतिः। भोगे लोलुपः, स न भवतीति अभोगलोलुपः, तम्। व्याख्यान्तर— यथा रक्षिता मे गतिः रक्ष्यताम्, अभोगलोलुपोऽहं खिलीकृतया स्वर्गपद्धत्या न पीडयिष्ये। इति।

८७। हे मतिमतां श्रेष्ठ! यथा अहं पुण्यतीर्थं गन्तुं शक्नुयां मे तां गतिमक्षि रक्ष, कृते मे स्वर्गलोके, नाहं सर्वदा किञ्चिदपि दुःखमनुभविष्यामि, यतः ऊर्ध्वलोकनिवासजं सुखमर्थं कि वा सुखसाधनैः स्वर्गेण प्रयोजनम्। 'तद्गतिम्' इत्यस्य पुनरुत्पत्तौ वा प्राप्तवान् अति महात्म नाम। यत असिद्धत्वात् आकाशादिगमनप्रत्यपात्। अथ पुण्यतीर्थं महेन्द्रपर्वतस्य मे यम्। पुरा किल काम-दत्वा काश्यपाय महीं दत्त्वा पृथिव्यां रात्रौ न वसामीति प्रतिज्ञातवान्। ततः प्रभृति काश्यपस्य महीं प्र च दत्त्वा महेन्द्र पर्वते वसति स। 'खिलीकृता खिल-प्रहत स्थानम्' इत्यमरः। अप्रहत दुर्गमत्वादिना असमर्थाररोहितमित्यर्थ। अभुक्ततदाद्यं खिलमत्र।

৮৭। অতএব হে মতিমান্‌দের শ্রেষ্ঠ! পুণ্যতীর্থে গমনার্থ আমার গতিটি পরিরক্ষিত হউক রক্ষা করুন, স্বর্গপথ রুদ্ধ হইলেও আমার মনঃপীড়া হইবে না, কারণ আমি ভোগসুখের জন্য লোলুপ নহি।

87. Therefore, O thou, the best of the intelligent, spare my power of locomotion that I may visit the sacred places of pilgrimage, if my passage to heaven be closed, I shall not feel afflicted, because I have no reliso for enjoyment

प्रत्यपद्यत तथेति राघवः

प्राङ्मुखश्च विससर्ज्ज सायकम्।

---

कृ to do, क्त aff. (४) पीड़ to pain,—पीड़यति। अपीड़यत्। अपीपिड़त्-अपिपीड़त्। पीड़यामास, &c अपि,—पीड्यते। अपीड़ि। &c पीड़ित, &c

भार्गवस्य सुकृतोऽपि सोऽभवत्
स्वर्गमार्गपरिघो दुरत्ययः ॥ ८८ ॥

८८। प्रत्यपद्यतेति। राघवः, तथेति प्रत्यपद्यत अङ्गीकृतवा प्राङ्मुखः इन्द्रदिङ्मुखः, सायकं (१) विससर्ज्ज च। सः सायव सुकृतोऽपि साधुकारिणोऽपि। करोतेः क्विप्। भार्गवस्य दुरत्यय दुरतिक्रमः, स्वर्गमार्गस्य परिघः (२) प्रतिबन्धः अभवत्।

८८। राघव, तथेति प्रत्यपद्यत प्राङ्मुख सायकं विससर्ज च, स (साय सुकृत, अपि भार्गवस्य दुरत्यय, स्वर्गमार्गपरिघः अभवत्।

८८। प्राक् मुखं यस्य सः प्राङ्मुख पूर्व्वास्यः। सु साधु करोतीति सु कृत्। दुष्करः अत्ययः, अभावो यस्य स दुरत्ययः। व्याख्यान्तर—राघवेण तथे प्रत्यपद्यत, प्राङ्मुखेन सायकः, विससृजे च, तेन दुरत्ययेन स्वर्गमार्गपरिघेण भ यत। इति।

८८। तथा करोमीति भार्गववचनं प्रतिश्रुत्य राम, पूर्व्वाभिमुखं सन् बा चिक्षेप, स च बाणः स्वर्गगमनयोग्योऽपि भार्गवस्य स्वर्गगमनस्य दुर्निवारः प्र बन्धो अभूत। तस्य स्वर्गसाधन पुण्यं निरासकार इति भाव। मेरौ पूर्व्वद इन्द्रादिविहित, स्वर्गो तिष्ठति, अतएव 'प्राङ्मुख' इत्यनेन रामस्य स्वर्गाभिमुख गम्यते।

৮৮। রাম তথাস্তু বলিয়া স্বীকার করিলেন, এবং পূর্ব্বমুখ হইয়া শরক্ষেপ করিলে ভার্গব পুণ্যবলসম্পন্ন হইলেও সেই শর তাঁহার স্বর্গমার্গের দুর্নিবার প্রতিবন্ধক হইল

88. Ráma expressed his consent by saying,—be it so, a turning eastward darted his arrow; that arrow became an i surmountable obstacle to Bhárgava's passage to heaven, thou he was possessed of merits.

राघवोऽपि चरणौ तपोनिधेः
क्षम्यतामिति वदन् समस्पृशत्।

[८८] (१) सो to destroy, घञ् aff. (२) परि, हन् to kill, अ aff.

निर्ज्जितेषु तरसा तरस्विनां

शत्रुषु प्रणतिरेव कीर्त्तये ॥ ८९ ॥

८९। राघव इति। राघवः अपि क्षम्यताम् (१) इति वदन् तपोनिधेः भार्गवस्य चरणौ समस्पृशत् प्रणनाम। तथाहि, तरस्विनां (२) बलवतां, तरसा बलेन, निर्ज्जितेषु शत्रुषु, प्रणतिः एव कीर्त्तये भवति इति शेषः।

८९। राघव अपि क्षम्यताम् इति वदन् तपोनिधेः चरणौ समस्पृशत्, तरस्विनां तरसा निर्ज्जितेषु शत्रुषु प्रणतिः एव कीर्त्तये (भवति)। वाच्यान्तर— राघवेणापि क्षम्यतामिति वदता चरणौ समस्पृश्येताम्,...प्रणत्या कीर्त्तये (भूयते)। इति।

८९। रामोऽपि क्षमस्व मा प्रभो इति कथयन् तपोधनसमन्वितं भार्गवं प्रणनाम। उचितमेव एतत् लोकोत्तरविनयशालिनो रामस्य, यतो बलनिर्ज्जितेषु शत्रुषु प्रणामप्रदर्शनमेव विजयिनां कीर्त्तिकरं भवति। 'तपोनिधि' इत्यनेन भार्गवस्य पूजनीयत्वम् उक्तम्।

৮৯। রামও 'ক্ষমা করুন' এই বলিয়া তপোনিধির চরণে প্রণত হইলেন, কারণ, পরাজিত শত্রুগণের নিকট নত হওয়াই বীরপুরুষগণের প্রশংসার কথা।

89 Ráma also touched the feet of the ascetic, asking forgiveness, humility on the part of the powerful towards fallen (तरसा निर्ज्जितेषु lit. vanquished by power) foes, redounds to their glory.

राजसत्त्वमवधूय मातृकं

पित्र्यमस्मि गमितः शमं यदा।

---

[८९] (१) क्षम् to pardon, क्षमते,—क्षम्यते। चक्षमे-क्षमिता। क्षमिष्यते। &c. कर्मणि,—क्षम्यते। अक्षमिष्ट। क्षमिष्यते-क्षंस्यते। क्षमताम् &c. (दिवादि) क्षाम्यति। चक्षाम। क्षमिता-क्षन्ता। क्षाम्यतु। &c. क्षान्तः, &c. (२) तरस् strength, विनि aff.

नन्वनिन्दितफलो मम त्वया
निग्रहोऽप्ययमनुग्रहीकृतः॥ ९०॥

९०। राजसत्वमिति। मातुरागतं मातृकं राजसत्वं (१) रजोगुणप्रधानत्वम्, अवधूय, पितुरागतं पित्र्यं, शमं यदा गमितः अस्मि तदा त्वया मम अपेक्षितत्वात् अनिन्दितम् अगर्हितं फलं स्वर्गप्राप्तिलक्षणं यस्य सः, अयं निग्रहः अपकारः अपि, अनुग्रहीकृतः (२) ननु उपकारीकृतः खलु।

९०। मातृकं राजसत्वम् अवधूय यदा (अहं) पित्र्यं शमं गमितः अस्मि (तदा) त्वया, अनिन्दितफलः अयं निग्रहः अपि अनुग्रहीकृतः ननु। वाच्यान्तर—(त्वं) यदा (मां) गमितवान् असि, अनिन्दितफलम् इमं निग्रहम् अनुग्रहीकृतवान्। इति।

९०। यतोऽहम् अद्य भवतैव निग्रहेण मातृकुलागतं तीव्रस्वभावं विहाय पितृकुलोचितं प्रशमं मानितः प्रापितोऽस्मि, ततः त्वत्कृतम् इमं निग्रहमपि महोपकारकम् अनुग्रहं मन्यामि। 'सत्कृत्यानि निग्रहान्यपि तारयन्ति' इति भावः। 'मातृकं' जननीकुलोचितम् इत्यर्थः। 'राजसत्व'—रजः प्रधानम् यस्य इति राजसो रजोगुणप्रधान स्वभावः, तस्य धर्मः राजसत्वं, कामक्रोधादिप्राबल्यम् इत्यर्थः। रजोगुणप्रधाने हि स्वभावे कामक्रोधादयो मूर्च्छन्ति। यथा कश्चित् धूलिविकलदृष्टिः मनुष्यः मार्गम् अपश्यन् अपथे पदमर्पयति, तथा रजोगुणाभिभूतोऽपि विवेकमूढः अकार्यमनुवर्तते। उक्तञ्च नवमे सर्गे,—'अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः' इति। सर्वे वा त्रिगुणात्मकत्वेऽपि क्वचित् कस्यचित् गुणस्य भूयस्त्वं दृश्यते। यद्वा, 'राजसत्व' राज्ञः क्षत्रियस्य सत्वं स्वभावः गुणो वा, 'सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः' इति विश्वः। क्षत्रियोचिततेजःप्रतापादिगुणः, 'अमर्षणस्वभावो वा राजसत्वं' तत् अवधूय इति

[९०] (१) रजस् passion, &c अण् and त्व affix. (२) अनुग्रह favour, च्वि aff. कृ to do, क्त aff.

ম্যাখ্যানমপি সঙ্গচ্ছতে। 'মম' ইতি সত্ত্বগুণপ্রধানত্বমিতি যাবৎ। সত্ত্বগুণপ্রধানা হি ব্রাহ্মণা ব্রাহ্মণাঃ, রজোগুণপ্রধানাস্ত ক্ষত্রিয়াঃ।

৯০। আপনি যখন আমার মাতৃকুলোচিত রাজসিক ভাব দূর করিয়া আমাকে পিতৃকুলোচিত শান্তিপথে স্থাপিত করিলেন, তখন আমার প্রতি নিগ্রহ করিয়াও অনুগ্রহ প্রকাশ করিলেন, কেন না, এই নিগ্রহের পরিণাম নিন্দিত নহে।

90. When thou hast converted the furious nature I inherited from my mother's side, into the peaceful disposition inherent in my father's, even this punishment inflicted by thee is on account of its happy result, an act of favor.

साधयाम्यहमविघ्नमस्तु ते
देवकार्य्यमुपपादयिष्यतः ।
ऊचिवानिति वचः सलक्ष्मणं
लक्ष्मणाग्रजमृषिस्तिरोदधे ॥ ९१ ॥

৯১। সাধয়ামীতি। অহং সাধয়ামি (১) গচ্ছামি, দেবকার্য্যম্ উপপাদয়িষ্যতঃ (২) সম্পাদয়িষ্যতঃ, তে অবিঘ্নম্ অস্তু বিঘ্নাভাবঃ অস্তু। অর্থাভাবে অব্যয়ীভাবঃ। সহ লক্ষ্মণেন সলক্ষ্মণঃ তম্। তেন সহেতি তুল্যযোগে ইতি বহুব্রীহিঃ। লক্ষ্মণাগ্রজং রামম্, ইতি বচঃ ঊচিবান্ উক্তবান্। ঋষিঃ [illegible] তিরোদধে অন্তর্দধে।

৯১। অহং সাধয়ামি, দেবকার্য্যম্ উপপাদয়িষ্যতঃ তে অবিঘ্নম্ অস্তু, ইতি বচঃ সলক্ষ্মণং লক্ষ্মণাগ্রজম্ ঊচিবান্ ঋষিঃ তিরোদধে। বাচ্যান্তর—ময়া সাধ্যতে, ইত্যাদি ঋষিণা ঊচিবতা ... ইতি বচঃ ... তিরোদধে। ইতি।

[৯১] (১) সাধ, to accomplish, (ণিচ্) সাধয়তি। সাধয়তে। অসীষধৎ। সাধয়াঞ্চকার &c. সাধন, &c. (২) পদ, পদ to go, (ণিচ্) [illegible] ১০৪

उपकार्यां (३) रचितम् वा तद्गृहम् अपि, कृतविरुद् रश्मिभिः (४
रावी:, तमसितत्वा, गौधिर्भिरलंकृतान् चतुर्भागां, कोपदैः कुण्डलं
चैवा, शतायामानि सुमनविता। सदर्थ वस्त्रानं तारकार्तिन स
इति प्रथम् प्रत्ययः। सुरवनिताः तनाया (५) दला तो, पुर
मदीयान् (६) कविद्वन् परिष्यताम्।

२१। अथ प्रथमतः पर्विपाल सुरसवितार्थे इति कर्तिकृ सर्व
समर्पिता मेदिनोदरमेदनाम् चतुराया संघते, सुरवर्तितराम् कोष
पुरम् गतिम्।

२१। पतङ्गोति दर्शन, 'दिवाविद्यायेन' इति दर्शनवशात् शिवम् ति
मेदिन्याः दर्शन मात्राम्। सकलानि चतुर्वि वासाम् इति चतुर्णा, चतुर
क्रमाय इति मतम्। वाक्यान्तर—प्रथमपर्व पर्विदानेन...इत्यादि
महात्मा चयोत्था पु, पतिमन। इति।

२२। अनन्तरं त्रिभुवनी राजा दशरथः पतिसुग्रीवसमदेवजनमपि वर्तित
रजनीः पतिताद्र निमराजभवनी प्रविवेश, तदा च मालवीक्षणीतसुधा इत्
कामिनीनां विकचनीलकमलमञ्जरीरिव विस्फारितनीलनयनमदी कवीभ
प्रासादवातायनानि समभाव सहर्षमरे। "उपनाया," राजोद्यानि दशरथ
रीति, 'सौधोद्यो राजमदनमुपकार्योपकारिका' इत्यमरवचनमाध्याने चौर
स्थामो, उपक्रियते उपकरोति च पटमण्डपादि राजसदनमिति। कृ मा रात्र
कामार्थं स्थानि, स्थानि विरचिता, रचा: शोभनाः उपकार्याः पटमण्डपादीन
यस्मिन् सः। 'मणिकल्पः' त्रिभुवन, ईश्वरवत् तस्य चतुरानुद्धेशारितवा कार्यमेत
महदरामसनकतया च ईश्वरकल्पत्वम्। रामस्य स्कन्दगुप्तत्वबोध मातीव "स-
सुरसन्निभ." इत्यनेन। वस्तुतस्तु पतुग्रामानुरीचादित्र प्रणयकल्प रघुनन्द।'सौधने'

[२२] (१) अवनि earth, पाल to protect, अण् aff. (२) कृप् to be able, क्त aff. (३) उप, कृ to do, ण्यत् and टाप् affs (४) स्तृ to injure, अरच् aff. ङीप् fem. aff. (५) गो rays, अचि pore, अच् aff (वर्गा किरणानाम् अक्षीव, गवाक्षमक्षीव रश्मयाची। अच्प्रत्यय.) (६) अ neg युध् to fight, यत् and टाप् affs।)

धान्येन धनवान् इतिवत् अभेदे तृतीया, लोचनान्येव कुवलयानि इत्यर्थः ।
निमग्नत्वात् साक्षात् लक्ष्मीरिव सीता, अत: तस्याः दर्शनार्थं पुरसुन्दरीणामौत्-
ातिशयो वर्णितः । अनुरूपः श्लोको यथा सप्तमे सर्गे—'तासां मुखैरासव-
र्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् । विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्रा-
णा इवासन्' । इति ।

৯৩। অনন্তর শিবতুল্য অবনীপাল, পথে সুসজ্জিত রম্য পটমণ্ডপে কতিপয়
ী অতিবাহিত করিয়া অযোধ্যায় আসিয়া প্রবেশ করিলেন। জানকীর দর্শনার্থিনী
ীদিগের নয়নপাতে বোধ হইল যেন অযোধ্যার গবাক্ষমালায় নব নব নীলপদ্ম
য়াছে।

93. The ruler of the earth (दशरथ), almost like S'arva
हादेव), after passing a few nights on the road provided with
lendid royal tents, entered the city of Ayodhyá, whose win-
ws appeared as if adorned with blue lotuses by the eyes of
e maidens anxious to see Maithilí (सीता).

---

## NOTES.

### CANTO XI.

St 9 —'तौ बलातिबलयो, प्रभावत.' &c. The sage Viśwámitra taught Ráma the use of the two mystical charms 'बला' and 'अतिबला.' These are said to be the 'daughters of Brahmá and the mothers of all knowledge' He who mutters them, is never afflicted with hunger, thirst, fatigue, disease, age, or change, &c. Demons can not assail him even in his sleep, he becomes unrivalled in the three worlds for strength of arms, prosperity, magnanimity, wisdom, and judgment It is said, that Ráma having obtained these two charms, shone like the glorious autumnal sun. 'मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा । न श्रमो न ज्वरो वा ते न रूपस्य विपर्ययः । न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः । न बाह्वोः सदृशो वीर्ये पृथिव्यामस्ति कश्चन । त्रिषु लोकेषु वा राम न भवेत् सदृशस्तव । बलामतिबलां चैव पठतस्तात राघव । न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये । नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ । एतद्विद्याद्वये लब्धे न भवेत् सदृशस्तव । बला चातिबला चैव सर्वज्ञानस्य मातरौ । क्षुत्पिपासे न ते राम भविष्येते नरोत्तम । बलामतिबलां चैव पठतः पथि राघव । विद्याद्वयमधीयाने यशश्चाथ भवेद्भुवि । पितामहसुते ह्येते विद्ये तेजःसमन्विते ।...विद्यासमुदितो राम शुशुभे भीमविक्रम । सहस्ररश्मिर्भगवान् शरदीव दिवाकरः' । &c (See रामायण, बालकाण्ड, २२ सर्ग)

St 13 —'स्थाणुदग्धवपुषस्तपोवनम्'. The hermitage of Ananga or Káma According to the Rámáyan'a, it was near the confluence of the rivers Sarayu' and Gangá Here Káma disturbed the devotions of Stháṇ'u (स्थाणु or शिव), and the angry god reduced him to ashes by fire from his eye This place is also

called Anga, because the *Anga* or body of Káma was [illegible] here. [illegible]

(रामायण, बालकाण्ड, [illegible]

St. 18.—[illegible] &c. Taḍaká [illegible] was the lady of the Yaksha king [illegible], wife of Sunda [illegible], and [illegible] of Márícha ([illegible]). She was changed into [illegible] the sage Agastya, wh[illegible] dev[illegible] she d[illegible]. [illegible] In a jungle bearing her name, opposite to the junction of the Sarayú and the Gangá, and ravaged all the country [illegible]

[illegible] &c. See (रामा[illegible], बालकाण्ड, [illegible]

St. 21.—[illegible] &c. This alludes to the [illegible] weapons endowed with divine en[illegible] which Ráma [illegible] from the sage Viśwámitra after k[illegible]ling Taḍaká. These [illegible] presented as the 'sons of Kriśáśw[illegible]' [illegible] assuming any form at their will' ([illegible]), and [illegible] Bhavabhúti they are all described as [illegible] in the *Uttarakáṇḍa* [illegible] called by the name Jrimbhaka (जृम्भक). [illegible] of Jṛimbhaka [illegible] weapon of that name in the list of weap[illegible] there is only [illegible] mentioned in the

Rámáyan'a. Ráma also learned from the sage, the mystical charms (मन्त्र or रहस्य) that are required for their use. परिगृहीतोऽसि भद्रं ते राजपुत्र महायशः। प्रीत्या परमया युक्तो ददाम्यस्त्राणि सर्वशः। देवासुरगणान् वापि सगन्धर्वोरगान् युधि। यैरमित्रान् प्रसह्याजौ वशीकृत्य जयिष्यसि।...कमाक्षतमयान् राम भास्वरान् कामरूपिणः। प्रतीच्छ मम भद्रं ते पात्रभूतोऽसि राघव॥ &c. (See रामायण, बालकाण्ड, 27th and 28th सर्ग).

St. 22.—'वामनाश्रमपदम्' &c. The hermitage of Va'mana or the dwarf incarnation of Vishn'u. In ancient times before Vishn'u became incarnate as the Vámana, this was his hermitage, and here he practised austerities for many thousand years, as an example to others. When Vishn'u was thus engaged, Bali, the mighty king of the Daityas acquired the dominion of the three worlds, deprived the gods of their power and dignity, and commenced a great sacrifice. The gods came to this hermitage and prayed to Vishn'u for succour. Vishn'u accordingly, appeared on earth, in the shape of a dwarf (वामन) son of Kaśyapa. The dwarf went to the abode of Bali, and begged of him as much space as he could step over in three paces. Bali granted his request. Then Vishn'u dilating himself enormously took heaven and earth in two paces, and for the third placed his foot on the head of Bali, and sent him and all his people to the realms below the earth (पाताल). 'इह राम महाबाहो विष्णुर्देवनमस्कृतः। वर्षाणि सुबहूनीह तथा युगशतानि च। तपश्चरणयोगार्थमुवास सुमहातपाः॥ एष पूर्वाश्रमो राम वामनस्य महात्मनः। सिद्धाश्रम इति ख्यातः सिद्धो यत्र महातपाः'॥ &c. (See रामायण, बालकाण्ड, २८ सर्ग).

St. 23.—'आश्रमाद् मुनिरात्मनश्च' &c. विश्वामित्रदोषेण—According to the Adhyátma Rámáyan'a the hermitage of Viśwámitra was situated on the site of the modern town of Buxar, which is situated in the district of Shahabad. The distance from the

site of the city of Ayodhyá, near Fyzabad, to the junction of the Sarayu' (Gogra) and the Ganges, is about a hundred and seventy miles. From the junction of the two rivers to the modern town of Buxar, the distance is rather more than forty miles in a retrograde direction from east to west along the southern bank of the Ganges.' &c. (See Wheeler's History of India, Vol. II, page 41, foot-note.)

St. 29.—'[illegible]' &c. Ma'richa, the son of Ta'daka' the daughter of the Yaksha king Suketu, was changed into a Ra'kshasa by the curse of Agastya. He also tried to defile the sacrifice of Viswa'mitra, but was prevented by Ra'ma, who cast him over a long distance into the sea with a weapon. 'मानवं परमोदारमस्त्रं परमभास्वरम्। चिक्षेप परमक्रुद्धो मारीचोरसि राघवः॥ स तेन परमास्त्रेण मानवेन समाहतः। सम्पूर्णं योजनशतं क्षिप्तः सागरसम्प्लवे॥' &c. (See रामायण, बालकाण्ड, ३० सर्ग)

According to the Ra'ma'yan'a quoted above, the weapon with which Ma'richa was struck, was the मानव weapon and not the वायव्य ('वायुदैवतम्') as stated by Kálidása The poet here apparently followed Vishn'upuran'a, which says that, 'Ráma at the sacrifice, hurled to a distance मारीच, struck by the blast of his shaft.' 'यज्ञे च मारीचमिषुवाताहतं दूरं चिक्षेप' &c. (See विष्णुपुराण).

St. 32.—'मिथिलां नगम्' &c. Mithilá.—'A city, the capital of Videha or North Behar, which corresponds to the modern Tirhut and Purniya, between the Gandakí and Kosí rivers. It was the country of Janaka, and the name of his capital 'Janakpur," still survives on the northern frontier.'

Sts. 33 & 34.—'तेषु दीर्घतपसः परिग्रहः' &c. 'प्राह गौतमवधूः शिलामयी' &c. Ahalyá (अहल्या) the daughter of Brahmá, was the wife of Dírghatapa'h (an epithet of the sage Gautama-गौतम). On one Occasion, Indra enchanted by her beauty, assumed her

husband's from, and seduced her in his absence. It is stated, that Ahalya' knowing the god in disguise in the wantonness of her heart yielded to his desires. Gautama returning from his ablution, beheld the profligate god in his disguise running away in haste. He understood in a moment, what had happened and thus cursed him in words of dreadful anger :—'O depraved wretch, assuming my form you have perpetrated this great crime! Therefore from this moment do you become a eunuch! The sage then pronounced this curse upon his wife.—'Sinful wretch, for thousands of years shall you remain in this forest, without any food, living only on air, resting on bed of ashes, abandoned by all, and invisible to all, suffering bitter remorse, until Ráma, the son of Daśaratha, shall come here, by *whose favour you shall be cleansed from all sin,'* &c. 'तथा शप्त्वा च वै शक्रं भार्यामपि च शप्तवान्। इह वर्षसहस्राणि बहूनि निवसिष्यसि। वायुभक्षा निराहारा तप्यन्ती भस्मशायिनी। अदृश्या सर्वभूतानामाश्रमेऽस्मिन् निवसिष्यसि॥ यदैतच्च वनं घोरं रामो दशरथात्मजः। आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि" ॥ &c (See रामायण, बालकाण्ड, ४८ सर्ग).

According to the Ra'ma yan'a quoted above, no allusion is made to Ahalyá's being turned into a stone as described by our poet, who must have followed Padmapura'na in making such an allusion. 'शापदग्धा पुरा भर्त्रा राम ! गौतमतापस । अहल्याख्या शिला रूपे वनविपिनेऽत्र स्मरति ॥ यदि चरणं तवैव शापान्तं प्राप्य गौतम ।। सकाशिव ते पादपद्मानां प्रसादतः गतौ' ॥ &c (See पद्मपुराण).

This allegory is finely explained by Kuma'rila Bhatta (1), who makes Ahalya' to represent 'the night,' and Indra 'the sun' (2), the latter carrying away the shades of night. The

(1) Also styled कुमारिलस्वामी, a renowned teacher of Mimánsá philosophy.

(2) The name 'अहल्या' by a strained etymology can be made to signify 'night' and 'इन्द्र' the 'sun'

belief, that, darkness prevailed before the creation, is universal, and Ra'ma'yana representing Ahalyá as the first-born daughter of Brahma', apparently alluded to 'night' or the primeval darkness.

As Indra is represented the god of rains, and Ahalya' an unploughed land (अ neg हल plough, यत् affix), so this myth of Indra's connection with Ahalya' may also mean the conversion of cultivable but unploughed land into a fertile one by means of rains.

St. 44.—'विद्रुतक्रतुमृगानुसारिणम्' &c. This story is related in different Pura'n'as in different forms with various embellishments. But the allusion contained in the text, refers to the following story of the Maha'bha'rata:—

Once the gods instituted a sacrifice and apportioned no share to Rudra, of course, not knowing the powers of the formidable deity. Rudra, in a rage, created an extraordinary bow (said to be made of five sacrifices-पञ्चयज्ञ) and ran up to the place where the gods were performing the sacrifice. A terrible catstrophe ensued:—"The mountains tottered, the earth shook, the winds ceased to blow and the fire ceased to burn; the sun and moon were obscured, the stars rolled in the fermament in utter disorder, and the whole universe was enveloped in profound darkness. Rudra pierced with an arrow the Sacrifice, that was flying away through the air, assuming the form of a deer. He followed the Sacrifice, and on his way, seized the gods who were running away in dismay. Savitá (सविता) had his arms cut off, Bhaga (भग) had his eyes plucked out, Pu'shan (पूषा) had his teeth knocked down," &c. Afterwards the gods propitiated the angry deity, and order was restored. 'ततो देवयुगेऽतीते देवा वै समकल्पयन्। यज्ञं वेदप्रमाणेन विधिवद् यष्टुमीप्सवः॥ कल्पयामासुरथ ते साधनानि हवींषि च। भागार्हा देवताश्चैव यज्ञियं द्रव्यमेव च॥ ता वै रुद्रमजानन्त्यो याथातथ्येन देवताः। नाकल्पयन्त देवस्य स्थाणोर्भागं नराधिप॥

सोऽपश्यदाश्रमे भागे तु ललितामा मनोऽस्मरैः। तत सायकमन्विष्टम् धनुरादौ मसत्त्वं ह।...तत कुद्धो महादेवस्तदुपादाय कार्मुकम्। चालनामाय तदेव यत्र देवा समीयिरे॥ समागताकाम्यकं दृष्टा महापारिषमव्ययम्। विव्यधे पृथिवी देवो पर्वताश्च चकम्पिरे॥ न ववौ पवनश्चैव नाग्निर्जज्वाल चेधितः। व्यभ्रम-स्यापि सवितुं दिवि नभश्चमण्डलम्॥ न बभौ भास्करश्चापि सोम श्रीमुक्तमण्डल। तिमिरेणाकुलं सर्वमाकाशश्चाभवत्तत॥ अभिभूतास्ततो देवा विषयान्न प्रजज्ञिरे॥ न प्रत्यभात् यज्ञ स देवतान्मोहिरे तदा। तत स यज्ञ विध्वाध रौद्रेण शरेण ह विद्धवा। अपक्रान्तस्ततो यज्ञो मृगो भूत्वा सपावकः। स तु तेनैव रूपेण दिवं प्राप्य व्यराजत। अन्वीयमानो रुद्रेण युधिष्ठिर नभस्तले॥ *&c* &c (See महाभारत, सौप्तिकपर्व, १८ अध्याय)

St. 47 —'अयोनिजा' or 'not womb-born,' an epithet of Sítá. In the Rámáyan'a, Janaka thus gives an account of the birth of Sítá :—' As I was ploughing my field, there sprung from the furrow a girl, obtained by me while cleansing my field, and known by name as 'Sítá' (the furrow). This girl sprang from the earth grew up as my daughter' &c 'अथ मे कृषत क्षेत्रं लाङ्गलादुत्थिता तत। क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता॥ भूतला-दुत्थिता सा तु व्यवर्धत ममात्मजा। वीर्यशुल्केति मे कन्या स्थापितेयमयोनिजा'॥ &c In another place, Sítá thus relates to Anasu'yá, the wife of Atri the account of her own birth —Once, Janaka, king of Mithilá went with his wives to plough the sacrificial ground. While there, he saw Menaka, the chief of the beautiful Apsaras, passing across the sky. He was moved at the sight, and wished that an illustrious child might be born to him from her Just at the time a voice from heaven was heard, saying that he would be blessed with such a child Afterwards, while he was ploughing the sacrificial ground, I sprung from the *earth* 'मिथिलाधि-पतिर्वीरो जनको नाम धर्मवित्। क्षत्रधर्मेऽभिरतो न्यायतः शास्ति मेदिनीम्॥ तस्य लाङ्गलहस्तस्य कृषतः क्षेत्रमण्डलम्। अहं किलोत्थिता भित्त्वा जगतीं नृपतेः सुता॥ ... मेनकां तु अप्सरसं दिव्यरूपां ... कन्या वै ... पं'त-

[illegible]

[illegible] to kill her. Paraśura'ma [illegible] and his ready [illegible] his father that he told him to ask a boon. He begged that his mother might be restored to life and that he himself might be invincible in single combat and enjoy length of days. Paraśura'ma's hostility to the Kshatriya race evidently indicates a severe struggle for supremacy between them and the Bra'hmanas. He is said to have cleared the earth of the Kshatriyas twenty-one times, and to have given the earth to the Bra'hmanas. The cause of his hostility to the Kshatriyas is thus related. Ka'rtavírya, a Kshatriya and king of the Haihayas (1), had a thousand arms (2). This king paid a visit to the hermitage of Jamadagni in the absence of the Rishi and his sons, and was hospitably entertained by his wife. But when he departed he carried off a sacrificial calf belonging to the sage, and destroyed the trees of the hermitage. This act so enraged Paraśura'ma, that he pursued Ka'rtavírya, cut off his thousand arms and killed him. In retaliation the sons of Kártavírya attacked the hermitage of Jamadagni, when Paraśura'ma was away, and slew the pious and unresisting sage. When Paraśura'ma returned he found his father dead, and made a vow that he shall extirpate the whole Kshatriya race including the sons of Ka'rtavírya. Thrice seven times did he clear the earth of the Kshatriya caste, and filled with their blood the five large lakes of Samantapanchaka (the district Kurukshetra), from which he offered libations to the race of Bhrigu. He then performed the Aśvamedha sacrifice, and presented the earth to Ka'śyapa, and retired to the Mahendra

---

(1) A tribe of people said to have been descended from Yadu; they are described in the Purán'as as separated in the five divisions, viz. तालजङ्घ, वीतहोत्र, चारक्य, तुण्डिकेर, and जात; they are said to have overrun parts of India along with S'ak'as or Scythian tribes.

(2) He was endowed by the favour of Dattátreya (दत्तात्रेय) with a thousand arms, and a golden chariot that went wheresoever he willed it to go.

mountains (See Maha'bha'rata, Vanaparva, 116. Adh, also S'a'ntiparva Rajadharma, 49 Adh).

St. 65.—'ययमात्मजमयीद्रन्दियदा' &c Renuka' the mother of Parasura'ma, once went to bathe, and finding king Chitraratha and his wife amusing themselves in the water as man and woman, felt overpowered with an impure desire. On her return to the Hermitage, her husband found that she had fallen from perfection, and desired his sons, to kill her. Rumanwat, Sushena, Vasu, and Vis'wa'vasu, the four elder sons declined, and their father cursed them that they might become idiots Parasura'ma, the fifth son, cut off her head, and thereby so pleased his father that he promised him any blessings which he might desire. Among other things, Parasura'ma asked that his mother might be restored to life without a recollection of her death and in a state of perfect purity. He also desired that his brothers might be restored to a sane condition. All this Jamadagni bestowed फलाहारेषु सर्व्वेषु गतेष्वथ सुतेषु वै। रेणुका स्नातुमगमत् कदाचित् नियतव्रता। सा तु चित्ररथं नाम मार्त्तिकावतकं नृपम्। ददर्श रेणुका राजन् आगच्छन्ती यदृच्छया। क्रीडन्तं सलिले दृष्ट्वा सभार्य्यं पद्ममालिनम्। ऋद्धिमन्तं ततस्तस्य स्पृहयामास रेणुका। व्यभिचाराच्च सा तस्मात् क्लिन्नाम्भसि विचेतना। प्रविवेशाश्रमं त्रस्ता तां वै भर्त्ताऽन्वबुध्यत। स तां दृष्ट्वा च्युतां धैर्य्यात् ब्राह्म्या लक्ष्म्या विवर्जिताम्। धिक्शब्देन महातेजा गर्हयामास वीर्य्यवान्। ततो ज्येष्ठो जामदग्न्यो रुमण्वान् नाम नामतः। आजगाम सुषेणश्च वसुर्विश्वावसुस्तथा। तानानुपूर्व्याद् भगवान् वधे मातुरचोदयत्। न च ते जातसम्मोहाः किञ्चिदूचुर्विचेतसः। ततः शशाप तान् क्रोधात् ते शप्ताश्चेतना जहुः। मृगपक्षिसधर्म्माणः क्षिप्रमासन् जडोपमाः। ततो रामोऽभ्यगात् पश्चात् आश्रमं परवीरहा। तमुवाच महाबाहुर्जमदग्निर्महातपाः। जहीमां मातरं पापां मा च पुत्र व्यथां कृथाः। तत आदाय परशुं रामो मातुः शिरोऽहरत्। &c

(महाभारत, वनपर्व्व, तीर्थयात्रापर्व्व, ११६ अध्याय).

St 74.—बिभ्रतोऽस्त्रमचलेऽप्यकुण्ठितम्' &c. ('अचले क्रौञ्चाद्रौ' &c मल्लिनाथः. *Krauncha* is described as a mountain, in the *Mahábhárata*, and being personified, is there called the son of *Maináka*. A mountain also called *Krauncha Meru* occurs in Mr Wilford's lists, amongst those mountains situated in the north. It must lie at some distance from the plains. The *Krauncha* pass, or defile in the *Krauncha* mountain, is said to have been made by the arrows of Paras'ura'ma, who was educated by S'iva on Mount *Kailása*, and who thus opened himself a passage from the mountains upon the occasion of his travelling southwards to destroy the Kshatriya or military race. (See *Meghaduta* St 58 Wilson's notes 109 and 110.)

St 76.—'वैष्णवं धनुः आततज्यम् ओजसा हरेः' &c. It alludes to the following legend of the Ra'ma'yana:—Vis'wakarma' made two bows of unrivalled strength each of which was appropriated to Vishnu and S'iva, and called Vaishnava (वैष्णव) and S'aiva (शैव or रौद्र) after their names. At one time, the gods inquired of Brahma' who is the strongest of the two gods Vishnu and S'iva. Brahma' to satisfy their curiosity instigated the two gods to combat, in which Vishnu with his Hunka'ra (हुङ्कार) made S'iva paralised and his bow shorn of its strength. "इमे द्वे धनुषी श्रेष्ठे दिव्ये लोकाभिपूजिते। दृढे बलवती मुख्ये सुकृते विश्वकर्मणा॥ अनुसृष्टं सुरैरेकं त्र्यम्बकाय युयुत्सवे। त्रिपुरघ्नं नरश्रेष्ठ ! भग्नं काकुत्स्थ ! यत् त्वया॥ इदं द्वितीयं दुर्धर्षं विष्णोर्दत्तं सुरोत्तमैः।...तदा तु देवताः सर्वाः पृच्छन्ति स्म पितामहम्। शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया॥ अभिप्रायं तु विज्ञाय देवतानां पितामहः। विरोधं जनयामास तयोः सत्यवतां वरः॥ विरोधे तु महद्युद्धमभवद्रोमहर्षणम्। शितिकण्ठस्य विष्णोश्च परस्परजयैषिणोः॥ तदा तु जृम्भितं शैवं धनुर्भीमपराक्रमम्। हुङ्कारेण महादेवः स्तम्भितोऽथ त्रिलोचनः"॥

## SCHEME OF THE METRES.

---

### CANTO XI.

The 11th Canto is composed in the metre रथोद्धता, every foot of which consists of eleven syllables.

रथोद्धता. Scheme, – ⏑ – ⏑ ⏑ ⏑ – ⏑ – ⏑ –

– ⏑ – ⏑ ⏑ ⏑ – ⏑ – ⏑ –
कौ शि के न स कि ल क्षि ती श्व रः

– ⏑ – ⏑ ⏑ ⏑ – ⏑ – ⏑ –
रा म म ध्व र वि घा त शा न्त ये ।

– ⏑ – ⏑ ⏑ ⏑ – ⏑ – ⏑ –
का क प क्ष ध र मे त्य या चि तः

– ⏑ – ⏑ ⏑ ⏑ – ⏑ – ⏑ –
ते ज सां हि न व यः स मी क्ष्य ते ॥

The 92d stanza is composed in the metre वसन्ततिलक, every foot of which consists of fourteen syllables.

वसन्ततिलक Scheme, – – ⏑ – ⏑ ⏑ ⏑ – ⏑ ⏑ – ⏑ – –

– – ⏑ – ⏑ ⏑ ⏑ – ⏑ ⏑ – ⏑ – –
त स्मिन् ग ते वि ज यि नं प रि र भ्य रा मं

– – ⏑ – ⏑ ⏑ ⏑ – ⏑ ⏑ – ⏑ – –
स्ने हा द म न्य त पि ता पु न रे व जा तं

– – ⏑ – ⏑ ⏑ ⏑ – ⏑ ⏑ – ⏑ – –
त स्या भ व त्क्ष ण शु चः प रि तो ष ला भः

– – ⏑ – ⏑ ⏑ ⏑ – ⏑ ⏑ – ⏑ – –
क क्षा ग्नि ल ङ्घि त त रो रि व वृ ष्टि पा तः

The last stanza is composed in the metre मालिनी. See page 92

## THE ARGUMENT.

### CANTO XI.

एकादशसर्गे वर्णिता कथांशा यथा;—मखविघ्नविनाशाय दशरथसमीपे कौशिकस्य रामलक्ष्मणप्रार्थना राज्ञश्च तयोर्गमनादेशः। तयोः प्रस्थानकाले मरुत्प्रसूनवर्षादि दैवानुकूल्यम्। पितुः आदेशं प्राप्य तयोः कौशिकेन सह प्रस्थानम्। तयोर्गतिशोभावर्णनम्। पथि कौशिकात् बलातिबलाख्यविद्याद्वयलाभः। ऋषिमुखात् पुराकालवृत्तान्त मदनदाह-विवरणात् नन्दनवन मैथुन्यादि-स्थलीगाहे तयोः सुखेन गमनम्। तयोर्दर्शनेन तपस्विनामानन्दः। कामाश्रम-प्रवेशः। पादताडनोन्मत्तविकृता ताडका हता रामेण कौशिकात् दिव्यास्त्र-मन्त्रादिलाभः। वामनाश्रममतीत्य तयोः कौशिकाश्रमगतिः। यज्ञदीक्षितस्य कौशिकस्य यज्ञाभियुक्ते कुमारद्वये रक्षसा शोणितवर्षोद्दयोपात वह्निनाश यज्ञस्थाने। द्विवर्णांशच्युत वायव्यास्त्रेण मारीचं जित्वा परिक्षिप्य च सुबाहुं हित्वा रामस्य यज्ञरक्षणम्। यज्ञान्ते कौशिकात् आशिषं लब्ध्वा तेन सह तयोः जनकयज्ञगमनम्। पथि गौतमाश्रमे रामपादस्पर्शात् अहल्यायाः शापविमुक्तिः। मिथिलायां तेषु जनकस्य प्रत्युद्गमनं पूजा च। प्रस्तावे कौशिकमुखात् रुद्रधनुर्भङ्गोत्सुकं रामं निशम्य दुःखितस्य जनकस्य धनुषो दुरारोपत्वादिकथनम्। दुःखवचनश्रवणात् स्मितमुखं रामं धनुर्भङ्गेषु मत्वा जनकस्य धनुरानयनादेशः। वज्रपातोपमं धनुः लीलयैव आदाय अधिज्यं च विधाय रामस्य तद्भञ्जनम्। अथ च कन्यारत्नं अयोनिजां रामाय सीतां सम्प्रदाय दशरथानयनार्थं जनकस्य पुरोहितप्रेरणम्। रामविवाहाभिलाषात् एव दशरथस्य अनुकूलवाणीश्रवणम्। जनक-पुरोहितसङ्कल्प सह दशरथराज्ञो मिथिलागमनम्। पुत्रचतुष्टयस्य वैवाहिकमहोत्सवं समाप्य पथि जनकं विसृज्य च दशरथस्य अयोध्याप्रतिगमनम्। पथि प्रतीप-वायु-परिवेश-धूमवर्ष-विवादिनादि-दुर्निमित्तदर्शनम्। धनुर्भङ्गं निशम्य क्रोधोज्ज्वलस्य भार्गवस्य रामाभियोगः। ज्ञायमानस्य भार्गवस्य वचनात् तदीयधनुषि रामस्य ज्यारोपणं दृढमुष्टिबन्धश्च। भार्गवस्तुतिपूर्वं तस्य स्वर्गमार्गरोधः। गते च भार्गवे रामः कोऽपि सम्भोज्य। अयोध्याप्रवेशे च पुरनारीणां सीतादर्शनौत्सुक्यम्।

---

## द्वादशः सर्गः।

**निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान्।**
**आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि॥१॥**

वन्दामहे महोदग्रदोर्दण्डौ रघुनन्दनौ।
तेजोनिर्जितमार्तण्डमण्डलौ लोकनन्दनौ॥

१। निर्विष्टेति। स्नेहयन्ति प्रीणयन्ति पुरुषमिति स्नेहाः। पचाद्यच्। स्निह्यन्ति पुरुषा येषु इति वा स्नेहाः। अधिकरणार्थे घञ्। विषया (१) शब्दादयः त एव स्नेहाः निर्विष्टाः (२) भुक्ताः विषयस्नेहाः येन सः तथोक्तः। "निर्वेशो भृतिभोगयोः" इति विश्वः। दशा जीवनावस्था तस्याः अन्तं वार्द्धकम्, उपेयिवान् (३) सः दशरथः, उषसि (४), प्रदीपार्चिः इव दीपज्वाला इव, आसन्नं निर्वाणं (५) मोक्षः यस्य सः तथोक्तः, आसीत्। अर्चिःपक्षे तु विषयः देशः आश्रयः भाजनम् इति यावत्। "विषयः स्यादिन्द्रियार्थे देशे जनपदेऽपि च" इति विश्वः। स्नेहः तैलादि। "स्नेहस्तैलादिकरसे स्नेहः स्यात् सौहृदेऽपि च" इति विश्वः। दशा वर्त्तिका। "दशा वर्त्त्यामवस्थायाम्" इति विश्वः। निर्व्वाणं विनाशः। "निर्व्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने" इति यादवः॥१॥

---

[१] (१) वि, षि to bind, अच् aff (२) विश् to enter, with निर्, to enjoy, क्त aff (३) उप, इ to go, क्वसु aff (४) वस् to burn, असि unadi aff. loc (५) निर्, वा to go, क्त aff.

१। निर्विष्टविषयस्नेहः दशान्तम् उपेयिवान् सः (दशरथ) उषसि आस
निर्वाण प्रदीपार्चिः इव आसीत्।

१। निर्विष्टविषयस्नेहेन दशान्तम् उपेयुषा तेन आसन्ननिर्वाणेन प्रदीप
र्चिषा इव अभूयत, इति वाच्यान्तरम्।

१। यथा हि निर्वाणोन्मुख प्रभातदीपः आधारगतं तैल शोषयन् वर्ति
कायाः अन्त्य भागम् आश्रित्य मन्दं ज्वलति, तथा निर्वाणोन्मुख, स राजा दशर
भोग्यवस्तुगतम् अनुराग सम्यक् उपभुज्य जीवनावस्थायाः अन्त्य भागम् आश्रित
क्षीणभावेन अतिष्ठत्। निर्विष्टस्नेह राज्ञि प्रदीपार्चिषि च योजनीयम्। 'निर्वि
भुक्तौ विषयेषु स्त्र्यादिषु स्नेहो रसो येन स तथा' इति दिनकर। विषय
स्त्र्यादिभोग्यवस्तु, दीपाधारश्च। स्नेह अनुरागः तैलञ्च। दशा जीवनावस्था
वर्त्तिका च। निर्वाण मरणं अदर्शनावसानञ्च। उक्तञ्च प्राकृतार्थ—'निर्वाण
प्रदीपस्य शिखेव जरती मतिः' इति।

১। বিষয়ানুরাগ ভোগ করিয়া জীবনের শেষ-দশায় অবস্থিত, সেই দশর
আধারস্থিত তৈল শোষণ করিয়া বর্ত্তিকার শেষ ভাগে অবস্থিত উষাকালের নির্বাণোন্মু
প্রদীপের ন্যায় লক্ষিত হইতে লাগিলেন।

1. He satiated with the pleasures of the world arrived a
the last stage of his life, and appeared like the flickering morn
ing lamp with its wick reduced to its extremity and its o
nearly consumed.

**तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति।**
**कैकेयीशङ्कयेवाह पलितच्छद्मना जरा॥२॥**

२। तमिति। जरा (१), कैकेयीशङ्कया इव, पलितस्य (२
केशादिशौक्ल्यस्य, छद्मना (३) मिषेण। "पलितं जरसा शौक्ल्यं
केशादौ" इत्यमरः। कर्णमूलं कर्णोपकण्ठम्, आगत्य, रामे श्रीः राज

[२] (१) जॄ to become old, अङ् and टाप् affs (२) पल् to go
क्त aff. (३) छद् to cover, मनिन् aff. (४) नि, अस् to throw,—अस्यति

श्रियं, न्यस्यतां (४) निधीयताम्, इति तम् आह । दशरथः वृद्धोऽहमिति विचार्य्य रामस्य यौवराज्याभिषेकं कर्त्तुं चकाङ्क्ष इत्यर्थः ।

१। जरा कैकेयीभयात् इव पलितच्छद्मना कर्णमूलम् आगत्य रामे श्रीः न्यस्यताम् इति तम् आह ।

२। जरया . स ऊचे इति वाच्यान्तरम् ।

३। जरापलितकेश स राजा आसन्नमृत्युम् आत्मानम् विचिन्त्य रामं यौवराज्ये अभिषेक्तुम् ऐच्छत्, इति निगूढार्थः । 'कैकेयीशङ्कया इव'—स्वपुत्रपक्षपातिनी सपत्नी कैकेयी चेत् ज्येष्ठसपत्नीपुत्रस्य रामस्य अभिषेकं निराकुर्य्यात् इति भयादिव । 'पलितच्छद्मना',—प्रकाशवचने कैकेय्याः विघ्नाशङ्कया कर्णान्तिके गूढभावेन कथनार्थमिव तस्य जरा कर्णमूलविलसत्पक्वकेशच्छलेन तमाह इत्यर्थ । 'कर्णमूलमिति देशवाचकत्वेन अधिकरणत्वात् द्वितीया । मूले जाहपत्य' । अतएव 'कर्णजाहम्' इति दिनकरसम्मत पाठ ।

৪। তাঁহার বৃদ্ধাবস্থা যেন কৈকেয়ীর ভয়ে পক্বকেশের ছলে তাঁহার কর্ণমূলে আসিয়া রামে রাজলক্ষ্মী সমর্পণ করিতে কহিল ।

2. Old age, in the guise of hoary locks reaching his ears, was whispering to him as if for fear of Kaikeyi, that he should bestow his kingdom on Ra ma

सा पौरान् पौरकान्तस्य रामस्याभ्युदयश्रुतिः ।
प्रत्येकं ह्लादयाञ्चक्रे कुल्येवोद्यानपादपान् ॥३॥

१। सेति । सा पौरकान्तस्य रामस्य अभ्युदयश्रुतिः अभिषेकवार्त्ता, कुल्या (१) कृत्रिमा सरित् । "कुल्याऽल्पा कृत्रिमा सरित्" इत्यमरः । उद्यानपादपान् (२) इव, पौरान् (३) प्रत्येकं ह्लादयाञ्चक्रे (४) ।

---

आसन्न । आस्यन् । आस । &c अर्थात्,—आसते । आसताम् । आसन । आस्व । आस्ते । &c.

[१] (१) कुल, यत् aff. f.m. टाप् aff. (कुले सरित्वे साधु, इव

३। पौरकान्तस्य रामस्य सा अभ्युदयश्रुतिः, कुल्या उद्यानपादपान् पौरान् प्रत्येकं ह्लादयाञ्चक्रे।

३। पुरे भवाः पौराः, तेषां कान्तः तस्य पौरकान्तस्य। अभ्युदयस्य श्रुतिः उद्यानस्य पादपाः तान्। एकम् एकम् प्रति प्रत्येकम्, अव्ययीभावः। वाक्यार्थस्तु—यथा अभ्युदयश्रुत्या कुल्यया उद्यानपादपा इव पौराः ह्लादयाञ्चक्रिरे इति।

३। यथा हि कृत्रिमा सरित सर्व्वेषु एव उपवनपादपेषु तुल्यरूपं रसं वितरति, तथा लोकाभिरामस्य रामस्य अभिषेकवार्त्ता सर्व्वेषु एव पुरवासिषु तुल्यरूपं परमानन्दरसं वितताऱ। रामाभिषेकवार्त्तया सर्व्वएव समरसां प्रीतिमापुरिति भावः।

৩। যেমন কৃত্রিমা নদী উপবনের প্রত্যেক বৃক্ষকে পরিতুষ্ট করে, পৌরজনপ্রিয় রামের সেই অভিষেকবার্ত্তা তেমনি প্রত্যেক পুরবাসীকে আহ্লাদিত করিল।

3. The news of the intended coronation of Rá'ma, the idol of the citizens, gladdened the hearts of all, in the same way, as a meandering stream of artificial water gladdens the trees of a garden

**तस्याभिषेकसम्भारं कल्पितं क्रूरनिश्चया।**
**दूषयामास कैकेयी शोकोष्णैः पार्थिवास्रुभिः ॥४॥**

४। तस्येति। क्रूरनिश्चया कैकेयी, तस्य रामस्य, कल्पितं सम्भृतम्, अभिषेकस्य सम्भारम् (१) उपकरणं, शोकोष्णैः पार्थिवास्रुभिः, दूषयामास (२), सर्व्वसुखमूलेन राजशोकेन प्रतिबबन्ध इत्यर्थः।

साधारति यत्). (२) उत्- या to go, ल्युट् aff. (उद्यान्ति अनेन आधारे वा करणे ल्युट्) (उद्यान), and पाद root, पा to drink, क aff. (पादप). (३) पुर a city, अण् aff. (४) ह्लाद to be pleased. (णिच्)—ह्लादयति-ह्लादयते। अह्लादयत्-अह्लादयत। अजिह्लदत्-अजिह्लदत। ह्लादयाम्बभूव। &c

[ ४ ] (१) सम्, भृ to maintain, घञ् aff. (२) दुष (णिच्) to defile,—दूषयति। अदूषयत्। अदूदुषत्। दूषयाम्बभूव, &c. दूषितः, &c.

४। क्रूरनिश्चया कैकेयी तस्य कल्पितम् अभिषेकसम्भारं शोकोष्णैः पार्थिवाश्रुभिः दूषयामास।

४। शोकेन उष्णानि तैः। पृथिव्याः ईश्वरः पार्थिवः तस्य अश्रूणि तैः। वाच्यान्तरम्—क्रूरनिश्चयया कैकेय्या कल्पितः अभिषेकसम्भारः...दूषयामास इति।

४। क्रूरसङ्कल्पा कैकेयी [illegible] रामाभिषेकाय समाहृतानि [illegible] दूषितानि चकार। कैकेय्या निमित्ते रामाभिषेके राजा शोकसन्तोऽभूदिति भावः। 'शोकोष्णैः' इत्यनेन पार्थिवाश्रूणाम् [illegible], तैश्च तदभिषेकसम्भाराणां दूषितत्व [illegible]। 'क्रूरनिश्चया',—क्रूर रामवनवासभर्तृमरणादिहेतुत्वात् दारुण निश्चय: अध्यवसायो यस्याः सा। 'कल्पितम्', यथाविधि समाहृतम्।

४। [illegible] कैकेयी, राजার শোকসন্তপ্ত নয়নজলে পাতিত করিয়া রামের [illegible] অভিষেকসামগ্রী দূষিত করিল।

4. The cruelly resolved Kaikeyī caused the articles collected for his coronation to be polluted with the king's scalding tears of grief

सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ।
उद्ववामेन्द्रसिक्ता भूर्बिलमग्नाविवोरगौ॥ ५॥

५। सेति। चण्डी (१) अतिकोपना। "[illegible]" इत्यमरः। सा [illegible] भर्त्रा आश्वासिता [illegible], तेन भर्त्रा संश्रुतौ प्रतिज्ञातौ वरौ, इन्द्रेण सिक्ता अभिवृष्टा भूः बिले अन्तः [illegible] (२) उरगौ (३) इव, उद्ववाम (४) उद्गारं।

---

[५] (१) [illegible] to be angry, [illegible] (२) [illegible] to bathe, [illegible] the breast, [illegible] to go [illegible] (३) [illegible] to vomit —[illegible] &c [illegible] &c

५। चण्डी सा किल भर्त्रा आश्वासिता तत्संस्मृतौ वरौ, इन्द्रसिक्ता भूः बिलमग्नौ उरगौ इव उद्वमत्।

५। चण्ड्या तया भर्त्रा आश्वासितया तत्संस्मृतौ वरौ इन्द्रसिक्तया भुवा बिलमग्नौ उरगौ इव उद्वमाते, इति वाच्यान्तरम्।

५। यथा इह आतपतापिता भूमिः इन्द्रकृतेन वृष्टिपातेन अभिषिक्ता सती गर्त्तनिहितौ विषधरौ बहिः निःसारयति, तथा स्वपतीसुताभिषेकदुःखदर्शनात् कोपज्वलिता कैकेयी भर्त्रा आश्वासवाक्येन अनुनीता सती हृदयनिहितौ भर्त्रा प्रतिश्रुतौ वरौ प्रकाशयामास। रामः प्राप्तवरत्वात् वरद्वयस्य अर्पणं विषतुल्यम्। 'रामाभिषेकसमारम्भं आलोक्य अधिगतदुःखापि, चण्डी कोपनशीला सा, इदं हास्यामीति प्राक् प्रतिज्ञातौ वरौ उद्गिरति स्म। रामवनवासराज्यभ्रंशदानात् वरयोः सर्पवत् क्रूरत्वम्' इति दिनकरः।

६। ভূমি যেমন ইন্দ্রের বারিবর্ষণে সিক্ত হইয়া গর্ত্তনিহিত সর্পদ্বয়কে বহিষ্কৃত করে, কোপনা কৈকেয়ী তেমনি স্বামীর অনুনয়বাক্যে আদ্র হইয়া প্রতিশ্রুত বরদ্বয় প্রকাশিত করিল।

5. The angry Kaikeyi, while being soothed by her husband, uttered forth the two promised boons, as the earth on being soaked with rain, throws out two serpents that lay concealed in a hole.

## तयोश्चतुर्दशैकेन रामं प्राव्राजयत् समाः।
## द्वितीयेन सुतस्यैच्छत् वैधव्यैकफलां श्रियम्॥ ६॥

६। तयोरिति। सा तयोर्वरयोर्मध्ये, एकेन वरेण, रामं चतुर्दश समाः संवत्सरान्। अत्यन्तसंयोगे द्वितीया। प्राव्राजयत् (१) प्रवासयत्, द्वितीयेन वरेण, सुतस्य भरतस्य, वैधव्यैकफलां स्ववैधव्य(२)मात्रफलां, नतु उपभोगफलामिति भावः, श्रियम् ऐच्छत् इत्यर्थ।

[ ६ ] (१) व्रज् to go, with प्र, to go to exile, &c (णिच)—प्राव्रजति। प्राव्राजयत्। प्राव्रजयत्। प्रव्राजयमास, &c. प्रव्रजः &c. (२) विधवा w.ідw, ष्यञ् aff.

६। सा सखी, एकेन वरेण रामस्य चतुर्दश समाः प्रवासम् अयाचत्, द्वितीयेन वैधव्यैक-फलां सुतस्य श्रियम् ऐच्छत्।

६। चतुर्दशवर्षा इत्यत्र चतुर्दश। वाच्यान्तरं—(तया) रामः...प्रव्राजित... वैधव्यैकफला श्रीः ऐष्यत।

६। सा सखी 'एकेन वरेण रामस्य वनवासगमनम् अपरेण च स्वसुतस्य भरतस्य अभिषेकम् याचितवती' इति विशदार्थः। 'वैधव्यैकफलां श्रियम्', ... भावः।

৬। সেই দুইটি বরের এক বরে রামকে চতুর্দশ বৎসর নির্বাসিত করিল, এবং অন্য বরে পুত্রের রাজলক্ষ্মী প্রার্থনা করিল, যাহার ফল কেবল নিজের বৈধব্য।

6 By one of the boons, she caused fourteen years exile of Ráma by the other, she desired the royal fortune for her son, which resulted only in her widowhood

पित्रा दत्तां रुदन् रामः प्राङ्महीं प्रत्यपद्यत।
पश्चाद्वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत्॥७॥

७। पित्रेति। रामः प्राक् पित्रा दत्तां महीं, रुदन् (१), प्रत्यपद्यत प्रतिजग्राह, राज्यात् दुःखात् इति भावः। पश्चात् वनाय गच्छ इति एवंरूपां तदाज्ञां पित्राज्ञां, मुदितः (२) अग्रहीत् पित्राज्ञाकरणलाभात् इति भावः।

৭। রাম প্রথমে পিতা দত্ত মহী রোদন করিতে করিতে গ্রহণ করিলেন, পশ্চাৎ বনে যাও এই আজ্ঞা আনন্দে গ্রহণ করিলেন।

৭। 'বনায়' ইত্যত্র ... ইতি

[७] (१) रुद् to cry, शतृ aff — रोदिति। अरोदीत्-अरुदत्। अरुदन्-अरोदीत्। रुरोद। &c भावे,— रुद्यते। अरोदि। &c रोदितम्, &c (२) मुद् to rejoice, क्त aff.

पराग विश्विता, (भर्वा) ददृशः। समं मुखरागं जनैः विस्मितैः ददृशे इति व्याकरम्।

८। धर्माभिषेकाय माङ्गलिक दुकूलयुग परिदधतः तस्य रामस्य मुखं यथा प्रादन्नमधुर चलक्षत, वनवासाय कठिन वल्कलयुग परिदधतोऽपि तस्य तथैव प्रसादमधुर मुख मल्यते च। तस्य तथाविध निर्विकारभाव दृष्टा सर्वे जना विस्मय ययुः। अनुरूप श्लोको यथा,—'आहूतस्याभिषेकाय विसृष्टस्य वनाय च। न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः' ॥ इति।

৮। যেমন মঙ্গল দুকূলযুগল পরিধানে তেমনি আবার বল্কলধারণে তাঁহার সমান মুখশ্রী দেখিয়া লোকে বিস্মিত হইয়াছিল।

8 People beheld with wonder, the even tenour of Rama's countenance, both when he was dressed in the auspicious silks, and when clad in the bark of trees

**स सीतालक्ष्मणसखः सत्याद् गुरुमलोपयन्।**
**विवेश दण्डकारण्यं प्रत्येकञ्च सतां मनः॥ ९॥**

९। स इति। सः रामः, गुरुं पितरं, सत्यात् (१) प्रतिज्ञात; अलोपयन् (२) अभ्रंशयन् सीतालक्ष्मणयोः सखेति विग्रहः, ताभ्यां सहितः सन् दण्डकारण्यं विवेश सतां मनश्च प्रत्येकं विवेश। शिष्टभक्तया सर्व्वे जनाः सन्तुष्टा इति भावः।

९। स (रामः) सत्यात् गुरुम् अलोपयन् सीतालक्ष्मणसखः दण्डकारण्यं विवेश सतां मनश्च प्रत्येकं (विवेश)।

९। सीता च लक्ष्मणश्च तौ सखायौ यस्य, 'राजाहःसखिभ्यष्टच्' इति टच्-प्रत्ययः। एकम् एकम् प्रति प्रत्येकं, अव्ययीभावः। वाच्यान्तर—तेन सत्यात् गुरुम् अलोपयता सीतालक्ष्मणसखेन दण्डकारण्यं विविशे सतां मनश्च प्रत्येकं विविशे, इति।

---

[९] (१) सत् being तत्र सत्यं (२) लुप् to destroy, (णिच्) प्रेरणार्थे —लोपयति। अलोपयत्। अलुलुपत्, &c लोपयाञ्चकार &c लोपित, &c

[illegible] लघु प्रायश्चित्तम् इति मन्यते। [illegible] मरणा-[illegible]।

१०। [illegible] পুত্রের বিরহে কাতর হইয়া নিজ কর্মজনিত অভিশাপের কথা স্মরণ করিলেন, এবং কেবল দেহত্যাগেই তাহার প্রায়শ্চিত্ত জ্ঞান করিলেন।

10 The king distracted with sorrow at the separation from his son, remembered the curse which he had drawn down upon himself by his own act, and thought of the dissolution of his body as the only expiation.

विप्रोषितकुमारं तत् राज्यमस्तमितेश्वरम् ।
रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥११॥

११। विप्रोषितेति। विप्रोषिताः (१) कुमाराः यस्मात् तत् तथोक्तम्, अस्तमितः (२) ईश्वरः (३) राजा यस्य तत् तथोक्तं अस्त-[illegible], तत् राज्य, रन्ध्रान्वेषणदक्षाणां द्विषाम्, आमिषतां (४) भोग्यवस्तुतां ययौ। "आमिषं भोग्यवस्तुनि" इति कोषः।

११। [illegible] रन्ध्रान्वेषणदक्षाणां द्विषाम् [illegible] ययौ।

११। [illegible]

११। [illegible]

[११] (१) वि, प्र, वस to dwell, [illegible] (२) [illegible] (३) ईश to rule, [illegible] (४) [illegible] to cover, [illegible] [illegible]

"पयोर्वंमनमनात् इतरयोरपि मातुलभवनी स्थितिः चतुर्थौ विप्रोषितत्वम् । रघु
स्वपनाशादीनाम् इति दिनकर ।

১১। কুমারেরা প্রবাসগামী, এদিকে মহারাজও অন্তর্হিত হইলেন। স
সেই রাজ্য ছিদ্রান্বেষী রিপুগণের লোভনীয় হইয়া উঠিল।

11 On the death of the sovereign and the absence of princes, the kingdom became a prey to enemies, skillful in fi
ing out its weak points.

अथाऽनाथाः प्रकृतयः मातृबन्धुनिवासिनम् ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥१२॥

१२ । अथेति । अथ अनाथाः प्रकृतयः अमात्याः । "प्रकृ
सहजे योनावमात्ये परमात्मनि" इति विश्वः । मातृबन्धुषु नि
सिनं भरतं स्तम्भिताश्रुभिः पितृमरणसूचनार्थम् इति भावः, मौलैः
आप्तैः सचिवैः, आनाययामासुः (२) आगमयाञ्चक्रुः ।

१२ । अथ अनाथाः प्रकृतयः मातृबन्धुनिवासिनं भरतं स्तम्भिताश्रुभिः म
आनाययामासुः ।

१२ । नास्ति नाथो यासां ताः अनाथाः । स्तम्भितानि अश्रूणि यैः, तैः
वाच्यान्तर—अनाथाभिः प्रकृतिभिः मातृबन्धुनिवासी भरतः स्तम्भिताश्रुभिः म
आनाययाञ्चक्रे ।

१२ । राजमरणेन कुमारासन्निधानेन च राज्यस्य अनाथतया दशा छ
अमात्या मातुलाश्रयस्थस्य भरतस्य आनयनार्थं आप्तान् सचिवान् प्रेषयामासु
च पितृमरणादिज्ञापनार्थं मौलान् स कदमपि नियतम् भरतम् आनिन्युः । नि
मरणादिश्रवणात् मौलैरश्रुपातेन भरत आप्तान् विज्ञास्यति, तर्हि वा मार्गे
इत्यादिमत्वा सचिवैः भूतार्थगोपन कृतम् इति 'स्तम्भिताश्रुभिः' इत्यनेन स

[ १२ ] (१) मुष root, अच aff. (२) नी, णी to carry, (णिच)—न
यति । अनाययत् । अनीनयत् । नाययाम्बभूव, नाययामास, &c. नायित, ।

तम्। कुम्भकुमारकता. [illegible] सचिवाः मौलाः, [illegible]। [illegible] [illegible] [illegible] मौलालाश्च [illegible] [illegible]म् ।

১২। অনন্তর, অনাথ অমাত্যবর্গ কর্তৃক প্রেরিত বিশ্বস্ত সচিবগণ বাষ্পবারি সম্বরণ করিয়া মাতুলালয়বাসী ভরতকে আনয়ন করিল।

12 .The lordless ministers at length. sent the faithful emissaries to bring back Bharata from his maternal abode, and this they did with suppressed tears

## श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः । मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत् पराङ्मुखः ॥१३॥

१३। श्रुत्वेति। कैकेयीतनयः भरतः, पितुः तथाविधं [illegible]-मृतं, मृत्युं (१) मरणं, श्रुत्वा, स्वस्याः मातुः केवलं मातुरेव न, किन्तु श्रियः अपि पराङ्मुखः (२) आसीत्।

१३। कैकेयीतनयः पितुः तथाविधं मृत्युं श्रुत्वा स्वस्याः मातुः केवलं परा-ङ्मुखः न, श्रियः अपि पराङ्मुखः आसीत्।

१३। कैकेय्याः तनयः। तथा तादृशी विधा प्रकारो यस्य स तम्। पराक् मुखं यस्य सः पराङ्मुखः। वाच्यान्तर—कैकेयीतनयेन . पराङ्मुखेन अभूयत, इति।

१३। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] 'पराङ्मुख' इति [illegible] 'मातु' 'श्रिय' [illegible] [illegible]।

১৩। কৈকেয়ীতনয় ভরত, পিতার [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]।

---

[१३] (१) मृ to die, मृत् [illegible] aff (२) पराङ् averted, from परा away, अञ्च् to go, 'क्विप्' aff. and मुख, face.

13 The son of Kaikeyi hearing the manner of his father's death, turned away his face not only from his mother, but from royalty too.

सशैन्यश्चान्वगाद्रामं दर्शितानाश्रमालयैः ।
तस्य पश्यन् ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥१४॥

१४। सशैन्य इति। सशैन्यः भरतः रामम् अन्वगात् (1) किं कुर्वन्? आश्रमालयैः वनवासिभिः दर्शितान् एते रामनिवास इति कथितान् ससौमित्रेः लक्ष्मणसहितस्य, तस्य रामस्य वसतिद्रुमान् निवासवृक्षान् पश्यन्, उदश्रुः (२) सन्।

१४। सशैन्य भरत [illegible] रामम् ससौमित्रेः तस्य वसतिद्रुमान् पश्यन् [illegible] रामम् अन्वगात् च।

१४। सैन्यैः सह वर्तते इति सशैन्यः, तुल्ययोगे बहुव्रीहिः। [illegible] आलयो येषां ते ते। सुमित्राया अपत्यं पुमान् सौमित्रिः लक्ष्मणः, तेन सहितः, तस्य। वसतेः [illegible] द्रुमाः तान् रामनिवासभूतान् [illegible] उद्गतानि अश्रूणि यस्य सः उदश्रुः। [illegible] उदश्रुः [illegible] दर्शित अन्वगामि च राम।

१४। अथ भरतः ससैन्यः रामम् प्रत्यानेतुं सैन्येन सह प्रतस्थे। [illegible] ससौमित्रिः रामः यत्र यत्र अवसत् वनवासिभिः निवेदितान् तान् तान् [illegible] पश्यन् भरतः गलदश्रुलोचनो बभूव। [illegible] मातुर्दोषेण [illegible] कष्टानि वनवासदुःखानि आपतितानि इति तस्य शोकानल [illegible] दिदीपे इति भावः।

১৪। তিনি রামের অনুসরণার্থ সসৈন্যে যাত্রা করিলেন। পথে রাম ও ল[illegible] যে সকল স্থানে অবস্থান করিয়াছিলেন, আশ্রমবাসীরা সেই সকল স্থানের বৃক্ষ স[illegible] তাঁহাকে দেখাইতে লাগিল, তিনি গলদশ্রুলোচনে দেখিতে দেখিতে চলিলেন।

1 [१४] (१) अनु after, इ (या) to go,—एति। एत्। अगात्। [illegible]
इतः, &c. (२) उत् rising, अश्रु tear, from अश् to pervade, [illegible]

४५। आहिताग्नेः शरभङ्गनाम्न इदं शरण्यं पावनं तपोवनं, य अपि समिद्भिः चिराय सन्तर्प्य मन्त्रपूतां तनुमपि अहौषीत्।

४५। वाच्यान्तर—येन मन्त्रपूता तनुः अहावि। आहितः अग्निः येन स तथा, आहिताग्न्यादित्वात् वा पूर्वनिपातः, तेन समासे 'आहिताग्निः,' 'अग्न्याहितः' इति रूपद्वयं भवति। पूर्वं शरभङ्गो नाम मुनिः रामदर्शनेन पूर्णकामः कृतहुताशने अग्नौ दग्ध्वा अपूर्वकुमाररूपं बिभ्रे, तेनैव च रूपेण ब्रह्मलोकम् आरुरोह इति अरण्यकाण्डे कथानुसन्धेया।

৪৫। শরণাগতরক্ষক আহিতাগ্নি শরভঙ্গ নামক মুনির এই পবিত্র তপোবন; যিনি দীর্ঘকাল যজ্ঞকাষ্ঠে অগ্নির তৃপ্তিসাধন করিয়া পশ্চাৎ তাহাতে মন্ত্রপূত নিজ শরীরও হোম করিয়াছেন।

45 Yonder is the hospitable and sanctifying hermitage of Sárabhanga the keeper of sacred fires who, though his body was purified by *Mantras*, offered it to the fire which had been long fed with fuel

छायाविनीताध्वपरिश्रमेषु
भूयिष्ठसम्भाव्यफलेष्वमीषु।
तस्यातिथीनामधुना सपर्य्या
स्थिता सुपुत्रेष्विव पादपेषु ॥ ४६ ॥

४६। छायेति। अधुना अस्मिन् काले, तस्य शरभङ्गस्य सम्बन्धिनी, अतिथीनां (१) सपर्य्या (२) अतिथिपूजा। "पूजा नमस्यापचितिः सपर्य्यार्च्चार्हणाः समाः" इत्यमरः। छायाभिः विनीतः

---

[४६] (१) अत to go, इथिन् aff. (अत सातत्यगमने, इथिन् प्रत्ययः), अथवा, न विद्यते तिथिर्यस्य सः, यदुक्तम्—'एकरात्रं निवसन् अतिथिर्ब्राह्मणः स्मृतः। अनित्यं हि स्थितो यस्मात् तस्मादतिथिरुच्यते'॥ (२) सपर to worship, य and टाप् affs. (कण्ड्वादिभ्यो यक्)

अपनीतः अध्वपरिश्रमः यैः तेषु, भूयिष्ठानि बहुतमानि हव्या-
यानि ग्राह्याणि फलानि येषां तेषु अमीषु पादपेषु आश्र-
सुपुत्रेष्विव पिता, सत्पुत्रैरिव पादपैरनुष्ठीयते इत्यर्थः ।

४८। अधुना तस्य (महर्षेः) आतिथेयी सपर्या, दानादिभिरतिथि-
सेवाभूयिष्ठफलापन्नेषु सुपुत्रेषु इव अमीषु पादपेषु स्थिता।

४९। यथा हि पितृकोऽतिथिसेवनकार्य अनपत्य पितृसेवकाः महार्ह-
दानधर्मादिभिः सम्यक् पालयन्ति, तथा अमी पुत्रतां गताः पादपाः महार्ह-
महारब्धाति पान्थादिश्रान्तान् पालयन्ति, ते स्निग्धया छायया श्रान्तान् पान्थान् तर्पयन्ति
फलैश्च भूयिष्ठमानुषान् तर्पयन्ति, इति विशदार्थः। सुविज्ञाः पुत्रनिर्विशेषं
पालितत्वात् पादपानां पुत्रसाम्यम्।

৪০। অধুনা তাঁহার অতিথিগণের সৎকারের ভার তাঁহার বৃক্ষপুত্র
সকল আশ্রমতরুর উপর অর্পিত আছে; বৃক্ষেরা ছায়া দান করিয়া পথশ্রম নিবা-
করিয়া থাকে, এবং প্রচুর পরিমাণে উৎকৃষ্ট ফল প্রদান করিয়া থাকে।

40 The sacred charge of his hospitality has now devolved on the trees (of his hermitage) which like worthy sons refresh weary travellers with their shadow and make them plentiful offerings of their excellent fruits.

धारास्वनोद्गारिदरीमुखोऽसौ
शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः ।
बध्नाति मे बन्धुरगात्रि चक्षुः
दृप्तः ककुद्मानिव चित्रकूटः ॥ ४७ ॥

४७। धारेति। धाराः निर्झराः, यद्वा धारया साव-
स्वनोद्गारि दरी (१) एव मुखं यस्य सः; शृङ्गं शिखरं विषाण
तस्य अग्रे लग्नः अम्बुदः एव वप्रपङ्कः वप्रक्रीडासक्तपङ्कः यस्य स.

[४७] (१) दॄ to pierce, अप् aff. (दर) and ङीप् aff. (...

असौ चित्रकूटः, हे बन्धुर-(२)-गात्रि ! उन्नतानताङ्गि ! "बन्धुरं तून्नतानतम्" इत्यमरः । दृप्तः ककुद्मान् (३) वृषभः इव, मे चक्षुः बध्नाति नान्यासक्तं करोति ।

४७। (हे) बन्धुरगात्रि ! धारास्वनोद्गारिदरीमुखः शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः असौ चित्रकूटः दृप्तः ककुद्मान् इव मे चक्षुः बध्नाति ।

४७। वाच्यान्तर—धारास्वनोद्गारिदरीमुखेन शृङ्गाग्रलग्नाम्बुदवप्रपङ्केन अमुना चित्रकूटेन दृप्तेन ककुद्मता इव मे चक्षुः बध्यते ।

४७। यथा हि कश्चित् मदोद्धतः वृषः मुखेन नादं मुञ्चन् विषाणेन च नदीतटपङ्कं धारयन् दर्शनीयतां याति, तथा असौ चित्रकूटः दरीभिः निर्झरशब्दं मुञ्चन् शिखरैश्च मेघं धारयन् मे चक्षुषामपि दर्शनीयतां याति, इति विशदार्थः । अत्र चित्रकूट-ककुद्मतोः द्वयोः मुख्यो वप्रपङ्क-पदश्लेष साहाय्य ग्रहणम् । 'वप्रपङ्क' —वप्रक्रीडापङ्कः । वृषभादयः मदोद्धताः पङ्कस्यार्थं नदीपर्वततटादिषु शृङ्गाभ्यां यत् क्रीडन्ति, सा वप्रक्रीडा, यथा शब्दार्णवे,—'उत्खातकेलिः शृङ्गाद्यैः वप्रक्रीडा निगद्यते' इति । 'बन्धुरगात्रि'—बन्धुराणि नतोन्नतानि अवयवविशिष्टानि गात्राणि यस्याः, तत्सम्बुद्धौ । एवम्भूतविशेषणपदं प्रायेण रूप-यौवनगर्वितया कान्तया प्रयुज्यते ।

৪৭। অয়ি বন্ধুরগাত্রি! যেরূপ উন্মত্ত বৃষভ উচ্চৈঃস্বরে নাদ করিতে থাকে, এবং নদীতটে আঘাতজনিত পঙ্ক শৃঙ্গাগ্রে ধারণ করে, সেইরূপ এই চিত্রকূট গুহামুখ হইতে নির্ঝরশব্দ উদ্গিরণ করিয়া এবং শিখরাগ্রে মেঘমালা ধারণ করিয়া আমার দৃষ্টিকে আকৃষ্ট করিতেছে।

47 O thou handsome! This Chitrakuta with its sounding waterfalls and its cloud-capped summits, attracts my eyes, like an infuriated bull belowing loudly and covering his horns with the mud of the river bank in his frantic sport.

---

मतुप् aff. (२) ककुद् hump. मतुप् aff. (ककुदस्ति यस्य, मतुप्प्रत्ययः, यवादित्वात् न वत्वम्)

एषा प्रसन्नस्तिमितप्रवाहा
सरिद्विदूरान्तरभावतन्वी ।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः ॥ ४८ ॥

४८ । एषेति । प्रसन्नः (१) निर्मलः स्तिमितः (२) निस्तब्धः प्रवाहः यस्याः सा, विदूरस्य अन्तरस्य मध्यवर्त्यवकाशस्य भावात् तन्वी दूरदेशवर्त्तित्वात् तनुत्वेन अवभासमाना, मन्दाकिनी (३) नाम काचित् चित्रकूटनिकटगा एषा सरित्, नगोपकण्ठे, भूमेः कण्ठस्था मुक्तावली इव, भाति । अत्र नगस्य शिरस्त्वं तदुपकण्ठस्य कण्ठता गम्यते ।

४८ । प्रसन्न स्तिमितप्रवाहा विदूरान्तरभावतन्वी एषा मन्दाकिनी सरित् नगोपकण्ठे भूमेः कण्ठगता मुक्तावली इव भाति ।

४८ । व्याख्यान्तर,—एतया [illegible] [illegible]

४८ । [illegible]

[illegible]

कामिनीकण्ठं परिधाय तिष्ठति। मुक्ताया निर्मलत्वादिगुणपर्यायो यथा मुक्तागुणप्रकरणे,—'स्वच्छं दोषवाच्यं [illegible] निर्मलं मलवर्जितम्। अपरेखाविहीनं [illegible] तत् स्यादस्फटित शुभम्' ॥ इति। सुदूरात् दर्शनेन विच्छिन्नतयापि मन्दाकिनीप्रवाहस्य मुक्ताहारेण तनुत्वम्।

४८। চিত্রকূটের উপকণ্ঠে ঐ মন্দাকিনী নদী দূর হইতে ক্ষীণভাবে লক্ষিত হইতেছে, উহার প্রবাহ স্থির ও নির্মল; পৃথিবীর কণ্ঠে যেন একগাছি মুক্তার হার শোভিতেছে।

48 The still and crystal stream of the Mandákiní flowing around its base and seen so slender from this distance, looks like a necklace of pearl round the neck of the earth

> अयं सुजातोऽनुगिरं तमालः
> प्रवालमादाय सुगन्धि यस्य ।
> यवाङ्कुरापाण्डुकपोलशोभी
> मयावतंसः परिकल्पितस्ते ॥ ४९ ॥

४९। अयमिति। गिरेः समीपे अनुगिरम्। 'गिरेश्च सेनकस्य' इति समासान्तष्टच्प्रत्ययः। सुजातः तमालः अयं दृश्यते। यस्य सुगन्धि शोभनः गन्धो यस्य तत् सुगन्धि। गन्धस्येत्यादिना इकारः 'समासान्तः'। प्रवालं पल्लवम् आदाय मया ते यवाङ्कुरवत् आपाण्डुरौ कपोलौ शोभेते य स अवतंसः (१) परिकल्पितः (२)।

४९। অদূরে এই সুজাত তমাল, যাহার সুগন্ধ প্রবাল আদায় করিয়া মৈ [illegible] যবাঙ্কুরাপাণ্ডুকপোলশোভী অবতংস পরিকল্পিত।

৪৯। [illegible],—অই যবাঙ্কুরাপাণ্ডুকপোলশোভিত অবতংস পরি-

---

[৪৯] (১) অব, তন্স to adorn, অনু [illegible] [illegible], [illegible] [illegible], [illegible] [illegible] [illegible] [illegible]; [illegible] [illegible] [illegible]) (২) পরি, কৃপ to be able, (ণিচ্) ক্ত [illegible]

অন্বিতঃ যান্। 'সুজাত'—সুষ্ঠু জাত', সম্যক্ সম্পূর্ণাবয়ব ইত্যর্থঃ। 'অবতংস' ইত্যত্র 'বতংস' ইত্যপি পদং ভবতি, 'অব' 'অপি' ইত্যেতয়োঃ অকারস্য বৈকল্পিকলোপবিধানাৎ, তেন চ,—অবতংস', বতংস; অবগাহ, বগাহ; পিধান, অপিধানম্, ইত্যাদিপদানি ভবন্তি।

৪৯। পর্ব্বতের নিকট ঐ সেই সতেজ তমালবৃক্ষটি দেখা যাইতেছে, আমি যাহার সুগন্ধি পল্লব লইয়া তোমার কর্ণভূষা রচনা করিয়াছিলাম, তাহা তোমার যবাঙ্কুর-পাণ্ডুর কপোলদেশে শোভিয়াছিল।

49. Yonder is the full grown Tamála tree in the vicinity of the mountain, with whose scented leaves I wrought the earring which adorned thy temples possessing the tender whiteness of young shoots of barely

अनिग्रहत्रासविनीतसत्त्वम् ।
अपुष्पलिङ्गात् फलबन्धिवृक्षम् ।
वनं तपःसाधनमेतदत्रेः
आविष्कृतोदग्रतरप्रभावम् ॥ ५० ॥

৫০। অনিগ্রহেতি। অনিগ্রহত্রাসা, (১) দণ্ডভয়ং বিনা অপি বিনীতাঃ শান্তাঃ সত্ত্বাঃ জন্তবঃ যস্মিন্ তৎ, অপুষ্পলিঙ্গাৎ পুষ্পরূপলিঙ্গং বিনা অপি, ফলবন্ধিনঃ (২) ফলযোগিনঃ বৃক্ষাঃ যস্মিন্ তৎ, আবিষ্কৃতোদগ্রতরপ্রভাবম্, অত্রেঃ মুনেঃ তপসঃ সাধনং (৩) বনম্ ইদম্।

৫০। [illegible]

৫০। [illegible]

[illegible]

तत्। 'तपःसाधनं वनं' तपोवनम्। अहो प्रभावो महर्षेः यत्र श्वापदा दण्डभयं विनापि दुष्टा जन्तवः शान्तिवैरं विहाय विनीताः सञ्चरन्ति, कुसुमजन्म विनापि च शाखिनः सर्वे फलानि अर्पयन्ति, इति विशदार्थः। अनुरूपभावो यथा कादम्बर्यां,—'अहो प्रभावो महात्मनाम् अत्र हि शान्ततम् अपहाय विरोधम् उपशान्तात्मानस्तिर्यञ्चोऽपि तपोवनवसतिसुखम् अनुभवन्ति' इति।

৫০। এই অত্রি মুনির তপোবন, ইঁহা তাঁহার কোথায় তপঃপ্রভাব প্রকাশ করিতেছে, এখানে দণ্ডভয় নাই অথচ জন্তুগণ বিনীতভাবে বাস করে, বিনা পুষ্পেই বৃক্ষসকলে ফল ধরিয়া থাকে।

50　Yonder is the hermitage of Atri, where animals, though free from the fear of punishment live in amity and trees bear fruits without previously bearing flowers, and which seems breathing out majesty on all sides

अत्राभिषेकाय तपोधनानां
सप्तर्षिहस्तोद्धृतहेमपद्माम्।
प्रवर्त्तयामास किलानसूया
त्रिस्रोतसं त्र्यम्बकमौलिमालाम्॥ ५१॥

५१। अत्रेति अत्र वने अनसूया अत्रिपत्नी, सप्त च ते ऋषयश्च सप्तर्षयः। दिक्संख्ये संज्ञायामिति समासः। तेषां हस्तैः उद्धृतानि हेमपद्मानि यस्याः तां, त्र्यम्बक (१)-मौलिमालां हरशिरः-स्रजं त्रिस्रोतसं (२) भागीरथीं, तपोधनानाम् ऋषीणाम्, अभिषेकाय स्नानाय, प्रवर्त्तयामास (३), किलेत्यैतिह्ये।

---

[५१] (१) त्रि three, and अम्बक eye, having three eyes (२) त्रि three, स्रोतस् stream, a river with three channels (३) प्र, वृत् to stay, (णिच्),—वर्त्तयति। वर्त्तनम्। अवीवृतत्-अववर्त्तत्। &c.

५१। अथ अनसूया सप्तर्षिहस्तोद्धृतहेमपद्मां त्र्यम्बकमौलिमालां त्रिस्रोतसं तपोधनानाम् अभिषेकाय प्रवर्तयामास किल।

५१। त्र्यम्बकस्य मौलिः, तस्य माला, ताम्। त्रीणि स्रोतांसि यस्याः सा त्रिस्रोताः, ताम्। तप एव धनं येषां ते, तेषाम्। वाच्यान्तर,—अनसूयया सप्तर्षिहस्तोद्धृतहेमपद्मा त्र्यम्बकमौलिमाला त्रिस्रोताः प्रवर्तयाञ्चक्रे।

५१। सप्तर्षिहस्तेत्यादिविशेषणेन ऊर्द्ध्वलोकप्रवाहिनी मन्दाकिनी [illegible] इति गम्यते, सप्तर्षिमण्डलस्य ऊर्द्ध्वलोके अवस्थानात्। [illegible]

[illegible]

५१। It is said that, Anasuya (the wife of Atri) caused the Ganges to flow through this spot for the ablutions of the sages, the Ganges which formed a garland round (the head) of [illegible] and whose golden lotuses were plucked by the seven Rishis.

वीरासनैर्ध्यानजुषामृषीणाम्
अमी समध्यासितवेदिमध्याः ।
निवातनिष्कम्पतया विभान्ति
योगाधिरूढा इव शाखिनोऽपि ॥ ५२ ॥

५२। वीरेति। वीरासनैः जयसाधनैः . ध्यानं जयन्ते सेवन्ते ध्यानजुषः (१) तेषां तैः उपविश्य ध्यायताम् ऋषीणां सम्बन्धिनः समध्यासित-(२) वेदिमध्याः । इदं वीरासनस्थानीयम् । अमी शाखिनः अपि, निवातनिष्कम्पतया, योगाधिरूढा इव ध्यानभाजः इव विभान्ति । ध्यायन्तोऽपि निश्चलाङ्गा भवन्ति । वीरासने वसिष्ठः, "एकपादमथैकस्मिन् विन्यस्योरौ तु संस्थितम् । इतरस्मिं-स्तथा चान्यं वीरासनमुदाहृतम्" । इति ।

५२। [illegible]

५२। [illegible]

५२। [illegible]

[५२] (१) [illegible]

[illegible] यदुक्तं,—"[illegible]" [illegible] इति। "वीरासने",—[illegible] वीरासनं यदा तथा [illegible]। [illegible] यदा [illegible] [illegible] इति। [illegible]

৫২। ঋষিগণ বীরাসনে যোগে নিমগ্ন আছেন, উঁহাদের বেদিকার মধ্যস্থিত ঐ সকল বৃক্ষ বায়ুসঞ্চারবিরহে স্থির হইয়া আছে, উহাদিগকেও যেন যোগমগ্ন বোধ হইতেছে।

52. Those trees in the midst of the alters on which ascetics are seated cross-legged (বীরাসন) engaged in deep meditation, being perfectly still in the calm air, seem also immersed in meditation

त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां
सपद्मरागः फलितो विभाति ॥ ५३ ॥

५३। त्वयेति। त्वया, पुरस्तात् पूर्वं, यः उपयाचितः प्रार्थि[illegible] यथा च रामायणे, "न्यग्रोधं तमुपागम्य वैदेही वाक्यमब्रवीत्। नमस्तेऽस्तु महावृक्ष ! पारयेन्मे व्रतं पतिः ॥" इति। श्याम इति प्रतीतः (१) स वटः अयं फलितः (२) सन्, सपद्मरागः गारुडानां (३) मणीनां मरकतानां राशिः इव, विभाति।

[५३] (१) प्रति, इ(ण) to go, क्त aff. (२) फल fruit, इतच् aff. (३) गरुड, अण् aff.

५७। त्वया पुरस्तात् उपयाचित श्याम इति प्रतीत सः वट अय फलित (सन्) सपद्मराग, गारुडानां मणीनां राशिरिव विभाति।

५८। पद्मरागै सह वर्तत इति सपद्मराग, तुल्ययोगे बहुव्रीहि। वाच्या-न्तरं,—उपयाचितेन श्याम इति प्रतीतेन तेन अनेन वटेन फलितेन, गारुडानां मणीनां राशिना सपद्मरागेण इव विभाव्यते।

५९। यथा हि श्यामवर्णो मरकतमणिराशि रक्तवर्णै पद्मरागमणिभि अनुविद्ध शोभते, तथा श्यामपत्रराशिभूषित अयो श्यामवट रक्तवर्णै फलै अलङ्कृत शोभते। अत्र पत्राणां श्यामत्वात् गारुडमणिसाम्य, फलानाञ्च रक्त-त्वात् पद्मरागमणिसाम्यम्। अतएव श्यामपत्रशोभितत्वादेव तस्य श्यामवट इत्याख्या इति मन्यामहे। पद्मरागो रक्तवर्णमणिभेद। मरकतापरनामा गारुडो मणि, स च श्यामवर्णो हरितवर्णो वा।

६०। পূর্ব্বে তুমি যাহার নিকট প্রার্থনা করিয়াছিলে এই সেই শ্যামবট, বৃক্ষটি ফলিত হওয়াতে যেন পদ্মরাগযুক্ত মরকতরাশির ন্যায় শোভিতেছে।

53 Yonder is the tree known as the S'yámavata, to which didst thou offer thy prayers, and which appears with its red fruits, like a heap of emeralds studded with rubies (चाकर)

क्वचित् प्रभालेपिभिरिन्द्रनीलैः
मुक्तामयी यष्टिरिवानुविद्धा।
अन्यत्र माला सितपङ्कजानाम्
इन्दीवरैरुत्खचितान्तरेव ॥ ५४ ॥

६१। क्वचिदित्यादिभिश्चतुर्भिः श्लोकैः प्रयागे गङ्गायमुना-सङ्गमं वर्णयति, क्वचिदिति। हे अनवद्याङ्गि! यमुनातरङ्गैः भिन्नप्रवाहा मिश्रौघा, गङ्गा जाह्नवी, विभाति। केव? क्वचित्

[५४] (१) प्रभा lustre, लिप् to smear, णिन [illegible] (कर्तरि)। (२) इन्द्र best, and नील blue. (इन्द्रनीलपरीक्षा यथा,—"नीलमध्ये स्थितेन्

अन्यत्र कालागुरुणा दत्तपत्रा रचितमकरिकापत्रा भुवः चन्दन कल्पिता भक्तिः (२) इव।

৫৫। কোথাও যেন মানসসরোবরপ্রিয় শ্বেত রাজহংসশ্রেণী নীলহংসের সহ মিলিত হইয়াছে, কোথাও যেন পৃথিবীর শ্বেতচন্দনময়ী রচনা কৃষ্ণচন্দনের পত্রাবলী ধারণ করিয়াছে।

55 In other places,—like a flock of white geese, whose favourite haunt is Mánasa (lake), intermixed with blue swans (कादम्ब—geese with dark-grey wings); in other places,—like a floor painted with white sandal and inlaid with ornamental leaves painted with black sandal.

क्वचित् प्रभा चान्द्रमसी तमोभिः
छायाविलीनैः शबलीकृतेव।
अन्यत्र शुभ्रा शरदभ्रलेखा
रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥ ५६ ॥

५६। क्वचिदिति। क्वचित् छायासु विलीनैः (१) छिद्रैः तमोभिः शबलीकृता (२) कर्बुरीकृता, चान्द्रमसी (३) चन्द्रिका इव। अन्यत्र रन्ध्रेषु आलक्ष्यनभःप्रदेशा शुभ्रा शरदभ्र लेखा शरत्की घनपङ्क्तिः इव।

৫৬। কোথাও যেন [illegible]

[illegible]

क्वचिच्च कृष्णोरगभूषणेव
भस्माङ्गरागा तनुरीश्वरस्य।
पश्यानवद्याङ्गि विभाति गङ्गा
भिन्नप्रवाहा यमुनातरङ्गैः ॥ ५७ ॥

५७। क्वचिदिति। क्वचित् कृष्णोरगभूषणा (१) भस्माङ्गरागा ईश्वरस्य (२) तनु इव विभाति। शेषं व्याख्यातं। कलापकम्।

৫৭। কোথাও যেন কৃষ্ণবর্ণ অজগরে বিভূষিত ভস্মলিপ্ত মহাদেবের শরীর হইয়া রহিয়াছে।

57. And in other places,—like the ash-smeared body of Îśwara (মহাদেব) entwined with black serpents.

समुद्रपत्न्योर्जलसन्निपाते
पूतात्मनामत्र किलाभिषेकात्।
तत्त्वावबोधेन विनापि भूयः
तनुत्यजां नास्ति शरीरबन्धः ॥ ५८ ॥

५८। समुद्रेति। अत्र समुद्रपत्न्योः गङ्गायमुनयोः जलसन्निपाते (१) सङ्गमे, अभिषेकात् स्नानात्, पूतात्मना तनुत्यजां (२) पुंसां, तत्त्वावबोधेन तत्त्वज्ञानेन, विनापि प्रारब्धशरीरत्यागानन्तरं, भूयः पुनः शरीरबन्धः शरीरयोगः, नास्ति किल। अन्यत्र ज्ञानादेव मुक्तिः अत्र स्नानादेव मुक्तिः इत्यर्थः।

---

[৫৭] (১) कृष्ण black, and उरस् breast, गम् to go, ड aff (उरग) and भूषण ornament (२) ईश् to rule, वरच् aff

[৫৮] (১) जल water, and सम्, नि, पत् to fall, घञ् aff (२, तनु, body), त्यज् to quit, क्विप् aff. (तनुत्यज्),

५८। अत्र समुद्रपत्न्योः जलसन्निपाते अभिषेकात् पूतात्मनां तनुत्यजां तत्त्वबोधेन विनापि भूयः शरीरबन्धः न अस्ति किल।

५८। पूत आत्मा अन्तःकरणं येषां ते पूतात्मानः, तेषाम्। तनुं त्यजन्ति ये ते तनुत्यजः, तेषाम्। अत्र गङ्गायमुनासङ्गमे स्नानात् ईदृश सर्वपापेभ्यो मुच्यन्ते देहान्ते च मोक्षं लभन्ते, अत्र कृतस्नाना ईदृश मोक्षाय तत्त्वज्ञानम् अपेक्षन्ते, इति निष्कर्षः। प्रयागे स्नानफलं यथा महाभारते युधिष्ठिर-मार्कण्डेयसंवादे,—युधिष्ठिर उवाच। 'भगवन् श्रोतुमिच्छामि प्रयागगमने फलम्। मृतानां का गतिस्तत्र स्नातानामपि किं फलम्॥...मार्कण्डेय उवाच। कथयिष्यामि ते वत्स! या चेष्टा यच्च तत्फलम्। पुरा महर्षिभिः सम्यक् कथ्यमानं मया श्रुतम्॥ यत्र स्नाता दिवं यान्ति ये मृतास्तेऽपुनर्भवाः'॥ इत्यादि।

৫৮। যাঁহারা এই দুই সমুদ্রপত্নীর (গঙ্গা যমুনার) সঙ্গমে স্নান করিয়া আত্মাকে পবিত্র করেন তাঁহাদের তত্ত্বজ্ঞান না হইলেও এ দেহের অবসানে আর দেহবন্ধ হয় না।

58. Those who are purified by ablution in the confluence of the waters of the two spouses of the ocean, even though devoid of spiritual knowledge, never assume again this mortal form.

पुरं निषादाधिपतेरिदं तत्
यस्मिन् मया मौलिमणिं विहाय ।
जटासु बद्धास्वरुदत् सुमन्त्रः
कैकेयि कामाः फलितास्तवेति ॥ ५९ ॥

५९। पुरमिति। निषादाधिपतेः गुहस्य तत् पुरम् इदं, यस्मिन् पुरे मया मौलि-(१)-मणिं विहाय, जटासु बद्धासु रचितासु सतीषु, सुमन्त्रः हे कैकेयि! तव कामाः (२) मनोरथाः, फलिताः सफलाः जाताः, इति अरुदत्। वटदुग्धविमोचने गुहः।

[५९] (१) मूल a root or base, इन् aff. (२) कम to desire, घञ् aff.

५९। निषादाधिपतेः तत् पुरम् इदं, यस्मिन् मया मौलिमणिं विहाय जटासु बद्धासु सुमन्त्रः '(हे) कैकेयि ! तव कामाः फलिताः', इति अरुदत् ।

५९। सुमन्त्रेण अरोदि इति वाच्यान्तरम् ।

५९। अधुना राजवेशे त्यक्ते च मया तापसवेशे, धृते मयि वत्सल सुमन्त्र तदा विगलितधैर्यः सरोदनम् उवाच ; हन्त हे कैकेयि ! इदानीं पूर्णास्ते मनोरथाः । रामस्य जटाबन्धनादर्शनेन रामवनवासरूपं कैकेय्या अभीष्टं सिद्धम् इति सुमन्त्राभिप्रायः । 'निषादाधिपतेः'—रामस्य सहचरस्य गुहस्य । 'पुरं'—शृङ्गबेर नाम नगरम् ।

৫৯। এই সেই নিষাদপতির নগর, যথায় আমি মস্তকের মণি উন্মোচন করিয়া জটাভার ধারণ করিলে, সুমন্ত্র অবনি রোদন করিয়া বলিয়াছিলেন,—কৈকেয়ি ! তোমার মনোরথ পূর্ণ হইল ।

59 Yonder is the city of the king of Nishâda, where on my casting down the gem on my head and assuming the clotted hair, Sumantra with tears in his eyes cried out,—Oh Kaikeyi ! your intentions are fulfilled

> पयोधरैः पुण्यजनाङ्गनानां
> निर्विष्टहेमाम्बुजरेणु यस्याः ।
> ब्राह्मं सरः कारणमाप्तवाचः
> बुद्धेरिवाव्यक्तमुदाहरन्ति ॥ ६० ॥

६०। पयोधरैरिति। पुण्यजनाङ्गनानां यक्षस्त्रीणां, पयोधरैः (१) स्तनैः, निर्विष्टः उपभुक्तः हेमाम्बुजरेणुः यस्य तत् । तच्च तत् ब्राह्ममिति कथ्यते । ब्रह्मणः इदं ब्राह्मम् (२) । तस्येदम् इति टिलोपः । ब्राह्मं सरः मानसाख्यं, यस्याः सरय्वाः बुद्धेः महत्तत्त्वस्य, अव्यक्तं (३) प्रधानम् इव, कारणम्, आप्तस्य वाच आप्तवाचः वेदाः,

[६०] (१) पयस् water, धृ to hold, अच् aff. (२) ब्रह्मन् the creator, अण् aff. (३) न neg. वि, अञ्ज् to make clear, क्त aff.

यथा साङ्ख्यविदो मुनयः, 'आप्ताः सत्याः वाचः वचनानि येषां ते' उदाहरन्ति प्रकथयन्ते।

६०। पुलिनजनाङ्गनानां पयोधरैः निर्विष्टैः आप्लवनैः ब्राह्मं सरः यदा मूलं, अव्यक्तम् इव कारणम् आप्तवाचः उदाहरन्ति।

६०। आप्तवाग्भिः उदाह्रियते इति वाच्यान्तरम्।

६०। यथा हि बुद्धितत्त्वम् अव्यक्तात् उत्पन्नं, तथा या सरयूः ब्राह्मसरसः उत्पन्ना इति ध्येयम्। यथा हि सूक्ष्मरूपेण अवस्थिता मूलप्रकृतिरेव स्थूलरूपेण व्याकृता सती महत्तत्त्वनाम्ना अभिधीयते, तथा सूक्ष्मजलभागरूपेण अवस्थितं ब्राह्मं सरएव स्थूलवारिरूपेण व्याप्तं सरयूनाम्ना अभिधीयते, सूक्ष्मस्य स्थूलेऽभिव्यक्तिदर्शनात् इति भावः। अव्यक्तमहत्तत्त्वयोरिव सरयूः च सामान्यं अभिप्रायः। 'अव्यक्त' नाम साङ्ख्यमते सर्वकार्यं स्वादिहीनतया [illegible] प्रधानं, वेदान्तमते मायोपाधिकं ब्रह्म। सर्वजगत्कारणभूता सर्वं सूक्ष्मरूपेण अवस्थिता मूलप्रकृतिरेव 'अव्यक्तम्' इत्यर्थः। अव्यक्तस्य नामभेदाः यथा,—मूलप्रकृतिः, शक्तिः, अजा, माया, अविद्या, प्रधानं, ब्रह्म, इत्यादयः। यथा हि बीजात् अङ्कुरः, अङ्कुरात् स्कन्धः, स्कन्धात् शाखाः, इत्यादिक्रमेण एकस्मात् सूक्ष्मात् बीजात् महावृक्षो जायते, तथा सूक्ष्मात् ('अव्यक्तात्') महान्, महतः अहङ्कारः, अहङ्कारात् पञ्चतन्मात्राणि, पञ्चतन्मात्रेभ्यः पञ्चभूतानि इत्यादिक्रमेण एकस्या एव सूक्ष्मायाः मूलप्रकृतेः स्थूलाकारं जगदिदं जायते इति साङ्ख्याः मन्यन्ते। तदुक्तं गीतायाम्,—'अव्यक्ताद्व्यक्तयः सर्वाः [illegible] [illegible]

[illegible]

ই ব্রাহ্মসরোবর,—অব্যক্ত (প্রকৃতি) যেরূপ বুদ্ধির কারণ, সেইরূপ যাঁহার (যে
পূর) উৎপত্তিকারণ, ইহা আপ্তবাক্য (বেদ বা ঋষিবাক্য) নির্দেশ করিয়া থাকে।
[ যেমন একটি সূক্ষ্ম বীজের ক্রমবিকাশ হইতে ক্রমে প্রকাণ্ড বৃক্ষ উৎপন্ন হয়, তেমনি
যক্ত' অর্থাৎ মূলপ্রকৃতির ক্রমবিকাশ হইতে এই প্রকাণ্ড জগৎ উৎপন্ন হইয়াছে। এই
প্রকৃতি অব্যক্তরূপে অর্থাৎ বীজের ন্যায় অতি সূক্ষ্মরূপে অবস্থিত বলিয়া ইহার নাম
ব্যক্ত'। এই 'অব্যক্ত' হইতে প্রথমে বুদ্ধি নামক মহত্তত্ত্ব উৎপন্ন হয়। বুদ্ধি হইতে
হঙ্কার, অহঙ্কার হইতে একাদশ ইন্দ্রিয় ও পঞ্চতন্মাত্র, পঞ্চতন্মাত্র হইতে পঞ্চভূত,
ত্যাদি ক্রমে জগৎ উৎপন্ন হইয়াছে। সূক্ষ্ম অবস্থার রূপ, রস, গন্ধ, স্পর্শ, শব্দ, এই
াঁচটিকে পঞ্চতন্মাত্র বলে। ]

60. Yonder is the Sarayū. As the intellect has its origin in the eternal essence, so this Sarayū according to trustworthy authorities, has her origin in the Brahma lake whose golden lotuses supply the Yaksha women with pollen for the adornment of their breasts.

जलानि या तीरनिखातयूपा
वहत्ययोध्यामनु राजधानीम् ।
तुरङ्गमेधावभृथावतीर्णैः
इक्ष्वाकुभिः पुण्यतरीकृतानि ॥६१॥

६१। जलानीति। [illegible] दार्षादिदीप।
तीरनिखातयूपा या सरयूः, तुरङ्गमेधा (१) अश्वमेधा तेषु अवभृथा-
र्थमेव अवतीर्णैः अवगाढैः, इक्ष्वाकुभिः इक्ष्वाकुगोत्रापत्यैः न पूर्वैः।
महाजनादयो गुरु। [illegible] पुण्यानि
जलानि, अम्भांसि, अयोध्या [illegible] समीपे. तदा
लक्षितया इत्यर्थः।

६१। तीरनिखातयूपा या (सरयूः) तुरङ्गमेधावभृथावतीर्णैः इक्ष्वाकुभिः पुण्यतरीकृतानि जलानि अयोध्यां राजधानीम् अनु वहति।

६१। तीरेषु निखाता यूपाः यस्याः सा। अपुण्यतराणि पुण्यतराणि कृतानि पुण्यतरीकृतानि। वाच्यान्तर,—तीरनिखातयूपया यया जलानि उह्यन्ते, इति।

६१। यस्याः सरय्वास्तीरेषु यज्ञस्तम्भदारवो निखाता दृश्यन्ते। अनेन स्वपूर्व्वपुरुषाणां यज्ञसमृद्धिमत्त्वं सूचितम्। या च सरयूः अयोध्याभिमुखवाहिनी। अनेन निजराजधान्याः परमपवित्रत्वं परमरमणीयत्वञ्च सूचितम्। इक्ष्वाकुवंश्या राजानः अश्वमेधसमाप्तेः अनन्तरं अवतीर्य दीक्षान्तस्नानेन यस्याः सरय्वाः स्वतः पवित्राण्यपि जलानि पवित्रतराणि कृतवन्तः। अनेन निजपूर्व्वपुरुषाणां परमपावनत्वं सूचितम्। दीक्षान्तस्नानम् अवभृथः यज्ञावसानस्नानमित्यर्थः।

৬১। যাঁহার তীরে যজ্ঞীয় যূপাবলী নিখাত রহিয়াছে; যিনি নিজ জলরাশিকে অযোধ্যা রাজধানীর সমীপ দিয়া প্রবাহিত করিয়াছেন, ইক্ষ্বাকুবংশীয় ভূপালগণ অশ্বমেধ সমাপন করিয়া দীক্ষান্তস্নানের নিমিত্ত অবতরণ করিয়া যদীয় পবিত্র জলকে অধিকতর পবিত্র করিয়াছেন।

61. She, on whose banks are fixed the sacrificial posts (यूप), bears, close past the capital Ayodhyá, her sacred volume of waters made more sacred by the ablutions of the decendants of Ikshwáku after the performance of the A'swamedha sacrifice.

यां सैकतोत्सङ्गसुखोचितानां
प्राज्यैः पयोभिः परिवर्द्धितानाम्।
सामान्यधात्रीमिव मानसं मे
सम्भावयत्युत्तरकोशलानाम् ॥६२॥

दिना मृगादम) and मेध sacrifice (२) वह to bear,—वहति। अवभृ
अवतीर्णः। इत्यादि। &c

६२। यामिति। यां सरयूं, मे मानसं कर्त्तृ, सैकतं पुलिनं तत् एव उत्सङ्गः तत्र यत् सुखं तत्र उचितानां (१), प्राज्यैः (२), प्रभूतैः, पयोभिः अम्बुभिः क्षीरैश्च। "पयः क्षीरं पयोऽम्बु च" इत्यमरः। परिवर्द्धितानां पुष्टानाम् उत्तरकोशलानाम् उत्तरकोशले-श्वराणां, सामान्यधात्रीं साधारणमातरम् इव, सम्भावयति। "धात्री जनन्यामलकी वसुमत्युपमातृषु" इति विश्वः।

६२। यां (सरयूं) मे मानसं, सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्द्धितानाम् उत्तरकोशलानां सामान्यधात्रीम् इव सम्भावयति।

६२। वाच्यान्तर.—या मे मानसेन सामान्यधात्रीव सम्भाव्यते।

६२। यथा हि पुत्रा मातुः क्रोडम् आश्रित्य कामपि प्रीतिम् अनुभवन्ति मातुः स्तनक्षीरं च प्रचुरं पीत्वा वर्द्धन्ते, तथा अयोध्याधीशाः सर्वे राजानः यस्याः सरय्वाः पुलिनम् आश्रित्य कामपि प्रीतिम् अनुभवन्ति प्रचुरतोयम् सलिलञ्च पीत्वा वर्द्धन्ते, अतो मे हृदयम् अयोध्यापतीनां साधारणमातरमिव यां सरयूं भक्त्या पूजयति, इति निष्कर्षः। इक्ष्वाकूणाम् अतिप्रभूतकालादिनी धारयित्री जननीव या सरयूरिति भावः। एवञ्च मया साधारणजननीसाम्यम् आरोपितम्, यथा,—'अशेषा-मसदृष्टा पुत्रिणां इदं च। धर्मशासनां तव जननीमिव चिन्तयाम्' इति। अतिकोमलत्वात् सुखास्पदत्वाच्च सैकतोत्सङ्गयोः साम्यं, सैकतं हि नवार्द्र-वालुकामयत्वात् जननीक्रोडवत् सुखदं भवति। मधुरत्वात् जीवनाधायकत्वाच्च क्षीरपयसोः साम्यम्। 'सम्भावयति'—सम्मानयति भक्त्या पूजयतीति यावत्।

৬২। উত্তরকোশলার (অযোধ্যার) অধীশ্বরগণ চিরকাল মাতৃক্রোড়ের ন্যায় যাঁহার পুলিনে সুখানুভব করেন, মাতৃদুগ্ধের ন্যায় যাঁহার সলিলপানে বর্দ্ধিত হইয়া থাকেন, অতএব উঁহাদের সাধারণজননীজ্ঞানে আমার হৃদয় যাঁহাকে পূজা করিতেছে।

62 My mind reveres her as the common mother of the kings of Uttarakosalá (अयोध्या), who were wont to play on her

[६२] (१) वच् to speak, क्तिन् aff (वचिस्वपियजादीनां किति) (२) प्र, अश् to pervade, ण्यत् aff. (प्राज्य).

६४। विरक्तसन्ध्याकपिशं पार्थिवं रजः पुरस्तात् यतः उज्जिहीते, हनूमत्कथितप्रवृत्तिः भरतः ससैन्यः (सन्) मां प्रत्युद्गत (इति) मन्ये ।

६४। वाच्यान्तर,—विरक्तसन्ध्याकपिशेन पार्थिवेन रजसा उह्यते, इह 'उज्जिहीते',—गत्यर्थो हाधातु जुहोत्यादिगणीय, अत्र तु उत्पूर्वः उदय 'प्रवृत्ति',—वार्त्ता, 'वार्त्ता प्रवृत्तिर्वृत्तान्तः' इत्यमरः ।

৬৪। অতিমাত্র লোহিত সন্ধ্যার ন্যায় তাম্রবর্ণ ঐ ধূলিরাশি যখন সম্মুখ হইতে উত্থিত হইতেছে, তখন বোধ করি, ভরত হনূমানের প্রমুখাৎ আগমনবার্ত্তা শুনিয়া সসৈন্যে আমার প্রত্যুদ্গমন করিয়াছে।

64 The cloud of dust, like the scarlet twilight, rising upwards from the ground in my front, makes me think that Bharata, (previously) informed of my arrival by Hanumán, is advancing to receive me with the army.

अद्धा श्रियं पालितसङ्गराय
प्रत्यर्पयिष्यत्यनघां स साधुः ।
हत्वा निवृत्ताय मृधे खरादीन्
संरक्षितां त्वामिव लक्ष्मणो मे ॥ ६५ ॥

६५। अद्धेति। किं च, साधुः सज्जनः सः भरतः। "साधुर्वार्द्धुषिके चारौ सज्जने चाभिधेयवत्" इति विश्वः। पालितसङ्गराय (१) पालितपितृप्रतिज्ञाय, मे मह्यम्, अनघाम् भोगाभावात् अनुच्छिष्टां किन्तु संरक्षितां, श्रियम्, मृधे (२) खरादीन् हत्वा निवृत्ताय मे, लक्ष्मणः संरक्षिताम् अनघां त्वामिव प्रत्यर्पयिष्यति (३) अद्धा (४) सत्यम्। "सत्ये त्वद्धाञ्जसा द्वयम्" इत्यमरः।

[६५] (१) गॄ to swallow, with सम् to promise, ... (२) मृध to hurt, ... (३) ऋ to go, (णिच्) ...

६५। साधु स पालितसङ्गराय मे अनघां सरक्षितां श्रियं, यथो खरादीन् हत्वा निहताय (मे) लक्ष्मण (अनघां सरक्षितां) त्वाम् इव अद्य प्रत्यर्पयिष्यति।

६५। पालितः सङ्गरो येन स, तस्मै। पाठान्तर,—साधुना तेन लक्ष्मणेन अनघा सरक्षिता श्रीः प्रत्यर्पयिष्यते, इत्यादि।

६५। खरदूषणादिभिः सह युद्धकाले यथा लक्ष्मण त्वां रक्षितवान् युद्धात् प्रत्यागताय च मह्यं निष्पापां त्वां प्रत्यर्पितवान्, तथा मम वनवासकाले भरत, राजलक्ष्मीं सम्यक् रक्षितवान्, अधुना वनवासात् प्रत्यागताय मह्यम् अनुपभुक्तां तां राजलक्ष्मीं ध्रुवं प्रत्यर्पयिष्यति, इति निष्कर्षः। साधु धार्मिक, न खलु धार्मिक निषिद्धं (राज्यसुखम्) स्वयं उपभुङ्क्ते इत्यभिप्रायः। खरादिवधे लक्ष्मणस्य सीतारक्षणं रामायणे उक्तं,—'भद्रे विजयागमनात् यावत् सीताञ्च लक्ष्मण' इति। 'सङ्गर'—प्रतिज्ञा, 'अथ प्रतिज्ञाजिसंविदापत्सु सङ्गरः' इत्यमरः।

৬৫। আমি যেমন খরাদিকে সংহার করিয়া প্রত্যাগমন করিলে লক্ষ্মণ যেরূপ সুরক্ষিত ও নির্মল তোমাকে আমার হস্তে অর্পণ করিয়াছিল, সেইরূপ এক্ষণ ভরত পিতৃর আজ্ঞা পালন পূর্ব্বক আমাকে প্রত্যাগত দেখিয়া নিশ্চয়ই সুরক্ষিত ও অদূষিত রাজলক্ষ্মীকে প্রত্যর্পণ করিবে।

65 On my return after carrying out the injunction (of my father), honest Bharata will certainly restore to me the royal fortune in a state of purity, as Lakshmana after having carefully protected thee restored thee to me, on my return from the battle in which I killed Khara and others.

असौ पुरस्कृत्य गुरुं पदातिः
पश्चादवस्थापितवाहिनीकः।
हृद्धैरमात्यैः सह चीरवासाः
मामर्घ्यपाणिर्भरतोऽभ्युपैति ॥ ६६ ॥

६६। असाविति। असौ पदातिः पादचारी, चीरवासाः वल्कलवसनः, भरतः, पश्चात् (१) पृष्ठभागे, अवस्थापिता वाहिनी

सेना येन सः तथोक्तः सन्। नद्युतस्येति भाम्। गुरुं वशिष्ठं पुर
स्कृत्य. वृद्धैः चामात्यैः (२) सह, अर्घ्यपाणिः सन्, माम् अभ्युपैति

६६। असौ पदातिः चीरवासाः भरत, पश्चात् अवस्थापितवाहिनीक
(सन्) गुरुं पुरस्कृत्य वृद्धैः अमात्यैः सह अर्घ्यपाणिः (सन्) माम् अभ्युपैति।

६६। पादाभ्याम् अततीति पदातिः, पादस्य पदिद्यादिना पदादेश
चीरं वासो यस्य सः। अर्घ्यं पाणौ यस्य सः। वाच्यान्तर,—अमुना पदाति
पश्चादवस्थापितवाहिनीकेन चीरवाससा अर्घ्यपाणिना भरतेन अहम् अभ्युपेये।

६६। भरतोऽयं मत्पूजनार्थम् अर्घ्यपात्रम् गृहीत्वा पादचारेण मत्सकाश
मायाति, असौ मद्वत् वल्कलं परिधत्ते, [illegible] अग्रत पूज्य
कुलगुरु वशिष्ठं पृष्ठत सेना पार्श्वतश्च मन्त्रिन् अभिवृद्धान् कृत्वा आगच्छ
इति विशदार्थः।

৬৬। বল্কলধারী ঐ ভরত, গুরু বশিষ্ঠদেবকে পুরোভাগে এবং সৈন্যগণকে পশ্চা
দ্ভাগে রাখিয়া প্রাচীন অমাত্যগণের সহিত, অর্ঘ্যপাত্রহস্তে পাদচারে আমার নিকট
আসিতেছে।

66 Bharata, clad in bark and holding in his hand the offerings for salutation, comes walking towards me, with our priest before and the army behind him, and accompanied by the aged ministers

पित्रा विसृष्टां मदपेक्षया यः
श्रियं युवाप्यङ्कगतामभोक्ता।
इयन्ति वर्षाणि तया सहोग्रम्
अभ्यस्यतीव व्रतमासिधारम्॥ ६७॥

६७। पित्रेति। यः भरतः, पित्रा विसृष्टां दत्ताम्, अङ्कम् अनि

[६६] (१) पद considered as a substitute for पाद, and अति aff. (२) अमा with, अप् aff." (अमा सह समीपे वा भव. 'अमात्यः', अमा
'अप् प्रत्यय).

कम् उत्सङ्गं च गताम् अपि, यां श्रियं, युवा अपि, मदपेक्षया मयि भक्त्या, अभीक्षा (१) सन्। छन्नन्तत्वात् नलोकेति षष्ठीप्रतिषेधः। इयन्ति (२) वर्षाणि एतावतः वत्सरान्। अत्यन्तसंयोगे द्वितीया। तया स्त्रिया सह, स्त्रियेति च गम्यते, उग्रं दुश्चरम्, आसिधारं (३) नाम व्रतम्, अभ्यस्यति (४) इव आवर्त्तयति इव। "युवा युवत्या सार्द्धं यत् मुग्धभर्तृवदाचरेत्। अन्तर्निवृत्तसङ्गः स्यात् आसिधारव्रतं हि तत्॥" इति यादवः। इदमासिधाराचंक्रमणतुल्यत्वादासिधारव्रतमित्युक्तम्।

६७। [illegible] (अपि) [illegible] (सन्) [illegible]

६७। [illegible]

६७। [illegible]

६८। [illegible]

[६७] (१) [illegible] to enjoy, [illegible] (२) [illegible] sword, [illegible] edge [illegible] (४) [illegible] to throw, with [illegible] to practice,—[illegible] &c [illegible] &c

एतावदुक्तवति दाशरथौ तदीयाम्
इच्छां विमानमधिदेवतया विदित्वा ।
ज्योतिष्पथादवततार सविस्मयाभि-
रुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः ॥ ६८

६८। एतावदिति। दाशरथौ रामे, एतावत् (१) उक्तवति, विमानं पुष्पकं कर्तृ, तदीयां (२) रामसम्बन्धिनीम्, इच्छां अधिदेवतया विदित्वा, तत्प्रेरितं सत् इत्यर्थः, सविस्मयाभिः भरतानुगाभिः प्रकृतिभिः प्रजाभिः, उद्वीक्षितं (३) सत् ज्योतिष्पथात् आकाशात्, अवततार (४)।

६८। दाशरथौ एतावत् उक्तवति (सति) विमानं तदीयाम् इच्छाम् अधिदेवतया विदित्वा सविस्मयाभिः भरतानुगाभिः प्रकृतिभिः उद्वीक्षितं (सत्) ज्योतिष्पथात् अवततार।

६८। ज्योतिषां पथः, तस्मात्। विस्मयेन सह वर्तन्ते इति सविस्मयाः तुल्ययोगे बहुव्रीहिः, ताभिः। अनुगच्छन्तीति अनुगाः, भरतस्य अनुगाः, ताभिः। वाच्यान्तरं,—उद्वीक्षितेन विमानेन ज्योतिष्पथात् अवततरे।

---

[६८] (१) एतद् this, वतुप् aff. (एतत् परिमाणम् अस्य, यत्तदेतेभ्यः परिमाणे वतुप्) (२) तद्, and छ aff. fem टाप् aff. (३) उत् up, वि, ईक्ष् to see, क्त aff. (४) तॄ to cross, with अव to descend,—तदि अतरत्। अतारीत्। ततार। &c. कर्मणि—तीर्यते। अतारि। &c.

६८। विमानं स्वाधिष्ठातृदेवताबलेन रामस्य चित्तवृत्तिं ज्ञात्वा ततश्च गगनात् अवतरितुम् आरेभे, तदा मौ भरतानुगामिनश्च सर्वे जना: उन्मुखा सन्तः अदृष्टपूर्वं विमानं सविस्मयं ददृशुः। 'ज्योतिष्पथात्',—नक्षत्रादीनाम् उदयमार्गात् आकाशात्। [illegible],—[illegible] विमानमित्यत्र [illegible]।

৬৮। রামচন্দ্র এই সব কথা বলিলে, পুষ্পকরথ স্বীয় অধিষ্ঠাত্রী দেবতার প্রভাবে তাঁহার অভিপ্রায় জ্ঞাত হইয়া জ্যোতিষ্পথ হইতে অবতরণ করিতে লাগিল, ভরতের সহিত সমাগত প্রজাবৃন্দ বিস্মিত হইয়া ঊর্দ্ধনেত্রে দেখিতে লাগিল।

68. When Ráma had said thus much, the aerial car, knowing his wish by the power of his presiding deity, began to descend from the path of the luminaries, while the multitude that followed Bharata remained gazing upward at it full of wonder

तस्मात् पुरःसरविभीषणदर्शितेन
सेवाविचक्षणहरीश्वरदत्तहस्तः।
यानादवातरददूरमहीतलेन
मार्गेण भङ्गिरचितस्फटिकेन रामः ॥ ६९ ॥

६९। तस्मादिति। रामः सेवायां विचक्षणः (१) कुशलः हरीश्वरः सुग्रीवः तेन दत्तः हस्तः हस्तावलम्बः यस्य तादृशः सन्, पुरःसरः विभीषणः तेन दर्शितेन, अदूरम् आसन्नं महीतलं यस्य तेन, भङ्गिभिः (२) विच्छित्तिभिः रचितस्फटिकेन बद्धस्फटिकेन, मार्गेण सोपानपर्वणा, तस्मात् यानात् पुष्पकात्, अवातरत् अवतीर्णवान्। [illegible]।

৬৯। রাম সেবাবিচক্ষণ হরীশ্বরের [illegible] বিভীষণপ্রদর্শিত অদূরমহীতলস্থিত ভঙ্গিরচিত স্ফটিকনির্ম্মিত মার্গে সেই যান হইতে অবতরণ [illegible]।

[৬৯] (১) বি- চক্ষ to speak, [illegible] (২) ভঞ্জ to break, [illegible] with ঙীপ্, also ভঙ্গী.

६९। पाठान्तर,—सेवाविचक्षणहरीश्वरदत्तहस्तेन राघवेण अवतीर्णम्।

६९। रामः सुग्रीवेण प्रसारितं भुजम् अवलम्ब्य भूतलनिकटेन स्फटिकैः सोपानपदेन पुष्पकात् अवततार, विभीषणश्च तत्पथम् अग्रसरो भूत्वा तम् अवतरणमार्गं रामाय दर्शयामास, इति निष्कर्षः। अवतरणकाले रामस्य अवलम्बनार्थं हस्तदानात् सुग्रीवस्य सेवाविचक्षणत्वं गम्यते, न खलु कुशलाः सेवकाः कार्य्यकाले करणीयं विचारयन्तीत्यभिप्रायः।

৬৯। সেবাকুশল কপীশ্বর সুগ্রীবের বাহুতে ভর দিয়া, অগ্রগামী বিভীষণের প্রদর্শিত মার্গে রাম সেই বিমান হইতে অবতরণ করিলেন, সেই অবতরণমার্গ স্ফটিকময় সোপানপরম্পরায় সুঘটিত ছিল, এবং তাহা ভূতলের নিকট পর্য্যন্ত প্রসারিত ছিল।

69 Ráma taking hold of the proffered arm of the king of monkeys (सुग्रीव) dexterous in service, descended from the car by a flight of crystal steps which came to very near the ground, while Vibhishana stepped forward to shew him the way.

इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य
स भ्रातरं भरतमर्घ्यपरिग्रहान्ते।
पर्य्यश्रुरस्वजत मूर्द्धनि चोपजघ्रौ
तद्भक्त्यपोढपितृराज्यमहाभिषेके॥ ৭০॥

৭০। इक्ष्वाक्विति। प्रयतः (१) सः रामः, इक्ष्वाकुवंशगुरवे वशिष्ठाय, प्रणम्य नमस्कृत्य, अर्घ्यस्य परिग्रहः स्वीकारः तस्य अन्ते, पर्य्यश्रुः परिगतानन्दवाष्पः सन्, भ्रातरं भरतम्, अस्वजत (२) आलिङ्गत्, तस्मिन् रामे भक्त्या अपोढः परिहृतः पितृराज्यमहाभिषेकः येन तस्मिन् मूर्द्धनि उपजघ्रौ च। घ्रा गन्धोपादाने लिटि रूपम्।

[৭০] (१) प्र, यम् to restrain, क्त aff. (२) स्वञ्ज to embrace,—स्वजते। अस्वजत। सस्वञ्ज, सस्वञ्जाताम्, सस्वञ्जत। &c. सस्वजे-सस्वञ्जे। कर्मणि—स्वज्यते। अस्वाङ्क्षि। &c स्वक्तः। स्वञ्जनः &c.

७०। प्रथमः स (राम) इक्ष्वाकुवंशगुरवे प्रणम्य अर्घ्यपरिग्रहान्ते पर्य्यश्रुः (सन्) भ्रातरं भरतम् अस्वजत, तद्भक्त्योपेक्षितपितृराज्याभिषेकं मूर्द्धनि उपजघ्नौ च।

७०। इक्ष्वाकूणां वंशस्य गुरुः, तस्मै। वाच्यान्तर,—प्रथमेन तेन राघवेण पर्य्यश्रुणा भ्राता भरत अस्वज्यत मूर्द्धनि उपजघ्रे च।

७०। राम प्रथम कुलगुरु वसिष्ठ प्रणम्य प्रणनाम, ततश्च भरतदत्तम अर्घ्यं गृहीत्वा भ्रातरं भरतम आलिलिङ्ग। भरतो रामभक्त्या येन पितुः सम्पदर्थं राज्याभिषेकमङ्गलं न जग्राह, रामः तादृशे सर्व्वांशितस्य भरतस्य शिरसि उपजघ्नौ, ततश्च उभयोरेव नेत्राणि अश्रुपूर्णानि अभूवन्, इति विज्ञेयम्।

৭০। রাম, ইক্ষ্বাকুবংশের গুরু বশিষ্ঠের চরণে প্রণিপাতপূর্ব্বক প্রণাম করিলেন, অনন্তর অর্ঘ্যগ্রহণপূর্ব্বক ভ্রাতা ভরতকে আলিঙ্গন করিলেন, তাঁহার প্রতি ভক্তি-বশতঃ ভরতের যে মস্তক পিতৃরাজ্যে অভিষেক গ্রহণ করিতে চাহে নাই, সজলনয়নে সেই মস্তক আঘ্রাণ করিলেন।

70 The virtuous Rama after bowing at the feet of the priest of the Ikshwaku race, and accepting the offerings of honor (अर्घ्य), embraced his brother Bharata and with tears in his eyes smelt his head, which had out of veneration for him foregone the holy unction of coronation in respect of his father's kingdom.

श्मश्रुप्रवृद्धिजनिताननविक्रियांश्च
प्लक्षान् प्ररोहजटिलानिव मन्त्रिवृद्धान्।
अन्वग्रहीत् प्रणमतः शुभदृष्टिपातैः
वार्त्तानुयोगमधुराक्षरया च वाचा॥ ७१॥

७१। श्मश्रुरिति। श्मश्रूणां कूर्चादीनां प्रवृद्धिः संस्काराभावात् अभिवृद्धिः तया जनिता आननेषु विक्रिया विकृतिः येषां तान्, अत एव प्ररोहैः शाखावलम्बिभिः अधोमुखैः मूलैः जटिलान् (१) प्लक्षान् इव:

प्ररूढान् न्यग्रोधान् इव स्थितान्. प्रणमतः (२) मन्त्रिवृद्धान् च
सुप्रसन्नैः दृष्टिपातैः, वार्त्तया (३) अनुयोगेन कुशलप्रश्नेन मधुराला
वाचा च अन्वग्रहीत् अनुगृहीतवान्। ('जनिताकृतिविक्रिय
इति पाठान्तरम्)।

७१। श्मश्रुप्रवृद्धिजनिताननविक्रियान् (अतएव) प्ररोहजटिलान् द्रुमान्
(स्थितान्) प्रणमतः स मन्त्रिवृद्धान् प्रसन्नदृष्टिपातैः वार्त्तानुयोगमधुराक्षरया वाचा
अन्वग्रहीत्।

७१। वाच्यान्तर.—श्मश्रुप्रवृद्धिजनिताननविक्रियाः प्ररोहजटिला द्रुमा
इव प्रणमन्तः मन्त्रिवृद्धाः (रामेण) अन्वगृह्यन्त।

७१। राम सुप्रसन्न दृष्टिपातैः कुशलप्रश्नैः मधुरालापैश्च प्रणतान्
मन्त्रिणः अनुगृहीतवान्। ते मन्त्रिवृद्धाः रामवियोगशोकात् श्मश्रुं
क्षौरकर्मसंस्कारमपि न चक्रुः. अतः श्मश्रूणि वृद्धिं प्राप्तानि, तेन विकृताननाः ते
मन्त्रिणः अधोमुखैः मूलैः समाश्रिता वटवृक्षा इव लक्ष्यन्ते स्म।

৭১। অনন্তর তিনি প্রণত বৃদ্ধ মন্ত্রিগণকে, সদয় দৃষ্টিপাতে কুশলপ্রশ্ন ও
মধুর বাক্যে অনুগৃহীত করিলেন, সংস্কারবিরহে প্রবৃদ্ধ শ্মশ্রুজালে উঁহাদের
বিকৃত হওয়ায় তাঁহাদিগকে প্ররোহজালে জটিল বটবৃক্ষ সকলের ন্যায় বোধ হই
তে
ছিল।

71 With kind looks, sweet words and inquiries after the welfare, Ráma favoured the aged ministers bent before him in obeisance, who with their appearances altered in consequence of beards allowed to grow for a long time, looked like Banyan trees with shoots hanging all round [প্ররোহ—the shoots which from the branches drop to the ground, and which take root and form new stocks, till they cover a space of many hundred feet in circumference.]

---

[৭১] (১) जटा clotted hair, इतच् aff. (२) नम्, नम् to bend, शतृ aff. (द्वितीयार्थ). अस् being &c. क्त aff.

दुर्ज्जातबन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एष समरेषु पुरःप्रहर्त्ता।
इत्यादृतेन कथितौ रघुनन्दनेन
व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥७२॥

७२। दुर्ज्जातबन्धुरिति। अयं मे दुर्ज्जातबन्धुः आपद्बन्धुः। "दुर्ज्जातं व्यसनं प्रोक्तम्" इति विश्वः। ऋक्षहरीश्वरः सुग्रीवः, एषः समरेषु पुरःप्रहर्त्ता पौलस्त्यः विभीषणः, इति आदृतेन (१) आदरवता। कर्त्तरि क्तः। रघूणां नन्दनेन रामेण, कथितौ उभौ विभीषणसुग्रीवौ, लक्ष्मणम् अनुजम् अपि, व्युत्क्रम्य (२) आलिङ्गनादिभिः असम्भाष्य, भरतः ववन्दे (३)।

৭২। এই দুর্জাতবন্ধু ঋক্ষহরীশ্বর, এই সমরেষু পুরঃপ্রহর্তা পৌলস্ত্য, ইতি আদৃতেন রঘুনন্দনেন কথিতৌ উভৌ (বিভীষণসুগ্রীবৌ), লক্ষ্মণং ব্যুৎক্রম্য ভরত ববন্দে।

৭২। দুর্গতি বিপদে মম সুহৃৎ। [illegible] —ভরতেন উভৌ ববন্দাতে, ইত্যাদি। 'ব্যুৎক্রম্য' —[illegible] আলিঙ্গনাদিনা [illegible]।

৭২। [illegible]

[৭২] (১) দৃ with আ, to respect, [illegible] (২) ক্রম্ with বি and উৎ, to invert the order [illegible] (৩) বন্দ্ to worship—[illegible] &c. [illegible] &c.

72. This king of the bears and monkeys (सुग्रीव) is friend in adversity, and this Paulastya (विभीषण) is foremost striking the enemy in war; *Rāma having thus respectfully* introduced them to Bharata, Bharata saluted them first, passing over Lakshmana.

सौमित्रिणा तदनु संससृजे स चैनम्
उत्थाप्य नम्रशिरसं भृशमालिलिङ्ग।
रूढेन्द्रजित्प्रहरणव्रणकर्कशेन
क्लिश्यन्निवास्य भुजमध्यमुरःस्थलेन ॥ ७३ ॥

७३। सौमित्रिणेति। तत् अनु सुग्रीवादिवन्दनानन्तरं, सः भरतः, सौमित्रिणा संससृजे (१) सङ्गतः। सृज विसर्गे दैवादिकात् कर्त्तरि लिट्। नम्रशिरसं प्रणतम्, एनं सौमित्रिम् उत्थाप्य (२) भृशं गाढ़म्, आलिलिङ्ग (३) च। किं कुर्व्वन्? रूढेन्द्रजित्प्रहरणव्रणैः कर्कशेन अस्य सौमित्रेः उरःस्थलेन, भुजमध्यं स्वकीयं क्लिश्यन् (४) इव पीड़यन् इव। क्लिश्नातिरयं सकर्म्मकः क्लिश्नाति भुवनत्रयमिति दर्शनात्। ननु रामायणे, "ततो लक्ष्मणमासाद्य वैदेहीव परन्तपः। अभिवाद्य ततः प्रीतो भरतो नाम चाब्रवीत्।" इति भरतस्य कानिष्ठं प्रतीयते, किमर्थं? ज्येष्ठामवलम्ब्य अनाश्रित श्लोको व्याख्यातः सत्यम्। किन्तु रामायणश्लोकार्थटीकाकारतीर्थ श्रूयताम्, ततो लक्ष्मणमासाद्येत्यादिश्लोके व्यासादनं लक्ष्मणवैदेह्यो:

(७३) (१) सृज with सम् to be united (दिवादि.) सृज्यते। ससर्ज। असृष्ट, असृक्षाताम्, असृक्षत। &c सस्रष्टे। &c कर्म्मणि,—सृज्यते। असर्जि। &c (२) स्था to stay (भ्वा.) with उत्, to raise, णिच् aff. (३) लिश to embrace,—लिश्यति। आलिलिङ्ग। अलिक्षत्। लिलिक्ष। &c

अभिवादनं तु वैदेह्या एव, अन्यथा पूर्व्वोक्तं भरतस्य ज्येष्ठां विरुध्ये-
तेति।

६१। [illegible] कौशिकेया [illegible] (सकोप) [illegible]

[illegible]

६२। [illegible] (सरित) कौशिकेया [illegible]

[illegible]

६३। [illegible]

[illegible]

[illegible]

৭২। তদনন্তর তাঁহার পর লক্ষ্মণের সহিত মিলিত হইলেন, তিনি [illegible] মস্তক নত করিলে তুলিলেন এবং [illegible] আলিঙ্গন করিলেন [illegible] ইন্দ্রজিতের [illegible] বক্ষ যেন নিপীড়িত করিলেন।

73. He next received the son of Sumitrá (লক্ষ্মণ), raising him as he was lowering his head, pressed him close [to] his breast, almost paining it by its contact with the br[east] of Lakshmaṇa, which had become hard in consequence of [the] wounds inflicted on it by the weapons of Indrajit.

रामाज्ञया हरिचमूपतयस्तदानीं
कृत्वा मनुष्यवपुरारुरुहुर्गजेन्द्रान्

* 'অভিবাদ্য বচ. প্রীত.' ইতি মল্লিনাথধৃত পাঠ।

तेषु क्षरत्सु बहुधा मदवारिधाराः
शैलाधिरोहणसुखान्युपलेभिरे ते ॥ ७४ ॥

७४। रामेति। तदानीं (१) हरियूथपतयः, रामाज्ञया मनुष्यवपुः कृत्वा, गजेन्द्रान् आरुह्य (२), बहुधा मदवारिधाराः क्षरत्सु (३) वर्षत्सु, तेषु गजेन्द्रेषु, ते कपियूथनाथाः, शैलाधिरोहण-सुखानि उपलेभिरे अनुबभूवुः।

७४। तदानीं हरियूथपतयः रामाज्ञया मनुष्यवपुः कृत्वा गजेन्द्रान् आरुरुहुः बहुधा मदवारिधाराः क्षरत्सु तेषु ते शैलाधिरोहणसुखानि उपलेभिरे।

७४। हरियूथपाः कपिश्रेष्ठानां पतयः। शैलेषु अधिरोहणेन यानि सुखानि। वाच्यान्तर,—हरियूथपतिभिः गजेन्द्राः आरुरुहिरे, तैः शैलाधिरोहणसुखानि उपलेभिरे।

७४। वानरेन्द्राः सर्वे सर्वदा निर्झरशालिनः शैलान् आरुह्य यादृशं सुखं लभन्ते, तथापि मदशालिनः शैलोपमान् गजेन्द्रान् आरुह्य तादृशं सुखं लब्धवन्तः। अत्र गजेन्द्राणां शैले आरोप उक्त एव, मदवारिधाराणां निर्झरधाराभि-आरोपः उन्नेयः। 'बहुधा'—अनेकधा, नानाधा इति यावत्, तथाच पालकाप्ये,—'करात् कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदस्रुतिः'। करात् नासारन्ध्राभ्याम् इत्यर्थः।

৭৪। তৎকালে রামের আদেশে কপিসেনাপতিরা মনুষ্যদেহ ধারণ করিয়া গজেন্দ্রপৃষ্ঠে আরোহণ করিল, করিগণ যখন নানা অঙ্গ হইতে মদজলধারা ক্ষরণ করিতে লাগিল তখন সেই কপিগণ, (নির্ঝরশালী) শৈলসকলের উপর আরোহণের সুখ অনুভব করিতে লাগিল।

74. At the command of Ráma, the leaders of the monkey army assumed human forms and rode upon royal elephants, and began to feel the pleasure of sitting on mountains, when streams of ichor flowed down the bodies of the elephants.

[७४] (१) तद् that, दानीम् aff. with दाच aff. it becomes तदा,
(२) रुह् with आ to ascend,—रोहति। अरोहत्। अरुहत्। रुरोह। &c.
(३) क्षर् to exude, शतृ aff. (क्षरोवत्).

सानुप्लवः प्रभुरपि क्षणदाचराणां
भेजे रथान् दशरथप्रभवानुशिष्टः ।
मायाविकल्परचितैरपि ये तदीयैः
न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः ॥७५॥

७५ । सानुप्लव इति । सानुप्लवः (१) सानुगः । "अभिसार अनुसरः सहायोऽनुप्लवोऽनुगः" इति यादवः । क्षणदाचराणां (२) प्रभुः विभीषणोऽपि प्रभवत्यस्मादिति प्रभवः जनकः, दशरथः प्रभवः यस्य सः दशरथप्रभवः रामः तेन अनुशिष्टः आज्ञप्तः सन्, रथान् भेजे (३) । तानेव विशिनष्टि । ये रथाः मायाविकल्परचितैः मायाविशेषनिर्म्मितैरपि, तदीयैः विभीषणीयैः स्यन्दनैः (४), तुलितकृत्रिमभक्तिशोभाः तुलिता समीकृता कृत्रिमा (५) क्रियया निर्वृत्ता भक्तीनां शोभा येषां ते तथोक्ताः न भवन्ति, तेऽपि तत्साम्यं न लभन्ते इत्यर्थः । कृत्रिमेत्यत्र ड्वितः क्त्रिरिति क्त्रिप्रत्ययः, क्त्रेर्मम् नित्यमिति ममागमः ।

७५ । सानुप्लवः क्षणदाचराणां प्रभुः अपि दशरथप्रभवानुशिष्टः (सन्) रथान् भेजे, ये (रथाः) मायाविकल्परचितैः अपि तदीयैः स्यन्दनैः तुलितकृत्रिमभक्तिशोभाः न (भवन्ति) ।

६५ । प्रभवति अस्मात् इति प्रभवः कारणम्, ऋदोरप् अकर्त्तरि च कारके

---

[७५] (१) अनु with, प्लु to go, अप् aff. (२) क्षणदा night, चर to walk, ट aff. (चरेष्ट, इति ट प्रत्ययः) (३) भज् to enjoy, &c.—भजति-भजते । अभजत-अभजत । अभाक्षीत्-अभक्त । बभाज-भेजे । &c. कर्मणि—भज्यते । अभाजि । &c (४) स्यन्द् to move, ल्युट् aff. (५) कृ to make, क्त्रि aff. मम् added. (क्त्रेर्मम् नित्यम् इति मम्).

महार्याणीति भावः। स्मरथ, प्रभवो यस्य स, स्मरप्रभव रामः तेन अनुमितः। मनुष्यैः एव वर्तते इति मानुष्य, तुल्यार्थे बहुव्रीहिः। मायानां विकल्पाः, तैः रचितानि, तैः। पाठान्तर,—स्मरप्रभवानुमितेन मानुषेण घटदाघटाणां मनुष्याणि रथा अभूवन्।

अनु। "मायाविकल्परचितैः" &c —मनुष्यकल्पितानां अपि रामस्य रथा. मायाविभावितानाम् राक्षसराजस्य रथान् निर्माणसौन्दर्येण पराभूतवन्तः। राक्षसपतिः, अद्देशे याम् रथान् आरोहति तैः अमानुषमायाविभावात मनोरथानुरूपा एव आसन्, अथ च समथ याम् रथान् आरोहैः तैः हि मानुषशिल्पिकृतैः निर्मिता, किन्तु मानुषोऽपि रामस्य प्रभावात् कार्यं तथा अलौकिकं जातं यथा तत राक्षसानां कल्पनाकल्पितानाम् अपि पराभूत, इति निर्गलितार्थ।

৭৫। সমুদ্র নিশাচরপতি বিভীষণ রামের আদেশক্রমে রথসকলে আরোহণ করিলেন, সে সকল রথের নির্মাণশোভা কৃত্রিম হইলেও সে শোভার সহিত মায়াবলে রাক্ষসনির্মিত রথসকলের শোভাও তুল্য হয় না।

75 The king of the Rakshasas (বিভীষণ) and his followers ascended the cars at the command of Rama, the cars though fashioned by human art excelled in beauty those which are shaped by the spell of Rakshasas

भूयस्ततो रघुपतिर्विलसत्पताकम्
मध्यास्त कामगति सावरजो विमानम्।
दोषातनं बुधबृहस्पतियोगदृश्यः
तारापतिस्तरलविद्युदिवाभ्रवृन्दम् ॥ ७६ ॥

७६। भूय इति। ततः रघुपतिः सावरजः भ्रातलक्ष्मणसहितः सन्, विलसत्पताकं, कामेन इच्छानुसारेण गतिः यस्य तत्, विमानं भूयः पुनरपि, बुध-(१)-बृहस्पतिभ्यां (२) योगेन दृश्यः (३) दृश्यमानः

[७६] (१) बुध to know, + अ affix (२) बृह great, illustrious, (as the deities), and पति master or Guru. Ek. augment, and the final

[illegible]

76\. [illegible]

77\. [illegible]

[illegible]

76\. As the moon, looking more beautiful in company with Mercury (बुध) and Jupiter ([illegible]), appears at the top of evening clouds flashing forth lightning, so the chief of the R with his youngers (भरत and [illegible]) re-ascended the self mo aerial car on which floated a shining flag

तत्रेश्वरेण जगतां प्रलयादिवोर्वीम्
वर्षात्ययेन रुचमभ्रघनादिवेन्दोः ।

---

of the first member rejected; it also occasionally occurs

(२) दृश् to see, यत् all.

रामेण मैथिलसुतां दशकण्ठकृच्छ्रात्
प्रत्युद्धृतां धृतिमतीं भरतो ववन्दे ॥ ७७ ॥

७७। रामेति। अत्र विमाने, जगताम् ईश्वरेण आदिवराहेण, प्रलयात् उर्वीम् इव, वर्षात्ययेन शरदागमेन, घनघनात् मेघसङ्घातात्, इन्दोः शशिनः चन्द्रिकाम् इव, रामेण, दशकण्ठः एव कृच्छ्रं (१) सङ्कटं तस्मात् प्रत्युद्धृतां (२) धृतिमतीं सन्तोषवतीं, मैथिलसुतां सीतां, भरतः ववन्दे।

७७। अत्र जगताम् ईश्वरेण प्रलयात् उर्वीम् इव, वर्षात्ययेन घनघनात् इन्दोः ज्योत्स्नाम् इव, रामेण दशकण्ठकृच्छ्रात् प्रत्युद्धृतां धृतिमतीं मैथिलसुतां भरतः ववन्दे।

७७। प्रत्युद्धृता धृतिमती मैथिलसुता भरतेन ववन्दे इति वाच्यान्तरम्।

७७। [illegible] 'दशकण्ठकृच्छ्रात्' [illegible] 'धृतिमती',—[illegible]

৭৭। [illegible]

77. Bharata made his obeisance to Sitá, now full of delight, rescued by Ráma from Rávana like danger, as was the earth from the universal deluge by the Lord of the universe and as is the moon light from dense rain clouds by the advent of autumn

---

(७७) (1) कृष् to cut, रक् unadi affix, and छ substituted for the final. (2) धृ to hold, with प्रति and उत्, to recover, क्त aff.

लङ्केश्वरप्रणतिभङ्गदृढव्रतं तत्
वन्द्यं युगं चरणयोर्जनकात्मजायाः।
ज्येष्ठानुवृत्तिजटिलञ्च शिरोऽस्य साधोः
अन्योन्यपावनमभूदुभयं समेत्य॥ ৭৮॥

৭৮। लङ्केश्वरेति। लङ्केश्वरस्य रावणस्य प्रणतीनां भङ्गे निरासेन दृढव्रतम् अखण्डितपातिव्रत्यम्, अतएव वन्द्यं (১) तत् जनकात्मजायाः चरणयोः युगम्, ज्येष्ठानुवृत्त्या (২) जटिलं जटायुक्तं, साधोः सज्जनस्य, अस्य भरतस्य, शिरश्च, इत्युभयं, समेत्य मिलित्वा, अन्योन्यस्य पावनं शोधकम् अभूत्।

৭৮। लङ्केश्वरप्रणतिभङ्गदृढव्रतं वन्द्यं तत् जनकात्मजायाः चरणयोः युगं, ज्येष्ठानुवृत्तिजटिलं साधोः अस्य (भरतस्य) शिरश्च (इति) उभयम् समेत्य अन्योन्यपावनम् अभूत्।

৭৮। उभयेन अन्योन्यपावनेन अभावि, इति वाच्यान्तरम्।

৭৮। पतिभक्तिदृढव्रतायाः सीतायाः चरणयोः सम्पर्केण भरतस्य शिरः यथा पवित्रतां लेभे, ज्येष्ठभक्तिदृढव्रतस्य भरतस्य शिरसः संसर्गेण सीतायाः पदयुगलमपि तथा पवित्रतां लेभे। पतिव्रता सीता पादप्रणतं रावणमपि लङ्कापतिमैश्वर्यं तृणवत् प्रत्याख्यातवती, अत तत्पादयोः पावनत्वम्। ज्येष्ठभक्तो भरतोऽपि पितृराज्यमहाभिषेकमपि शिरसा प्रत्याख्यातवान्, एवं च राजमुकुटं प्रत्याख्याय शिरसा जटाभारमेव बभार, अतः तच्छिरसः पावनत्वम् उक्तम्। सीताचरणयोः प्रणतिकाले साध्वी भरतशिरसः सम्पर्कः श्रेयः। 'लङ्केश्वरप्रणतिभङ्गदृढव्रतम्' इति दिनकरः पठति।

৭৮। जनकनन्दिनीর চরণযুগল লঙ্কেশ্বর রাবণের নামুনয় প্রার্থনাগ্রহণে দৃঢ়ব্রত, পতিভক্তিতে পাবন করিয়াছে, সাধু ভরতের মস্তক জটাভার ধারণ করিয়া পূত।

[৭৮] (১) वन्द् to worship, यत् aff. (২) वृत् with अनु to follow, क्तिन् aff.

করিয়া দৃঢ় ভ্রাতৃভক্তিব্রত পালন করিয়াছে; আজি এই উভয় মিলিত হইয়া পরস্পরকে পবিত্র করিল।

78. Those adorable feet of the daughter of Janaka which obstinately refused the repeated entreaties of the lord of Lanká, and the head of the pious Bharata bearing on it clotted hair in imitation of his elder brother, sanctified each other by their mutual contact

क्षौमार्द्धं प्रकृतिपुरःसरेण गत्वा
काकुत्स्थः स्तिमितजवेन पुष्पकेण ।
शत्रुघ्नप्रतिविहितोपकार्य्यमार्य्यः
साकेतोपवनमुदारमध्युवास ॥ ७९ ॥

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ
दण्डकाप्रत्यागमनो नाम
त्रयोदशः सर्गः ।

७९। क्षौमेति। आर्य्यः (१) पूज्यः, काकुत्स्थः रामः, प्रकृतयः प्रजाः पुरःसराः यस्य तेन, स्तिमितजवेन मन्दवेगेन, पुष्पकेण, क्षौमः अभ्रपरिमाणविशेषः, (तस्य अर्द्धः तम्) क्षौमार्द्धं क्षौमैकदेशं गत्वा, शत्रुघ्नेन प्रतिविहिताः सज्जिताः उपकार्य्याः (२) पटभवनानि यस्मिन् तत्, उदारं (३) महत्, साकेतस्य अयोध्यायाः, उपवनम् अध्युवास

[७९] (१) ऋ to go, ण्यत् aff. (ऋ गतौ, ऋहलोर्ण्यत्, इति ण्यत्प्रत्ययः ;—"कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन्। तिष्ठति प्रकृताचारे स तु आर्य्य इति स्मृतः")। (२) उप, कृ to do, ण्यत् and टाप् affs (३) उत्, आ, रा to take, क aff, (उत्कृष्टम् आ समन्तात् राति, आतोऽनुपसर्गे कः) or उत्, आ, ऋ to go, अण् aff.

घधितष्ठौ। "साकेतः स्यादयोध्यायां कोशला नन्दिनी तथा" इति यादवः।

७९। पार्थः काकुत्स्थः प्रकृतिपुरःसरेण शिबिरगतेन पुष्पकेण लीलां कृत्वा मनुष्यमानविहितोपकार्यम् उदारं साकेतोपवनम् अध्युवास।

७९ शिबिरः जवो यस्य तत्, तेन। वाचान्तरं,—पार्थेन काकुत्स्थं मध्य ऐ, इति।

७९। पुष्पकं तदा मन्दं मन्दं चचाल चलतस्य प्रकृतीः प्रकृतयो जनम्, रा मनेन क्रोशेकदेशं गत्वा रामः अयोध्याबाह्योद्याने पुष्पकात् अवततार, शत्रुघ्न प्रागेव रामनिवासार्थं राजयोग्यानि पटमवनानि यथाविधि स्थापयामास। इद मत, इति मध्ये।

৭৯। পুষ্পক ধীরগতি চলিতে লাগিল, প্রজাবৃন্দ তাহার অগ্রে অগ্রে চলি লাগিল; আর্য রামচন্দ্র ক্রোশমাত্র সেই পুষ্পকে গমন করিয়া অযোধ্যার উপবনে আসিয়া নামিলেন, তাঁহাদের অবস্থানের জন্য শত্রুঘ্ন তথায় রাজোচিত পটাবাস সকল সুসজ্জিত করিয়া রাখিয়াছিলেন।

79. The adorable Râma (काकुत्स्थ descendant of ककुत्स्थ) after proceeding a mile in his slowly-moving Pushpaka, his subjects moving before him, stopped in the spacious garden of Sâketa (अयोध्या) wherein Sâtrughna had caused royal [illegible] silk to be pitched and fitted up.

## NOTES.

---

### CANTO XIII.

St. 1.—'आत्मनः पदम्' (विष्णुपदम्). Here Ráma is represented as Hari or Vishṇu who once covered the sky with his foot. Hence विष्णुपद means the sky. According to the Purāṇas, Vishṇu in his incarnation as a dwarf, craved from Bali the boon of three steps of ground, and, having obtained it, he stepped over the three worlds. The germ of this legend is found in the ऋग्वेद, where Vishṇu is a manifestation of the solar energy, and his three steps are explained by commentators as denoting the three manifestations of light, viz., fire, lightning, and the sun, or the three places of the sun—its rising, culminating, and setting. 'विष्णुरादित्यः। कथमिति। यत आह, त्रेधा निदधे पदम् निधत्ते पदं निधानं पदैः। क तत् तावत्। पृथिव्याम् अन्तरिक्षे दिवीति शाकपूणिः। पार्थिवोऽग्निर्भूत्वा पृथिव्यां यत् किञ्चिदस्ति तद् विक्रमते तदधितिष्ठति। अन्तरिक्षे वैद्युतात्मना। दिवि सूर्यात्मना। यदुक्तम्। तमू अकृण्वन् त्रेधा भुवे कमिति। समारोहणे उदयगिरौ उद्यन् पदमेकं निधत्ते। विष्णुपदे मध्यन्दिनेऽन्तरिक्षे। गयशिरसि अस्तगिरौ इति और्णवाभ आचार्यो मन्यते'। (See Durgáchárya on Yaska's *Nirukta*.)

'शब्दगुणम्'—According to the Sanskrit philosophy, the distinguishing quality of the आकाश 'ether', is sound, which is the object for an organ of sense, the ear. 'आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः। इन्द्रियं तु भवेत् श्रोत्रमेकः सन्नप्युपाधितः।' (See भाषा-परिच्छेद).

St. 2.—'आ मलयात्' Malaya.—The hills of Malabar proper, the south part of the Western *Ghats*.

St. 3—'पुरीषिनः' &c—Sagara, a king of *Ayodhyá*, engaged in the performance of an अश्वमेध sacrifice, but although the sacrificial horse was guarded by his sixty thousand sons, it was carried off by Indra to *Pátála*. Sagara directed his sons to recover it. They dug their way to the nether world ... there they found the horse grazing and the sage Kapila se[ated] close by absorbed in meditation. Conceiving him to be [the] thief, they menaced him with their weapons; he looked up[on] them for an instant, and they were reduced to ashes by the flame that darted from his person. Ansumat, the son of Asamanjas, and the grandson of Sagara, affected the recovery of the horse and delivered it to his grandfather. Sagara completed his sacrifice, and, in affectionate memory of his sons, denominated सागर ('ocean') the chasm which they dug. (See रामायण आदिकाण्ड and समरकाण्ड; विष्णुपुराण चतुर्थांश. &c)

St. 4—'गर्भं दधत्यर्कमरीचयः' This refers to the evaporation of the oceanic waters by the rays of the sun. It is thus s[aid] in the Rámáyana —

'मयमासगत गर्भं भास्करस्य गभस्तिभिः।
पीत्वा रस समुद्राणां द्यौः प्रसूते रसायनम् ।' *

It is elaborately explained in the हरिवंश, chapter XXI.
'प्रह्लादन ज्योतिः' i. e *Soma* or moon, said to have been produced from the churning of the ocean;—

'तत शतसहस्रांशुर्मथ्यमानात्तु सागरात्।
प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः' ।
(See महाभारत, आदिपर्व, अध्याय XVIII.)

* द्यौः नभः, भास्करस्य सूर्यस्य, गभस्तिभिः किरणैः, समुद्राणां रसं गर्भं पीत्वा ... आर्तिंशादिनसमाश्रयत रसायनं ... प्रसूते।

५१। तपसि अनधिकारित्वात् प्रजानाम् अघावहं तं शीर्षच्छेद्यं परिच्छिद्य नियन्ता शस्त्रम् आददे।

५१। अघम् अमङ्गलम् आवहतीति अघावहः, तम्। अधिकारिणो भावः अधिकारित्वं न अधिकारित्वम् अनधिकारित्वं, तस्मात्। नियन्त्रा (रामेण) शस्त्रम् आददे, इति वाच्यान्तरम्।

५१। विमार्गप्रस्थितानां नियामकः स रामः, शूद्रवर्णेन अननुष्ठेयस्य तपसः अनुष्ठानात् प्रजानाम् अमङ्गलहेतुं तं शूद्रतापसं शिरश्छेदनार्हं निश्चित्य तद्वधाय

[५१] (१) शुच् to lament, &c रक् unadi affix, the vowel made long, and च changed into द. (शुचेर्दश्च, इति रक्, दश्च अन्तादेशः, धातोः दीर्घश्च). (२) छिद with परि, to decide, ल्यप् aff.

त्वं गृहीतवान्, इति विग्रहार्थः। 'तदनधिकारित्वात्',—द्विजातिमात्र-योग्ये तपसि शूद्रस्य तस्य अधिकाराभावात्। नास्ति खलु शूद्राणां द्विजशुश्रूषणम् अन्तरम्, यथाह मनुः—'एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्। एतेषामेव वर्णानां शुश्रूषामनसूयया'॥ अपि च, 'शूद्रं तु कारयेत् दास्यं क्रीतमक्रीतमेव वा। दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वयम्भुवा'॥ इति। 'प्रजा-भयावहम्',—राज्ये अकालमरणादीनामनर्थानां जनकम्। स्वकर्मच्युतौ हि वर्णौ लोके महदनिष्टं जनयतीति धर्मशास्त्रकृतो मन्यन्ते,तथाह मनुः,— 'वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत्। तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेतामिदं जगत्'॥ इति।

৫১। তাহার তপস্যায় অধিকার নাই অথচ সে তপস্যা করায় প্রজাগণের অমঙ্গল উপস্থিত হইয়াছে অতএব সে শিরশ্ছেদের যোগ্য, এই বিবেচনা করিয়া নরপতি রাম অস্ত্র উত্তোলন করিলেন।

51. The ruler of men took up his weapon, thinking, that he, who, by reason of his want of right to perform ascetic devotions had become the cause of evil to his people, deserved to be decapitated

**स तद्वक्त्रं हिमक्लिष्टकिञ्जल्कमिव पङ्कजम् ।**
**ज्योतिष्कणाहतश्मश्रु कण्ठनालादपातयत् ॥५२॥**

५२। स इति। सः रामः, ज्योतिष्कणैः स्फुलिङ्गैः आहतानि दग्धानि श्मश्रूणि यस्य तत् तस्य वक्त्रं, हिमक्लिष्टकिञ्जल्कं (१) पङ्कजम् (२) इव, कण्ठः एव नालं तस्मात् अपातयत्।

५२। स. ज्योतिष्कणाहतश्मश्रु तद्वक्त्रं हिमक्लिष्टकिञ्जल्कं पङ्कजम् इव कण्ठनालात् अपातयत्।

[५२] (१) किञ्जल्क from किञ्चित् somewhat, जल् to hide or cover, क aff. (किञ्चित् जलति, जल अपवारणे, बाहुलकात् कः)। (२) पङ्क mud, जन् to grow, ड aff.

५१। हिमैः क्लिष्टाः किञ्जल्काः यस्य तत्। तेन यथाक्रम इति पाठान्तरम्।

५२। अथ यदा नैसर्गिकविस्फुलिङ्गैः विदग्धश्मश्रु सत् शोभते तस्य शिरो मुखमपि तदा अग्निस्फुलिङ्गैः विदग्धश्मश्रु सत् गण्यते, रामः तादृशं तस्य कण्ठदेशात् सचापाम् पातयामास, इति विवदार्थः। अपूर्वसदृशसौन्दर्यभूतस्य कुसुमशेखरस्य कोमलकमलस्य सनालमध्यात् विश्लेषणं यथा पद्मपक्षद्वयस्य कार्यं, प्राणिविशेषस्य मनुष्यस्य कण्ठच्छेदनमपि तदा पद्मपक्षद्वयस्य कार्यम्, एवं कारुणिकस्य कविरभिप्रेतम् इति उपमानबलात् प्रतीयते; स्पष्टमेतदाह भवभूतिः, तथा च उत्तरचरिते,—“रे हस्त दक्षिण! मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणम्। रामस्य गात्रमसि दुर्वहगर्भखिन्नसीताविवासनपटोः करुणा कुतस्ते”। इति।

५२। অগ্নিকণার দ্বারা যাহার শ্মশ্রুসকল ঝলসিয়া গিয়াছে, তাহার মুখমণ্ডল, হিমবিন্দুদ্বারা বিশীর্ণকেশর পদ্মের ন্যায় লক্ষিত হইতেছিল, তিনি তাহা উহার কণ্ঠদেশ হইতে বিচ্ছিন্ন করিলেন।

52 By severing his head, with its beard and mustachios singed by sparks of fire, from his neck, he seemed as it were to separate from its stalk a lotus whose filaments have become withered and shrivelled in the cold dew

## कृतदण्डः स्वयं राज्ञा लेभे शूद्रः सतां गतिम्। तपसा दुश्चरेणापि न स्वमार्गविलङ्घिना ॥५३॥

५३। कृतेति। शूद्रः शम्बुकः, राज्ञा स्वयं कृतदण्डः कृतशिक्षः सन्, सतां गतिं लेभे, दुश्चरेणापि (१) स्वमार्गविलङ्घिना अनधिकारदुष्टेन इत्यर्थः, तपसा, न लेभे। अत्र मनुः, “राजभिः कृतदण्डास्तु कृत्वा पापानि मानवाः। निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा॥” इति।

---

[५३] (१) दुर् with difficulty; चर to go, अच् or टच् aff. (दुःखेन चर्यते इति).

५३। शूद्रः राज्ञा स्वयं कृतदण्डः (सन्) सतां गतिं लेभे, दुश्चरेण अपि [illegible]कार्यविलङ्घिना तपसा न (लेभे)।

५३। कृतो दण्डो यस्य सः। कृतदण्डेन शूद्रेण सतां गतिः लेभे, इति [illegible]वाच्यम्।

५३। स खलु शूद्रः सुरपदार्थी यद्यपि दुश्चरं तपश्चचार तथापि निजवर्ण-[illegible]विरोधिना तेन तपसा सुरपदं लब्धुं न शशाक, किन्तु अधुना राजदण्डेन [illegible] साक्षात् सतां विमुक्तः चिराभिलषितं तत् सुरपदं लेभे, इति [illegible]। 'सत्सङ्गजानि निधनान्यपि तारयन्ति' इति भावः।

[illegible]

53. By being slain by the king in person, he attained the bliss which falls to the lot of the virtuous and which he could not secure by the devotions however austere which he had performed by deviating from the path assigned for his class.

रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मना ।
महौजसा संयुयुजे शरत्काल इवेन्दुना ॥ ५४ ॥

५४। रघुनाथ इति। रघुनाथोऽपि मार्गसन्दर्शितात्मना महौजसा अगस्त्येन, इन्दुना शरत्कालः इव संयुयुजे (१) सङ्गत। इन्दावपि विशेषणं योज्यम्। रघुनाथेनाथ [illegible] [illegible]।

५४। रघुनाथः अपि मार्गसन्दर्शितात्मना महौजसा अगस्त्येन, इन्दुना शरत्-[illegible] इव [illegible]। रघुनाथः अपि [illegible] इव [illegible] इति [illegible]।

[illegible]

'मार्गसन्दर्शितात्मना'—[illegible]

(१) [illegible] to be joined,—[illegible]

गमनात् अपमेघनिर्मुक्तेन नभसि प्रकाशमानेन, इन्दुना चन्द्रेण; 'महौजसा'- महाप्रभावेण तेजस्विना, अन्यत्र सुविमलकिरणशालिना। अत्र रघुवीर गुणाधारत्वात् रामस्य शरत्कालसाम्यम्, रमणीयगुणाधारत्वञ्च शरदः कमल काशादिविकाशात् शालिधान्यशालित्वात् सलिलाकाशनैर्मल्यात् अमलपरिष्का रात् चन्द्रतारकादिसुप्रकाशात् च ज्ञेयम्। अगस्त्यस्य च शरदिन्दुसाम्यं प्रसाद स्वच्छतेजोनिधित्वात् ज्ञेयम्। महौजा अगस्त्योऽपि शरदि नभस्युदेव दक्षिणतो प्रकाशते, इत्यपि श्रूयते।

৫৪। এদিকে, রঘুনাথ, পথে পথিমধ্যে আবির্ভূত মহাতেজা অগস্ত্য ঋষির সহিত মিলিত হইলেন, যেমন হইয়া থাকে, শরৎকাল, উজ্জ্বলভাবে প্রকাশিত অমৃতময় চন্দ্রের সহিত মিলিত হইলেন।

54. On the other hand, the chief of the Raghus obtained the company of the most powerful Agastya whom he met in the way, just as the autumn becomes united with the bright moon (as it emerges from the clouds of the rainy season).

कुम्भयोनिरलङ्कारं तस्मै दिव्यपरिग्रहम्।
ददौ दत्तं समुद्रेण पीतेनेवात्मनिष्क्रयम् ॥५५॥

५५। कुम्भेति। कुम्भयोनिः अगस्त्यः, पीतेन समुद्रेण आत्मनिष्क्रयम् (१) इव आत्मनो धनमूल्यम् इव दत्तम्, अतएव परिगृह्यते इति व्युत्पत्त्या परिग्रहः (२) दिव्यानां परिग्रहः परिग्राह्यः इत्यर्थः, तम् अलङ्कारं, तस्मै रामाय, ददौ।

५५। कुम्भयोनिः पीतेन समुद्रेण आत्मनिष्क्रयम् इव दत्तं दिव्यपरिग्रहम् अलङ्कारं तस्मै ददौ।

[५५] (१) निस्, क्री to purchase. अच् aff. (निष्क्रीयते प्रत्याह्रियते अनेन परिगृहीतम् इति निष्क्रयः, एरच् इति अच्प्रत्ययः). (२) परि, ग्रह to take, अप् aff.

११। कुम्भयोनिना आत्मनिष्पृह इव दत्तं दिव्यपरिग्रहः अलङ्कारः ददे,
इति वाच्यान्तरम् ।

११। अगस्त्यः प्रीतिचिह्नभूतम् अमूल्यं बाहुभूषणं रामाय प्रददौ । स किल
दर्शितवता कश्चिन् दिव्यपुरुष स्वगात्रादुत्पन्न तस्मात् प्रतिग्रहरूपेण तत् भूषणं
लब्धवान्, अत एव अपि उत्सृष्टवान्, अस्ते स महर्षिः चाद्ये पीत समुद्र पश्चात् स्वकुक्षेः
निर्गमिता समुद्रात् आत्ममोचनमूल्यमिव तत् लब्धवान्, इति विवक्षार्थ । वस्तुतस्तु
तस्मः कुतश्चित् दिव्यपुरुषात् तदीयम् आत्ममोचनमूल्यं तत् भूषणं लेभे, कविरत्र
अपूर्वाश्चर्यविधायिकलेषेण तस्य भूषणस्य परमोत्कर्षतां द्योतयितुं समुद्रदत्तम्
आत्ममोचनमूल्यमिव तत् दत्तवान् । दिव्यपुरुषदत्तं तत् भूषणोत्तमं सकलरत्ना-
करस्य जलधेः मूल्यवत्तमं च किमपि अतिविचित्र रत्नमिव, इत्येव कवेरभिप्रायः ।
'दिव्यपरिग्रहम्',—दिव्यस्य ब्रह्मलोकवासिनः कस्यचित् पुरुषस्य, परिग्रहः प्रति-
ग्रहः, तस्मात् प्रतिग्रहरूपेण लब्धम् इति यावत्, तम् । तथा चात्र रामायणकथा,—
पुरा किल भगवान् अगस्त्यः हिमवत्पर्यटन् एकदा क्वचित् विजनं वनं विवेश ।
तत्र च सरसः सलिले सुपुष्टं समुज्ज्वलं शवदेहं दृष्ट्वा परं विस्मयम् अगच्छत् ।
इदानीम् विजने वने अपूर्वरूपस्य शवस्य लक्षण, इत्येवं चिन्तयति तस्मिन् एको
दिव्यपुरुषो दिव्याभरणभूषितो विमाने दिव्याङ्गनाभिः सेव्यमानस्तत्राजगाम ।
अवतीर्य च स तस्मिन् सरसि तस्य शवस्य मांसं समाहृत्य भक्षयामास । अथ स
यावत् पुनर्विमानमारुह्य प्रयाति तावत् तम् अगस्त्य पप्रच्छ, को भवान् कथं वा
ईदृशं शवमांसभोजनमाचरतीति । स उवाच, पुराऽहं विदर्भनगरे श्वेतनामा
राजा आसम् । तत्र च सुचिरं राज्यं कृत्वा तपश्चरणार्थम् अस्मिन् विविक्ते वने
आगच्छम् । अत्र चाऽहं सुचिरं तपस्तप्त्वा ब्रह्मलोकं प्राप्तः । ब्रह्मलोकेऽपि मानव
इवाहं सततं क्षुत्पिपासादुःखेन पीड्यमानो ब्रह्माणमस्य कारणमपृच्छम् ।
ब्रह्मोवाच, यतस्त्वया तपश्चरताऽपि क्षुत्पिपासे असहमानेन भोजनपाने सम्यक्
स्वदेहं पुष्टिं नीतः, ततस्त्वामत्रापि सततं क्षुत्पिपासाकष्टं बाधते, तत् तत् स्व
शरीरस्य सजीवमिव अविकृतं तिष्ठति । त्वं प्रतिदिनं तत्र गत्वा तस्य शवस्य
सुस्वादुरं मांसं भक्षयन् क्षुधानिवृत्तिं कुरु । यदा च भगवान् अगस्त्य तत्र वने
आगमिष्यति तदा तस्मै स्व दिव्यम् आभरणोत्तमं दत्त्वा तत्प्रसादात् अस्मात्

क्लेशात् विमोक्ष्यसे इति। इत्येवमगस्त्यः सर्व्वं वृत्तान्तं श्रुत्वा तस्माच्च दिव्य रथ लब्ध्वा च तस्मात् क्लेशात् मोचयामास। ततस्तुष्टः पुरुषस्तदेव भ स रामाय दत्तवान्। इति। 'पीतेन समुद्रेण' &c.—अत्रेयं पौराणिकी —पुरा किल सत्ययुगे विनिहते वृत्रे तदनुचराः कालेया नाम दैत्याः समुद्रगर्भे विविशुः रात्रौ च निर्गत्य मुनिजनान् हन्तुमारेभिरे। एवं मुनि क्षये प्रवृत्ते नष्टधर्म्मे भयार्त्ते जगदालोक्य ब्रह्मपुरःसरा देवा नारायणं शरणं जग्मुर्भगवन्। कालेयैः मुनिकुलवधेन जगदिदं क्षीणधर्म्मं क्रियते, क्षीणे च पृथिवी क्षयमेष्यति, क्षीणायाञ्च पृथिव्यां त्रिदिवमपि क्षयमेष्यति, समुद्रगर्भस्थ ते दैत्या न शक्या हन्तुमस्माभिरिति। अथ तान् विष्णुरुवाच, उपगच्छत भ भगवन्तमगस्त्यं, स एव समुद्रं शोषयितुं समर्थः, निःशोषिते तेन समुद्रे हतास दैत्याः भवतां वध्यतामुपयास्यन्तीति। अथ सर्व्वैर्देवैरभ्यर्थितो भगवान महार्णवं तं चचामाशोषयत्, दैत्याश्च देवैर्निहता इति।

৫৫। কুম্ভযোনি অগস্ত্য, দিব্যপুরুষের নিকট হইতে প্রতিগৃহীত আভরণ রামকে প্রদান করিলেন। সমুদ্র অগস্ত্য কর্তৃক পীত হইয়া মুক্তি লাভের জন্য নিষ্ক্রয়স্বরূপ অগস্ত্যকে দান করিয়াছিলেন।

[illegible]

55 The jar-begotten sage presented to Rāma an ornament which was the gift of a celestial being, and which was so excellent that it seemed as if the sea, [illegible] by the sage, had offered it to him as a ransom.

तं दधन्मैथिलीकण्ठनिर्व्यापारेण बाहुना।
पश्चान्निववृते रामः प्राक् परासुर्द्विजात्मजः॥५६

५६। तमिति। मैथिलीकण्ठनिर्व्यापारेण बाहुना, तम् हारं दधत् रामः, पश्चात् निववृते निवृत्तः, परासुः (१) मृतः द्विजात्मजः प्राक् (२) रामात् पूर्व्वं निववृते।

५६। राम मैथिलीकण्ठनिर्व्यापारेण बाहुना तं दधत् पश्चात् निववृते परासुः द्विजात्मजः प्राक् निववृते।

५६। मैथिल्याः कण्ठः मैथिलीकण्ठः मैथिलीकण्ठे नास्ति व्यापारो यस्य स, तेन। दधता रामेण पश्चात् निववृते, परासुना द्विजात्मजेन प्राक् निववृते, इति वाच्यान्तरम्।

५६। सीताकण्ठालिङ्गनविरहिते बाहौ तम् अमूल्यरत्नम् अलङ्कारं परिधाय रामो राजधानीं प्रत्यायनी, ततो द्विजात्मजस्तु रामागमनात् पूर्व्वमेव प्रत्यापन्नजीवितो बभूव, इति विशदार्थः। 'मैथिलीकण्ठनिर्व्यापारेण' अस्य तात्पर्य्यं यथा,—रामो जानकीयत्न सुखे प्रणयभङ्गो मा भवित्ति तदाभरणं परिदधे, अथवा तस्य प्रियतमाविरहितस्य किं वा तेन विभूषणेन। विरहिणां भूषणं निष्फलमेवेति भाव।

৫৬। অতঃই মৃত ব্রাহ্মণপুত্র (যম ভবন হইতে) প্রত্যাগত হইয়াছিল, পশ্চাৎ রাম সীতাকণ্ঠালিঙ্গনে বর্জিত নিজ ভুজে সেই অলঙ্কার ধারণ করিয়া প্রত্যাগত হইলেন।

56 Placing the ornament on the arm which was no longer thrown round the neck of Maithilí Ráma returned, after the dead son of the Brahmana has returned to life.

तस्य पूर्व्वोदितां निन्दां द्विजः पुत्त्रसमागतः।
स्तुत्या निवर्त्तयामास त्रातुर्वैवस्वतादपि ॥५७॥

५७। तस्येति। पुत्त्रसमागतः, पुत्त्रेण सङ्गतः द्विजः, वैवस्वतात् यमादपि, त्रातुः (१) रक्षकस्य। औत्पत्तिकां भयहेतुरिव्यया-

[५६] (१) परा away, असु vital breath. (२) प्राच् from अञ्च, अपूर्व to go, किप् adj.

दानात् पञ्चमी। 'तस्य रामस्य' पूर्व्वोदिता पूर्व्वोक्तां निन्दां, स्तुत्या निवर्त्तयामास (२)।

५७। पुत्रसमागतः द्विजः वैवस्वतादपि त्रातुः तस्य पूर्व्वोदिता निन्दा स्तुत्या निवर्त्तयामास।

५७। पुत्रेण समागतः पुत्रसमागतः। पुत्रसमागतेन द्विजेन पूर्व्वोदिता निन्दा निवर्त्तयाञ्चक्रे, इति वाच्यान्तरम्।

५७। अधुना सः ब्राह्मणो मृतं पुत्रं पुनर्ज्जीवितं लब्ध्वा यमादपि अभयदातारं तं रामं स्तोतुमारेभे, तेन च स्तुतिवाक्येन रामे पूर्व्वप्रयुक्तं 'शोचनीयासि वसुधे' इत्यादिरूपं निन्दावचनम् अपाचकार, इति विशदार्थः।

৫৭। ব্রাহ্মণ মৃতপুত্র পুনরায় লাভ করিয়া, যম হইতেও ত্রাণকর্তা সেই রামের প্রতি পূর্ব্বে প্রযুক্ত নিন্দাকে একণে স্তব দ্বারা নিরাকৃত করিলেন।

57. Being re-united with his son, the Brahmana retract by praise the censure which he had pronounced against Rām who was a protection even against the king of death.

तमध्वराय मुक्ताश्वं रक्षःकपिनरेश्वराः।
मेघाः शस्यमिवाम्भोभिरभ्यवर्षन्नुपायनैः ॥५८॥

५८। तमिति। अध्वराय अश्वमेधाय, मुक्ताश्वं तं रामं, रक्षःकपिनरेश्वराः सुग्रीवविभीषणादयः राजानश्च, मेघाः अम्भोभिः शस्यम् इव, उपायनैः (१) अभ्यवर्षन् (२)।

५८। रक्षःकपिनरेश्वराः अध्वराय मुक्ताश्वं तं, मेघाः अम्भोभिः शस्यम् इव उपायनैः अभ्यवर्षन्।

[५७] (१) त्रै to protect, तृच् aff (त्रायते, इति त्राता). (२) नि, वृत् to stay (णिच्),—वर्त्तयति। अवर्त्तयत्। अवीवृतत्-अववर्त्तत्। वर्त्तयामास। &c.

[५८] (१) उपायन from उप, इण् to go, or अय to go, ल्युट् aff (उपेयते उपाय्यते वा, इण् गतौ, अय गतौ वा कर्म्मणि ल्युट्). (२) अभि, वृष् to rain,—वर्षति। अवर्षत्। अवर्षीत्। ववर्ष। &c.

५८। रत्नानि च कपयश्च नरेश्वराश्च ते। मुक्तः यज्ञी येन सः, तम्। …कपिनरेश्वरैः अध्वराय मुक्ताश्वः सः मेघैः सस्यमिव अभ्यवर्षत, इति …त्यान्तरम्।

५८। यथा हि मेघाः शस्यस्य उपरि अविरलां जलधारां वर्षन्ति, तथा राक्ष…न्द्रा वानरेन्द्रा नरेन्द्राश्च सर्व्वे अकल्पितम् उपहारराशिं रामस्य अश्वमेधदा…थम्, इति विग्रहार्थः। मेघधारिसाम्यात् उपायनानाम् अमेयत्वं गम्यते। अत्र उपायनदानेन राज्ञाम् रामाधीनत्वं सूचितं, विश्वविजयिन एव अविरयस्य अश्वमेधे अधिकारित्वात्।

৫৮। রাম অশ্বমেধের জন্য অশ্ব মোচন করিলেন, মেঘ যেমন শস্যের উপর বারি বর্ষণ করে, তেমনি রাক্ষসেন্দ্র কপীন্দ্র ও নরেন্দ্রগণ রামের উপর উপহার বর্ষণ করিতে লাগিলেন।

58. As clouds shower rain upon corn so the chiefs of Rakshasas, monkeys and men showered presents upon Rama who had let loose the sacrificial horse for the performance of an Aśwamedha.

## दिग्भ्यो निमन्त्रिताश्चैनमभिजग्मुर्महर्षयः।
## न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्यपि॥५९॥

५९। दिग्भ्य इति। निमन्त्रिताः (१) आहूता, महर्षयः भूम्याः सम्बन्धीनि, भौमानि (२) धिष्ण्यानि (३) स्थानान्येव न। 'धिष्ण्यं स्थाने गृहे भेऽग्नौ' इत्यमरः। किन्तु ज्योतिर्मयानि नक्षत्ररूपाणि धिष्ण्यान्यपि हित्वा, दिग्भ्यः एनं रामम् अभिजग्मुः।

(५९) (१) मन्त्र to consult, with नि to invite. (२) भौम from भूमि earth, अण् aff. (३) धिष्ण्य from धिष् to sound or धृष् to be proud, &c. (irregular) (धिष्ण्य शब्दोऽपि स्त्री, क्लि बचनं, पुं न… … … … …)

[illegible]

[illegible]

[illegible]

59 Great sages began to come to him, invited from all directions, and not only from places on this earth, but also from luminous spheres.

उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ ।
अयोध्या सृष्टलोकेव सद्यः पैतामही तनुः ॥६०॥

६०। उपेति। चत्वारि द्वाराण्येव मुखानि यस्याः सा चतुर्द्वारमुखी अयोध्या, उपशल्येषु (१) ग्रामान्तेषु निविष्टैः। "ग्रामान्त उपशल्यं स्यात्" इत्यमरः। तैः महर्षिभिः सद्यः सृष्टलोका पितामहस्येयं पैतामही (२) तनुः मूर्त्तिः इव, बभौ।

६०। चतुर्द्वारमुखी अयोध्या उपशल्यनिविष्टैः तैः सद्यः सृष्टलोका पैत

---

[६०] (१) उपशल्य from उप near, शल् to go, यत् aff. (२) पितामह Brahmá, अण् and ङीप् affs.

...ौ तनुः इव बभौ । चतुर्द्वारमुखा अयोध्या सृष्टोत्सुका वैधात्री तन्वा ...बभे, इति वाक्यान्तरम् ।

६० । यथादि मुखचतुष्टयशालिनी ब्रह्मतनुः सद्य सृष्टैः प्रजापतिभिः मह-...भिः परिवारिता शुशुभे, तथा द्वारचतुष्टयशालिनी अयोध्या ग्रामान्तोपनिविष्टै... सलाद्वैर्महर्षिभिः परिवारिता शोभते स्म, इति निष्कर्षः । प्रजा. सिसृक्षोः ...सृष्ट प्रथम मरीच्यादयः प्रजापतयो जज्ञिरे इत्यागम । यथा विष्णुपुराणे,— ...हेतारीव ब्रह्मासो भवत्प्रजामुर्विमाम् । मरीचिमिश्रा दक्ष प्रजानामस्य ...तः' । इति । 'उपशल्यनिविष्टै'—विविक्तदेशप्रियत्वात् महर्षीणां बहुजन-...बाधे नगरे स्थितिर्पीडा मा भूदिति रामो विविक्तेषु ग्रामान्तेषु तेषां वासस्थान ...दयामास, इति भावः ।

६० । সেই মহর্ষিগণ গ্রামান্তে আসিয়া অবস্থান করিতে লাগিলেন । চারি দ্বার ...বিড় অযোধ্যা । সেই মহর্ষিগণ পরিবৃত অযোধ্যা [illegible] যেন চারি মুখ ...বিত ব্রহ্মার দেহ সদ্য সৃষ্ট প্রজাপতিগণে পরিবৃত হইয়া শোভিত ।

60. The city of Ayodhya with its four gates like four ...ouths and the sages lodged in its remote suburbs, looked like ...e body of Brahma from which created beings have just issued

...ाघ्यस्त्यागोऽपि वैदेह्याः पत्युः प्राग्वंशवासिनः ।
...अनन्यजानेः सैवासीद् यस्माज्जाया हिरण्मयी ॥६१

६१ । श्लाघ्य इति । वैदेह्या त्यागोऽपि श्लाघ्य (१) अभूदेव । ...त. ? यस्मात् प्राग्वंश प्राचीनवंश यज्ञशालाविशेष तत्रासिन ...अनन्या जाया यस्य तस्य अनन्यजानेः । जायाया निङिति समासा-...न्तो निङादेशः । पत्युः रामस्य हिरण्मयी (२) सौवर्णी । हाशिह ...सायनादिसूत्रेण निपातः । सा सीतैव जाया पत्नी आसीत् । कवि-...वाक्यमेतत् ।

[६१] (१) श्लाघ्य praise, [illegible] (२) हिरण्मयी [illegible]
...[illegible]

६१। वैदेह्याः त्यागः अपि श्लाघ्यः, यस्मात् प्राग्वंशवासिनः अनन्यजानेः पत्युः हिरण्मयी सा एव जाया आसीत्। त्यागेन श्लाघ्येन (भूयते), हिरण्मय्या तया एव जायया अभूयत, इति वाच्यान्तरम्।

६१। पतिकृतपरित्यागः लोके सीतायाः दुःसहदुःखहेतुरपि अधुना श्लाघाहेतुरेव सञ्जातः, यतः तत्पतिः सदारकर्त्तव्येऽपि अश्वमेधे दारान्तरपरिग्रहं त्यक्त्वा, यज्ञशालायां सीतायाएव सुवर्णमयीं प्रतिकृतिं सबहुमानं सहधर्मचारिणीपदे वरयामास, इति विशदार्थः। अहो धन्या सा नारी यस्याः प्रतिकृतिमपि भर्त्ता बहुमेने, इति भावः। तथा च उत्तरचरिते, आत्मनो हिरण्मयीं प्रतिकृतिं पत्युरश्वमेधाय सहधर्मचारिणीं श्रुत्वा—'सीता। (सोच्छ्वासं सास्रम्)—अज्जउत्तो दाणिं सि तुमं। अम्महे उक्खाविदं मे दाणिं परिच्चाअसल्लं अज्जउत्तेण। धण्णा सा जा अज्जउत्तेण बहुमण्णीअदि' &c. (आर्य्यपुत्रः इदानीम् असि त्वम्। अम्महे उत्खातं मे इदानीं परित्यागशल्यम् आर्य्यपुत्रेण। धन्या सा या आर्य्यपुत्रेण बहुमन्यते, &c).

৬১। পতি যে পরিত্যাগ করিয়াছিলেন সেও সীতার শ্লাঘার কথা, কেন না, তাঁহারই স্বর্ণময়ী প্রতিমূর্ত্তি যজ্ঞশালায় দারান্তরশূন্য রামের সহধর্মচারিণী হইয়াছিল।

61. Since the husband of Vaidehī, without taking a second wife, made a golden image of her own, his wife, whilst residing in the hall of sacrifice, even her abandonement by him was for her a matter of pride and glory.

**विधेरधिकसम्भारस्ततः प्रववृते मखः।**
**आसन् यत्र क्रियाविघ्ना राक्षसा एव रक्षिणः॥६२॥**

६२। विधेरिति। ततः, विधेः शास्त्रात्, अधिकसम्भारः अति-रिच्यमानपरिच्छदः, मखः (१) प्रववृते प्रवृत्तः। यत्र मखे विहन्यन्ते आभिरिति विघ्नाः प्रत्यूहाः। घञर्थे कविधानमिति कः। अत्र

(६२) (१) मख to go, घ aff. (२) रक्ष to preserve, णिनि aff. (अदन्त वा).

अपूर्वलक्षणायाः क्रियायाः विघ्नाः अनुष्ठानविघातकाः, राक्षसाः [illegible] रक्षिणः (२) रक्षकाः आसन्।

६२। ततः विधेः अधिकसम्भारः मखः प्रववृते, यत्र क्रियाविघ्नाः राक्षसाः एव रक्षिणः आसन्। अधिकसम्भारेण मखेन प्रववृते, क्रियाविघ्नैः राक्षसैः रक्षिभिः अभूयत, इति वाच्यान्तरम्।

६२। अथ तस्मिन् रामाश्वमेधे सर्वमेव लोकोत्तरं जातम्, यथाहि, शास्त्रस्य विधेः अतिरिक्ता यज्ञसम्भारास्तत्र परिकल्पिता, यज्ञविघातकाश्च सर्वं राक्षसा एव यज्ञरक्षकाः आसन्, इति विमृशार्थः।

৬২। অনন্তর, শাস্ত্র এতদূর নির্দিষ্ট আছে তাহা হইতেও অধিকতর সমারোহে যজ্ঞ আরম্ভ হইল, যে স্থলে যজ্ঞবিঘাতক রাক্ষসেরাই রক্ষকরূপে নিযুক্ত হইয়াছিল।

62. Then began the sacrifice on a scale larger than is prescribed in *S'a'stras*, and the Rákshasas who had been destroyers of sacrifices began to act as sentinels.

अथ प्राचेतसोपज्ञं रामायणमितस्ततः।
मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ ॥६३॥

६३। अथेति। अथ मैथिलेयौ मैथिलीतनयौ। स्त्रीभ्यो ढक्। कुशलवौ, गुरुणा वाल्मीकिना, चोदितौ (१) प्रेरितौ सन्तौ, प्राचेतस (२) वाल्मीकि, उपज्ञायते इति उपज्ञा (३)। आतश्चोपसर्गे इति कर्मण्यङ्प्रत्ययः। प्राचेतसस्य उपज्ञा प्राचेतसोपज्ञं प्राचेतसेनादौ ज्ञातम् इत्यर्थः। "उपज्ञा ज्ञानमाद्यं स्यात्" इत्यमरः। उपज्ञोपक्रमं तदाद्याचिख्यासायामिति नपुंसकत्वम्। [illegible] अयते अनेन इत्ययनं रामस्य अयनं चरितं रामायणं रामायणाख्यं काव्यम्। पूर्वपदात् संज्ञायामग इति णत्वम् उपज्ञातकाव्यमित्यर्थः। इतस्ततः जगतुः (४)। गायतेर्लिट्।

(६३) (१) चोदित from चुद to send. ... (२) प्राचेतस the father of the poet. ... (३) उपज्ञा from ज्ञा, to know.

६३। [illegible]

[illegible]

[illegible]

63 Then Kuśa and Lava, the sons of Maithilī, began, by order of their preceptor to go about singing that Rāmāyaṇa which had been first revealed to Vālmīki.

## वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वनौ ।
## किं तद् येन मनो हर्तुमलं स्यातां न शृण्वताम् ॥६४

६४। वृत्तमिति। रामस्य वृत्तं वर्ण्यं वस्तु इति शेषः। वाल्मीकेः कृतिः (१) काव्यं गेयम् इति शेषः, तौ कुशलवौ किन्नरस्वनौ किन्नरकण्ठौ गायकौ (२) पुनरिति शेषः, अतएव तत् किं येन निमित्तेन तौ शृण्वतां मनः हर्तुम् अलं शक्तौ न स्याताम्? सर्वं सरस इत्यर्थः।

---

चङ् aff (४) गै to sing,—गायति, अगायत्। अगासीत्, अगासिष्टाम् अगासिषुः। जगौ। &c. कर्म्मणि,—गीयते। अगायि।,&c, गीतः। &c.

[६४] (१) कृ to do, क्तिन् aff (२) गायक from गै to sing, ण्वुल् aff

६४। रामस्य वृत्तं, वाल्मीकेः कृतिः, तौ किन्नरस्वनौ (गायकौ), (अतएव) तत् किं येन (तौ) श्रृण्वतो मनः हर्त्तुम् अलं न स्याताम्। ताभ्यां कुशलवाभ्यां मनः हर्त्तुम् अलं न भूयेत, इति वाच्यान्तरम्।

६४। एकतस्तावत् सकललोकोत्तरं रामचरितं तस्य वर्णनीयं वस्तु, अपरतश्च दिव्यज्ञानसम्पन्नो भगवान् कविकुलवाल्मीकिः तस्य प्रणेता, पुनरपि मधुरस्वरौ किन्नरकण्ठौ तौ कुशलवौ तस्य गायकौ, अतएव तत् रामायणं काव्यं मनः श्रोतॄणां हृदयानि कथं वा न समोहयत, इति निष्कर्षः। [illegible] गुणसम्पत्तिः समुदितं इत्यर्थः। [illegible] [illegible] [illegible] इति।

[illegible]

64. With such a [illegible] as that of [illegible] such a sage as Valmiki and sung by [illegible] Kusa and Lava endowed with the [illegible] what was wanted to captivate the hearts [illegible]

रूपे गीते च माधुर्यं तयोस्तज्ज्ञनिवेदितम् ।
ददर्श सानुजो रामः शुश्राव च कुतूहली ॥६५॥

६५। रूपे इति। [illegible] निवेदितं, [illegible] माधुर्यं (क) रामः [illegible] ददर्श शुश्राव च।

[illegible]

६५। तज्ज्ञैः निर्दिष्टम् तयोः रूपं गीतं च माधुर्यं सानुजः रामः कुतूहलवान् ददर्श शुश्राव च। सानुजेन रामेण कुतूहलिना (सता) माधुर्यं ददृशे शुश्रुवे च, इति वाच्यान्तरम्।

६५। कुशलवयोः रूपदर्शनेन गीतश्रवणेन च विमुग्धाः केचित् अभिज्ञाः रामाय तद्वृत्तान्तं निवेदयामासुः, रामः समुपजातकुतूहलो भ्रातृभिः सार्द्धं तयोः अभिरामं रूपं प्रत्यक्षीकृतवान् मधुरं सङ्गीतम् आकर्णितवान् इति विशदार्थः। 'तज्ज्ञैः',—तौ रूपमाधुर्यगीतमाधुर्ये जानन्तीति तज्ज्ञाः तैः, रूपदर्शनगीतश्रवणकारिभिः इति यावत्।

৬৫ যাঁহারা তাঁহাদের মধুর মূর্ত্তি দর্শন ও মধুর সংগীত শ্রবণ করিয়াছেন তাঁহাদের নিকট জ্ঞাত হইয়া রাম কৌতুকী হইয়া অনুজগণের সহিত তাহার দর্শন ও শ্রবণ করিলেন।

65 On being informed of their beauty of appearance and sweetness of voice, by persons who had seen them, Rāma with his younger brothers with excited curiosity, saw their beauty and the heard of melodious songs

**तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ।**
**हिमनिष्यन्दिनी प्रातर्निर्वातेव वनस्थली ॥६६॥**

६६। तदिति। तयोः संगीतश्रवणे एकाग्रा आसक्ता, अश्रुमुखी आनन्दात् इति भावः संसत् (१) सभा, प्रातर्हिमनिष्यन्दिनी (२) निर्वाता वातरहिता वनस्थली इव, बभौ शुशुभे। आनन्दपारवश्यान्निःस्पन्दाऽऽसीदित्यर्थः।

६६। तद्गीतश्रवणैकाग्रा अश्रुमुखी संसत् प्रातः हिमनिष्यन्दिनी निर्वाता वनस्थली इव बभौ।

६६। अश्रूणि मुखे यस्याः सा। हिमानां निष्यन्दो विद्यते यस्याः, इति हिमनिष्यन्दिनी। नास्ति वातो यस्यां सा। तद्गीतश्रवणैकाग्रया अश्रुमुख्या संसदा हिमनिष्यन्दिन्या निर्वातया वनस्थल्या इव बभे, इति वाच्यान्तरम्।

[६६] (१) सम्, सद् to go, क्विप् aff. (२) हिम dew, नि, स्यन्द् to drop down, णिनि aff (स्त्रियाम्)

सीताद्वय मिरीक्ष्य मत सवेतः सर्वो जनः विस्मयात् अनिमिषलोचनयो, [illegible]
[illegible] । 'वयोवर्णविभवाविं',—तयोः बाल्यात् सुनिवेशवलात [illegible]
मेव रामान [illegible] इत्यर्थ तु अभिन्नरूपत्वम् इति भावः । 'बाल्यम्' [illegible]
'यत् तदोर्मात तदेव शोभा तदेव नेपथ्यविभूषणत्वम्' इत्यादि [illegible]
इत्यम् इति भावः । [illegible] रामायणे,—'[illegible] परस्पर [illegible]
[illegible] विस्मय [illegible] । [illegible] यदि न [illegible]
[illegible] इति । [illegible] इति ।

[illegible]
[illegible]

67. On seeing how perfectly they resembled Rama in figure and raiment, the people remained gazing with unwinking eyes.

उभयोर्न तथा लोकः प्रावीण्येन विसिस्मिये ।
नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा ॥६८॥

৬৮। উভয়ের গাননৈপুণ্যে লোকের যতদূর বিস্ময় না জন্মিল, রাজার প্রীতিপ্রদত্ত উপহারে উভয়ের নিস্পৃহতা দেখিয়া লোকের ততোধিক বিস্ময় জন্মিল।

68. Their want of desire to possess the gifts showered upon them by the king ( Ráma ) in delight, excited more wonder in the pepole than their skill in the art of music.

**गेये को नु विनेता वां कस्य चेयं कृतिः कवेः ।**
**इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ॥६९**

६९। गेय इति। गेये (१) गीते, को नु, वां युवयोः, विनेता (२) शिक्षकः ? नुशब्दः प्रश्ने। "नु पृच्छायां वितर्के च" इत्यमरः। 'गेये केन विनीतौ वाम्' इति पाठे वामिति युष्मदर्थ-प्रतिपादकमव्ययं द्रष्टव्यम्। तथाचायमर्थः, केन पुंसा वां युवां गेये विषये विनीतौ शिक्षितौ ? कर्मणि निष्ठाप्रत्ययः। इयञ्च कस्य कवेः कृतिरिति राज्ञा स्वयं पृष्टौ तौ कुशलवौ वाल्मीकिम् अशंसताम् उक्तवन्तौ, विनेतारं कविं च इत्यर्थः।

६९। गेये कः नु वां विनेता, इयं च कस्य कवेः कृतिः, इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिम् अशंसताम्। पृष्टाभ्यां ताभ्यां वाल्मीकिः अशंस्यत, इति वाच्यान्तरे।

६९। कः खलु स महापुरुषो यस्य सकाशात् युवाम् ईदृशीं गानविद्यां शिक्षितवन्तौ, को वा स धन्यः कविः, यः ईदृशं लोकोत्तरं काव्यं प्रणीतवान्, इति पृष्टवति महाराजे रामे, तौ कुशलवौ अवदताम्, स हि नौ ईदृशः इह रामायणकविः भगवान् वाल्मीकिरिति, इति विशदार्थः। 'गेये को नु विनेता वाम्' इत्यत्र 'गेये केन विनीतौ वाम्' इति हेमाद्रिदिनकरादिसम्मतः पाठः। तत्र दिनकरव्याख्या यथा,—'वामिति यदि युष्मदर्थकोऽव्ययः तदा एवं व्याख्या भवति। वां युवां गेये केन शिक्षितौ कस्य कवेरियं कृतिः'। वा

[६९] (१) गेय from गै to sing, यत् aff. (२) नी with वि, to teach, तृच् aff.

पुत्रयोः सम्बन्धिनः कस्य कवेरिति केचित् व्याचचते। 'गेये केन विनीतौ वाम्' इति दक्षिणावर्त्तः पठति।

६९। তোমাদের এ গীতের শিক্ষাদাতা কে? এ কাব্যই বা কোন কবির রাজা স্বয়ং ইহা জিজ্ঞাসা করায়, তাহারা বাল্মীকির নাম করিল।

69. The king having personally asked them who was thei musical preceptor and who was the poet by whom this poe was composed, they mentioned the name of Válmíki.

**अथ सावरजो रामः प्राचेतसमुपेयिवान्।**
**उरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत् ॥७०**

७०। अथेति। अथ सावरजः रामः, प्राचेतसं वाल्मीकिम् उपेयिवान् (१) प्राप्तः सन्, देहम् आत्मनः उरीकृत्य (२) आत्मानं स्थापयित्वा इत्यर्थः, राज्यम्, अस्मै प्राचेतसाय, न्यवेदयत् समर्पितवान्।

७०। अथ सावरजः रामः प्राचेतसम् उपेयिवान् आत्मनः देहम् उरीकृत्य अस्मै राज्यं न्यवेदयत्।

७०। सावरजेन रामेण प्राचेतसमुपेयुषा राज्यं न्यवेद्यत, इति वाच्यान्तरम्।

७०। तयोर्मुखात् तदवगमानन्तरं रामो भ्रातृभिः सार्द्धं वाल्मीकिमुपगम्य तत्पादपद्मेषु राज्यादिकं सर्व्वमेव समर्प्य तस्य भगवतः सन्निधौ राज्यकार्य्यं पुरस्कृत्य यामकरोत्, इति निष्कर्षः। 'उरीकृत्यात्मनो देहम्'—आत्मनो देहं स्वशरीरम्, उरीकृत्य स्वीकृत्य, स्वशरीरमात्रं स्ववशे संस्थाप्य इत्यर्थः। इति वाल्मीकिप्रतिपादितसर्व्वस्वः केवलं शरीरमात्रेण तस्थौ इति तात्पर्य्यम्, तथा पद्मपुराणे—'शरीरमात्रं च नरेन्द्र। तिष्ठन् आभासि सौधप्रतिपादितार्थः।' इति। 'दूरीकृत्यात्मनो देहम्' इति वल्लभः पठति, 'अस्मै मुनये आत्मदेहं दूरीकृत्य राज्यं न्यवेदयत् ददौ,' परन्तु आत्मदेहं न ददौ, इत्यर्थः', इति व्याचष्टे च।

---

[७०] (१) उप, इण् to go, क्वसु aff. (२) उरी a particle, implying (especially in composition), promise, assent, &c., कृ to do, ल्यप् aff.

৭০। অনন্তর রাম অনুজগণের সহিত বাল্মীকির নিকট গমন করিলেন, এবং আপন দেহমাত্র অবশিষ্ট রাখিয়া রাজ্যাদি আর সকলি তাঁহাকে সমর্পণ করিলেন।

70. Ráma, with his younger brothers, next went to Válmíki, and with the exception of his own body, offered to him his kingdom and all.

स तावाख्याय रामाय मैथिलेयौ तदात्मजौ।
कविः कारुणिको वव्रे सीतायाः सम्परिग्रहम्॥७१॥

७१। स इति। करुणा प्रयोजनम् अस्य कारुणिकः (१) दयालुः। प्रयोजनमिति। ठञ्। "स्याद्दयालुः कारुणिकः" इत्यमरः। सः कविः, रामाय तौ मैथिलेयौ तदात्मजौ रामसुतौ आख्याय, सीतायाः सम्परिग्रहं स्वीकारं वव्रे (२) ययाचे।

७१। कारुणिकः स कविः तौ मैथिलेयौ तदात्मजौ आख्याय सीतायाः सम्परिग्रहं वव्रे।

७१। कारुणिकेन तेन कविना सीतायाः सम्परिग्रहो वव्रे इति वाच्यान्तरम्।

७१। एतौ सीतासुतौ कुशलवौ तवैव आत्मसम्भवौ इति रामाय वर्णयित्वा दयार्द्रचेताः वाल्मीकिः निरपराधां वधूमां धर्मपत्नीं परिगृहाणेति प्रार्थयामास। सीतादुःखहरणार्थं प्रार्थनात् 'कारुणिकः' इत्युक्तम्।

৭১। পরম কারুণিক কবি বাল্মীকি, ঐ কুশ লব যে উঁহারই (রামেরই) পুত্র ইহা উল্লেখ করিয়া সীতাকে গ্রহণ করিতে প্রার্থনা করিলেন।

71. Saying to Ráma that Lava and Kuśa were his (Rama's) own sons, the tender-hearted poet prayed that Sítá might be taken back.

तात शुद्धा समक्षं नः स्नुषा ते जातवेदसि।
दौरात्म्याद्रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः॥७२॥

---

[७१] (१) करुणा kindness, ठञ् affix (करुणा प्रयोजन, कारुणिक).

७२। तातेति। हे तात! ते स्नुषा (१) नः अस्माकम् अक्ष्णोः समीपं समक्षम् (२)। अव्ययीभावे शरत्प्रभृतिभ्य इति समासान्तष्टच्। जातवेदसि (३) वह्नौ शुद्धा। नास्माकमविश्वास इत्यर्थः। किन्तु रक्षसः रावणस्य दौरात्म्यात् (४) अत्रत्याः (५) प्रजाः तां न श्रद्दधुः (६) न विश्वस्तवत्यः।

७२। (हे) तात! ते स्नुषा नः समक्षं जातवेदसि शुद्धा, (किन्तु) रक्षसः दौरात्म्यात् अत्रत्याः प्रजाः न श्रद्दधुः। स्नुषया शुद्धया (भूयते) अत्रत्याभिः प्रजाभिः सा न श्रद्दधे; इति वाच्यान्तरम्।

७२। राम एवं सीतापरित्यागसम्बन्धिनीं वाल्मीकिं प्रत्युवाच, हे पितः! तव पुत्रवधूः सीता अस्माकं समक्षमेव वह्नौ आत्मशुद्धिं प्रदर्शितवती, अतो मामकं तद्विषये कश्चिदविश्वासः, किन्तु अतिदुर्वृत्तरावणगृहोषितायाः सीतायाः अति-दुरहतां ताम् अग्निशुद्धिं नाजानन्तो लोका न विश्वसन्ति, अतो लोकापवादभयादेव निरपराधा धर्मपत्नी विसर्जिता, इति निष्कर्षः। 'नात्रत्याः श्रद्दधुः प्रजाः'—तथा च उत्तररामचरिते —'चौरं लोके वितथमथमी या च वह्नौ विशुद्धिर्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु' इति।

৭২। হে পিতঃ! আপনার পুত্রবধূ আমাদের সমক্ষেই অগ্নি-পরীক্ষায় আত্ম-শুদ্ধি প্রদর্শন করিয়াছেন, কিন্তু রাবণের দুঃশীলতাহেতু তাঁহার (সীতার) চরিত্রে অত্রত্য লোকের বিশ্বাস নাই।

---

[৭২] (১) स्नु to distil, सक् unádi aff. (२) सम् in the sense of समीपे, efore, अक्षि eye, टच् aff. (३) जातवेदस् from जात created, विद to now, असुन् aff (जातं वेदो धनं यस्मात्। यद्वा, जातं वेत्ति वेदयते वा, विद ज्ञानादौ, असुन्प्रत्ययः। यद्वा, जातानि भूतानि चराचराणि सर्वज्ञत्वेन स्वयं तत्पत्वेन च वेत्ति। यद्वा, जातानि सर्वकारणत्वेन यं विदन्ति)। (४) दौरात्म्य om दुरात्मन् wicked, ष्यञ् aff (५) अत्रत्य from अत्र here, त्यप् aff. (अव्ययात् त्यप्) (६) श्रत् a particle, implying faith or respect, and t to have, (लिट् बहुवचनं).

72. O sire, the wife of your son has proved in our presence [her] purity by passing through an ordeal of fire, but the Rák-[sh]asa (रावण) having been a reprobate character, pepole here [be]lieved it not.

[त]ाः स्वचारित्रमुद्दिश्य प्रत्याययतु मैथिली।
[त]तः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया ॥७३॥

७३। ता इति। मैथिली, स्वचारित्रम् (१) उद्दिश्य ताः प्रजाः, [प्र]त्याययतु (२) विश्वासयतु। विश्वासस्य शुद्धिरूपत्वात् शौ गमि-[र]बोधन इति ण्यो गम्यादेशो नास्ति। ततः अनन्तरं, पुत्रवतीम् [ए]नां सीता त्वदाज्ञया प्रतिपत्स्ये स्वीकरिष्ये।

७३। मैथिली स्वचारित्रम् उद्दिश्य ताः प्रत्याययतु, ततः पुत्रवतीम् एनां [त्व]दाज्ञया प्रतिपत्स्ये। मैथिल्या ताः प्रत्याय्यन्ताम्, पुत्रवती एषा (मया) प्रति-[प]त्स्यते, इति वाच्यान्तरम्।

७३। सीता पुनरेव चात्मशुद्धि प्रदर्श्य यत् सर्वलोकसमक्षं निराकरोतु, [त]तश्च पुत्रवतीमुना सपुत्रा धर्म्मपत्नी भवदनुज्ञया ग्रहीष्यामि, इति विवक्षा। [लो]कापवादनिराकरणात् पूर्व्वं आहं तां ग्रहीतुं शक्नोमीति भावः।

[illegible]

73. Let Maithilí produce in the minds of the pepole a belief in the purity of her character, and I shall then take her back with her sons at your command

---

[७३] (१) चारित्र from चरित्र character, स्व aff. (चरित्रमेव चारित्रम्, स्वार्थे ष्य प्रत्ययः) (२) इण् to go, (णिच्), with प्रति, to cause believe, प्रत्याययति; but when इण् (णिच्) used to mean बोधन, it is declined as गमयति। &c.

७२। तातेति। हे तात! ते युष्मा (१) नः अस्माकम् अक्ष्णां समीपं समक्षम् (२)। अव्ययीभावे शरत्प्रभृतिभ्य इति समासान्त टच्। जातवेदसि (३) वह्नौ शुद्धा। मायाऽयमविश्वास इत्यर्थः किन्तु रक्षसः रावणस्य दौरात्म्यात् (४) अत्रत्याः (५) प्रजाः न श्रद्दधुः (६) न विश्वस्ताः।

७२। (हे) तात! ते वधूः नः समक्षं जातवेदसि शुद्धा, (किन्तु) रक्षः दौरात्म्यात् अत्रत्याः प्रजाः न श्रद्दधुः। युष्मा वधूः (अग्नौ शुद्धा) अत्रत्याभिः प्रजाभिः वा न श्रद्धे; इति वाच्यान्तरम्।

७२। राम एवं सीतापरित्यागमकथितो वाल्मीकिं मनुस्मृत्य, हे पितः! तव पुत्रवधूः सीता अस्माकं समक्षमेव वह्नौ आत्मशुद्धिं प्रदर्शितवती, अतो मादृशं तत्परिवर्त्त कश्चिदविश्वासः, किन्तु अतिदुर्दान्तदशाननदौरात्म्यात् सीतायाः अति-दूरस्थिता ताम् अग्निशुद्धिं नावगच्छन्तो लोका विश्वासम्, अतो लोकापवादभयेन मया लोकवादभयादेव निरपराधा धर्मपत्नी विसर्जिता, इति निवेदितं। 'अत्रत्याः श्रद्दधुः प्रजाः'—तथा च उत्तररामचरिते —'सीतां लोके वितरतनयो मा च वह्नौ विशुद्धिर्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु' इति।

৭২। হে পিতঃ! আপনার পুত্রবধূ আমাদের সমক্ষেই অগ্নি-পরীক্ষায় শুদ্ধি প্রদর্শন করিয়াছেন, কিন্তু রাবণের দুর্নীতিহেতু এখানে (অযোধ্যা) প্রজাগণ সে বিষয়ে বিশ্বাস নাই।

---

(৭২) (১) বধূ to distil, ঊ ([illegible]) aff. (২) সম্ in the sense of সমীপে, before, অক্ষি eye, টচ্ aff. (৩) জাতবেদস্ from জাত created, বিদ্ to know, অসুন্ aff. (জাতং বেদো ধনং যস্মাৎ। যদ্বা, জাতং বেত্তি বেদয়তে বা, বিদ চেতনাদৌ, অসুন্প্রত্যয়ঃ। যদ্বা, জাতানি ভূতানি চরাচরাণি সর্বজ্ঞত্বেন অক্ষাৎ, উৎপন্নত্বেন চ বেত্তি। যদ্বা, জাতানি সর্বকারণত্বেন যং বিদন্তি)। (৪) দৌরাত্ম্য from দুরাত্মন্ wicked, ষ্যঞ্ aff. (৫) অত্রত্য from অত্র here, (অব্যয়াৎ ত্যপ্)। (৬) শ্রৎ a particle, implying faith or ধা to have, (লিটি বহুবচনে)।

अन्येद्युरथ काकुत्स्थः सन्निपात्य पुरौकसः ।
कविमाह्वाययामास प्रस्तुतप्रतिपत्तये ॥ ७५ ॥

७५। अन्येद्युरिति। अथ काकुत्स्थः रामः, अन्येद्युः (१) अन्यस्मिन्नहनि, प्रस्तुतप्रतिपत्तये प्रस्तुतकार्य्यानुसन्धानाय, पुरौकसः पौरान्, सन्निपात्य मेलयित्वा, कविं वाल्मीकिम्, आह्वाययामास (२) आकारयामास ।

७५। अथ काकुत्स्थः अन्येद्युः प्रस्तुतप्रतिपत्तये पुरौकसः सन्निपात्य कविम् आह्वाययामास ।

७५। प्रस्तुतस्य प्रतिपत्तिः तस्यै। पुरम् ओकः येषाम्, ते पुरौकसः नगरवासिनः, तान्। काकुत्स्थेन कविः आह्वाय्यतामिति वाच्यान्तरम्।

७५। ततः परदिने रामः सर्व्वजनसमक्षं सीतायाः चारित्रशुद्धिं प्रमाणीकर्त्तुं सर्व्वान् नगरवासिनो मेलयित्वा महतीं सभाम् अकारयत्, प्रस्तुतकार्य्यान्तरार्थं च तत्र भगवन्तं वाल्मीकिम् आहूतवान् इति निष्कर्षः ।

৭৫। অনন্তর পরদিনে রাম পৌরগণকে সমবেত করিয়া প্রকৃত বিষয়ের প্রস্তাবের নিমিত্ত কবিকে আহ্বান করিয়া পাঠাইলেন।

75 Having on the following day assembled all the citizens, Ráma invited the poet (वाल्मीकि) to open the business arranged for.

स्वरसंस्कारवत्याऽसौ पुत्राभ्यामथ सीतया ।
ऋचेवोदर्च्चिषं सूर्य्यं रामं मुनिरुपस्थितः ॥७६॥

७६। स्वरेति। अथ स्वराः उदात्तादिः संस्कारः मन्त्रशुद्धिः

[७५] (१) अन्य another, एद्युस् aff (अन्यस्मिन् अहनि इत्यर्थे अन्य शब्दात् एद्युस्प्रत्ययो निपातितः)। (२) ह्वे with आ, to call, (णिच्),—ह्वाययति। अह्वाययत्। अजूहवत्। ह्वाययामास। &c.

**इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः।**
**शिष्यैरानाययामास स्वसिद्धिं नियमैरिव ॥७४॥**

७४। इतीति। राज्ञा इति प्रतिश्रुते प्रतिज्ञाते सति, मु
आश्रमात् जानकीं, शिष्यैः प्रयोज्यैः, स्वसिद्धिं स्वार्थसिद्धिं, नि
तपोभिः इव, आनाययामास (१)।

७४। राज्ञा इति प्रतिश्रुते मुनिः आश्रमात् जानकीं शिष्यैः स्वसि
नियमैः इव आनाययामास।

७४। मुनिना स्वसिद्धिरिव जानकी आनाययाञ्चक्रे, इति वाच्यान्तरम्।

७४। वाल्मीकिरामया वाल्मीकिशिष्या आश्रमात् सीतां तत्र आनिन्युः। श
शिष्यैः आनीता सीता मुनेस्तपोभि उपस्थापिता तस्य मुनेः साक्षात् तपःसिद्धि
रभासि, इति विवक्षार्थः। अतिपुण्यस्वभावा सीता भगवती वाल्मीकेः चिरकाल
पार्जितानां पुण्यानाम् आश्रयः फलराशिरिव दिदीपे इति भावः। 'मुनि' इ
प्रयोजककर्तृपदम्, 'शिष्यैः' इति प्रयोज्ये कर्तरि तृतीया, नयतेः प्रयोज्यकर्त
कर्मसञ्ज्ञानिषेधात्। तपःसिद्धिसाम्यात् सीतायाः कोऽपि पवित्रतातिशयो व्यज्य
तथा च कुमारे,—'साक्षादिव तपःसिद्धिर्बभासे बहुरूपती' इति। य
शाकुन्तले,—'दृष्टव्यं पुण्यानां फलमिव च तद्रूपमनघम्'; 'अकृत्स्ना मूर्तिमती
सत्क्रिया' इत्यादि।

৭৪। রাজা এই অঙ্গীকার করিলে, মহর্ষি নিজ শিষ্য দ্বারা জানকীকে আশ্র
হইতে আনাইলেন, যেন যোগবলে স্বকীয় তপঃসিদ্ধিকে তথায় উপস্থিত করিলেন।

74. The king having thus promised, the sage caused Jánakí to be brought from the hermitage by his disciples, which seemed like his bringing the success of his devotions by the force of those devotions.

---

[৭৪] (१) नी to carry, (णिच्), with आ, to cause to bring,— नाययति। अनाययत्। अनीनयत्। नाययामास। *&c.*

अन्येद्युरथ काकुत्स्थः सन्निपात्य पुरौकसः।
कविमाह्वाययामास प्रस्तुतप्रतिपत्तये ॥ ७५ ॥

७५। अन्येद्युरिति। अथ काकुत्स्थो रामः, अन्येद्युः (१) अन्यस्मिन्नहनि, प्रस्तुतप्रतिपत्तये प्रकृतकार्यानुसन्धानाय, पुरौकसः पौरान्, सन्निपात्य मेलयित्वा, कविं वाल्मीकिम्, आह्वाययामास (२) आकारयामास।

७५। अथ काकुत्स्थः अन्येद्युः प्रस्तुतप्रतिपत्तये पुरौकसः सन्निपात्य कविम् आह्वाययामास।

७५। प्रस्तुतस्य प्रतिपत्तिः तस्यै। पुरम् ओकः येषाम्, ते पुरौकसः नगरवासिनः, तान्। काकुत्स्थेन कविः आह्वाययाञ्चक्रे इति वाच्यान्तरम्।

७५। ततः परदिने राम अश्वमेधसमये सीताया आदिकवि [illegible] कर्तुं सर्वान् नगरवासिनो मेलयित्वा महतीं सभाम् अकारयत्, प्रकृतकार्य्याणाम् करणाय च तत्र भगवन्तं वाल्मीकिम् आहूतवान्, इति विस्तरार्थः।

৭৫। অনন্তর পরদিনে রাম পৌরগণকে সমবেত করিয়া প্রকৃত বিষয়ের প্রসঙ্গের নিমিত্ত কবিকে আহ্বান করিয়া পাঠাইলেন।

75 Having on the following day assembled all the citizens, Ráma invited the poet (वाल्मीकि) to open the business arranged for.

स्वरसंस्कारवत्याऽसौ पुत्राभ्यामथ सीतया।
ऋचेवोदर्च्चिषं सूर्य्यं रामं मुनिरुपस्थितः ॥७६॥

७६। स्वरेति। अथ स्वरः उदात्तादिः संस्कारः शब्दशुद्धिः

[७५] (१) अन्य another, एद्युस् aff (अन्यस्मिन् अहनि इत्यर्थे अन्य शब्दात् एद्युस्प्रत्ययो निपात्यते) (२) ह्वे with आ, to call, (णिच्),— [illegible]

सहन्या ऋचा (१) सावित्र्या, उदर्चिषं सूर्य्यम् इव. पुत्राभ्याम् उर-
श्छितया सीतया करणेन, उदर्चिषं रामम् असौ मुनिः, उपच्छितः

उपतस्थे।

७६। अथ, स्वरसंस्कारवत्या ऋचा उदर्चिषं सूर्य्यम् इव पुत्राभ्याम् (उर-
श्छितया) सीतया (उदर्चिषं रामं असौ मुनिः उपस्थितः। उदर्चिः सूर्य्यः।
(उदर्चिः) रामः अमुना मुनिना उपस्थितः, इति वाच्यान्तरम्।

७६। यथा स महर्षिः स्वरसंस्कारसहितया सावित्र्या (गायत्र्या) सर्व्वतेज-
समस्तं परमतेजोनिधिं सवितारम् उपास्ते, तथा स कुशलवसहितया सीतया
सर्व्वलोकपूजितं परमतेजोनिधिं रामम् उपतस्थे. इति विशदार्थः। वाल्मीकिः
कुशलवसहितां सीताम् आदाय सभायां रामसमीपमाययौ इति सर्व्वः। गायत्री
साम्यात् सीतायाः सर्व्वलोकोत्तरं पावनत्वम् सूचितम्, तथा चोक्तं,—'गायत्री
वेदजननी गायत्री लोकपावनी। न गायत्र्याः परं जप्यम् एतद्विज्ञानमुच्यते'।
इति। स्वरसंस्कारसाम्यात् कुशलवयोरपि पवित्रत्वं सीतानुवर्त्तित्वञ्च सूचितम्;
तथाहि. पवित्रौ स्वरसंस्कारौ यथा नियतं गायत्र्याः अनुवर्त्तिनौ, परिपूतस्वभावौ
सर्व्वविद्यौ कुशलवौ अपि तथा नियतं जनन्या अनुवर्त्तिनौ इति। सूर्य्यसाम्यात्
रामस्य पावनतेजोनिधित्वपरमाराध्यत्व सूच्यते। अहो तत्र पवित्राणां समवायः!
तथाहि, पवित्रा यज्ञसभा, पवित्रा जानकी, पवित्रो रामः, पवित्रौ कुशलवौ,
सकलपवित्रैकगुरुः पवित्रतमः स्वयं भगवान् रामायणकविः वाल्मीकिश्च, इति।
'स्वरसंस्कारवत्या',—स्वरन्ति शब्दायन्ते इति स्वराः, ते च उदात्तानुदात्तस्वरित-
भेदात् त्रिविधाः, तदुक्तं,—'उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः' इति।
तत्र उच्चैः उच्चार्य्यमाणः उदात्तः, नीचैः उच्चार्य्यमाणः अनुदात्तः, यश्च पूर्व्वार्द्धः
उदात्ततया उत्तरार्द्धश्च अनुदात्ततया उच्चार्य्यते स स्वरित इति।

१०। अनन्तर महर्षि यखन पुत्र दुइटिर सहित सीताके लइया रामेर

---

[७६] (१) ऋक् from ऋच् to praise, क्विप् affix; celebrating the praises of the gods. (ऋच्यन्ते स्तूयन्ते देवाः अनया, इति ऋक्; ऋच् स्तुतौ क्विप्प्रत्ययः).

[illegible] करिতেছেন।

76 Thereupon, the sage arrived before Ráma bringing with him Sítá with her two sons, in the same way as he approached in prayerful attitude the resplendent sun with the divine verse *Sávitrí* conjoined with right intonation and right pronunciation.

काषायपरिवीतेन स्वपदार्पितचक्षुषा ।
अन्वमीयत शुद्धेति शान्तेन वपुषैव सा ॥७७॥

७७। काषायेति। कषायेण रक्तं काषायम् (१) तेन रक्तं [illegible]। तेन परिवीतेन (२) संवृतेन, स्वपदार्पितचक्षुषा शान्तेन प्रसन्नेन वपुषैव, सा सीता, शुद्धा साध्वी इति अन्वमीयत(३) अनुमिता।

७७। काषायपरिवीतेन स्वपदार्पितचक्षुषा शान्तेन वपुषा एव सा शुद्धा इति अन्वमीयत। (जना) सा शुद्धेति अन्वमन्, इति वाच्य [illegible]।

७७। [illegible]

७७। [illegible]

[७७] (१) काषाय from कषाय extract of the bark of a tree, and [illegible] (२) परिवीत from परि, वि, इण्, to go, [illegible] (३) [illegible]

77 Clad in a red garment and with her eyes fixed on her feet the sacred serenity of the very appearance of Sítá implied her purity

जनास्तदालोकपथात् प्रतिसंहृतचक्षुषः ।
तस्थुस्तेऽवाङ्मुखाः सर्व्वे फलिता इव शालयः ॥७८॥

७८। जना इति। तस्याः सीतायाः कर्म्मणः, आलोकपथात् दर्शनमार्गात् प्रतिसंहृतचक्षुषः निवर्त्तितदृष्टयः, सर्व्वे जनाः, फलिताः (१) शालयः इव, अवाङ्मुखाः (२) अवनतमुखाः, तस्थुः।

७८। तदालोकपथात् प्रतिसंहृतचक्षुषः ते सर्व्वे जनाः फलिताः शालय इव अवाङ्मुखाः तस्थुः।

७८। प्रतिसंहृतानि चक्षूंषि येषाम्, ते। अवाक् मुखं येषाम्, ते। फलानि सञ्जातानि येषां ते फलिताः। प्रतिसंहृतचक्षुर्भिः तैः सर्व्वैः जनैः फलितैः शालिभिरिव अवाङ्मुखैः तस्थे, इति वाच्यान्तरम्।

७८। अहो पवित्रतेयं जानकी! अस्मादपि पापमार्गचिन्तनकारिणः इति आत्मनः सापराधान् मन्यमाना जनाः तां सीतामूर्त्तिं द्रष्टुमेव ... भयलज्जिताश्च सर्व्वे फलभरनताः धान्यस्तम्बाः इव अधोमुखाः तस्थुः, इति समुदितार्थः।

৭৮। যে দিকে তাঁহাকে দেখিতে পাওয়া যায়, লোকেরা চাহিতে না পারিয়া সে দিক হইতে চক্ষু ফিরাইয়া লইল, এবং তাহারা সকলে ফলভারনত ধান্যগাছের ন্যায় অধোমুখে অবস্থান করিতে লাগিল।

78 The people, turning their eyes away from Sítá, remained bending down their heads, like stalks of paddy pendent with ears of corn.

---

[७८] (१) फलित from फल fruit, इतच् affix (२) अवाक् from अव, अञ्च् to go, क्विप् affix, and मुख face.

**तां दृष्टिविषये भर्तुर्मुनिरास्थितविष्टरः।**
**कुरु निःसंशयं वत्से स्ववृत्ते लोकमित्यशात् ॥७९॥**

७९। तामिति। आस्थितविष्टरः (१) अधिष्ठितासनः, मुनिः हे वत्से! भर्तुः दृष्टिविषये समक्षं, स्ववृत्ते स्वचरिते विषये, लोकं निःसंशयं कुरु, इति तां सीताम् अशात् (२) शास्ति स्म।

७९। आस्थितविष्टरः मुनिः (३) वत्से! भर्तुः दृष्टिविषये स्ववृत्ते लोकं निःसंशयं कुरु इति ताम् अशात्।

७९। आस्थितः विष्टरो येन सः। नास्ति संशयो यस्य, तम्। आस्थित विष्टरेण मुनिना सा अशिष्यत लोकः (त्वया) निःसंशयः क्रियताम् इति वाच्यान्तरम्।

७९। अथ महर्षिर्वाल्मीकिः पवित्रे दर्भासने उपविश्य सीतां आदिदेश, हे वत्से! भर्तुः समक्षं स्वस्य आत्मचरिते सर्वलोकसंशयं दूरीकुरु, इति विशदार्थः।

৭৯। ইহার পর বাল্মীকি ঋষি আসনে উপবিষ্ট হইয়া সীতাকে এই আদেশ করিলেন,—বৎসে! তুমি তোমার পতির সমক্ষে নিজ চরিত্র বিষয়ে লোকের সংশয় দূর কর।

79 Having taken his seat, the sage thus commanded Sitâ, —O child, do you before your husband's eyes free the people from suspicion regarding your character.

**अथ वाल्मीकिशिष्येण पुण्यमावर्जितं पयः।**
**आचम्योदीरयामास सीता सत्यां सरस्वतीम् ॥८०॥**

८०। अथेति। अथ वाल्मीकिशिष्येण आवर्जितं (१) दत्तं पुण्यं पयः आचम्य (२), सीता, सत्यां सरस्वतीं वाचम्, उदीरयामास उच्चारयामास।

---

[७९] (१) विष्टर from वि, स्तृ to spread, अप् affix, and स changed to ष (२) शास् to command,—शास्ति। अशात्, अशिषाम्, अशात। &c. शशास। &c. शशास। &c. शासिता,—शिष्यते। अशासि। &c. शिष्ट। &c.

[८०] (१) आ, वृज् to quit, क्त aff. (२) आ, चम् to eat, ल्यप् aff.,—चामति। अचमत्। अचमीत्। चचाम। &c.

[illegible]

[illegible]

[illegible]

[illegible]

80. Thereupon, having purified her mouth with [illegible] water given her by a disciple of Vālmīki, Sītā gave utterance to these truthful words.

वाङ्मनःकर्म्मभिः पत्यौ व्यभिचारो यथा न मे।
तथा विश्वम्भरे देवि मामन्तर्द्धातुमर्हसि ॥८१॥

८१। वाङ्मन इति। वाङ्मनःकर्म्मभिः पत्यौ विषये, मे व्यभिचारः [illegible], न यथा नास्ति यदि, तथा तर्हि, विश्वं बिभर्त्तीति विश्वम्भरा (१) भूमिः। संज्ञायां भृतृवृजीत्यादिना खच्प्रत्ययः, अरुर्द्विषदित्यादिना मुमागमः। हे विश्वम्भरे देवि! माम् अन्तर्द्धातुं गर्भे वासयितुम् अर्हसि (२)।

८१। वाङ्मनःकर्म्मभिः पत्यौ मे व्यभिचारः न यदा तदा हे विश्वम्भरे देवि! माम् अन्तर्धातुम् अर्हसि। व्यभिचारेण (भूयते), त्वया अर्हते, इति वाच्यान्तरम्।

८१। यदहं कायेन वाचा मनसा वा पातिव्रत्यात् न स्खलितास्मि तदा अयि देवि विश्वम्भरे! नयतु मामात्मनो गर्भे विवरम्. इति विग्रहः। अत्र रामायण,—'सर्व्वान् समागतान् दृष्ट्वा सीता काषायवासिनी। अब्रवीत् प्राञ्जलि वाक्यमधोदृष्टिरवाङ्मुखी॥ यथाहं राघवादन्यं मनसापि न चिन्तये। तथा मे

[८१] (१) विश्व universe, भृ to hold, खच् aff. fem. टाप् aff. (२) अर्ह

माधवी देवी विवरं दातुमर्हति ॥ मनसा कर्मणा वाचा यथा रामं समर्थये।

वै माधवी देवी विवरं दातुमर्हति' ॥ इति।

[illegible]

[illegible]

81. "If I have never been untrue to my husband in word, thought, or deed, then O Goddess Earth, take me away"

एवमुक्ते तया साध्व्या रन्ध्रात् सद्योभवाद्भुवः ।
शातह्रदमिव ज्योतिः प्रभामण्डलमुद्ययौ ॥८२॥

८२। एवमिति। साध्व्या पतिव्रतया तया सीतया, एवम् उक्ते सति, सद्योभवात् भुवः रन्ध्रात्, शातह्रदं (१) वैद्युतं ज्योतिः इव, प्रभामण्डलम् उद्ययौ।

८२। साध्व्या तया एवम् उक्ते (सति) सद्योभवात् भुवः रन्ध्रात् शातह्रदं ज्योतिः इव प्रभामण्डलम् उद्ययौ।

८२। शतह्रदा विद्युत् तस्या इदं, शातह्रदम्। शातह्रदेन ज्योतिषा इव प्रभामण्डलेन उद्ययौ, इति वाच्यान्तरम्।

८२। [illegible]

[illegible]

[illegible]

[illegible]

82. As soon as the virtuous Sītā spoke these words, up rose, from the rent in the earth which was formed at once, a circle of light bright as lightning.

तत्र नागफणोत्क्षिप्तसिंहासननिषेदुषी ।
समुद्ररशना साक्षात् प्रादुरासीद्वसुन्धरा ॥ ८३ ॥

८२ (१) शातह्रद — from शतह्रदा lightning (शत a hundred, ह्रद a ray of light) and अण्.

८३। तत्रेति। तत्र प्रभामण्डले, नागफणोत्क्षिप्ते सिंहासने, निषेदुषी (१) आसीना, समुद्ररशना समुद्रमेखला, साक्षात् वसूनि धारयति इति वसुन्धरा (२) भूमिः। खचि ह्रस्व इति ह्रस्वः। प्रादुरासीत्।

८३। तत्र नागफणोत्क्षिप्तसिंहासननिषेदुषी समुद्ररशना साक्षात् वसुन्धरा प्रादुरासीत्।

८३। नागानां फणैः उत्क्षिप्तम् यत् सिंहासनं तस्मिन् निषेदुषी। समुद्रएव रशना मेखला यस्याः सा। नागफणोत्क्षिप्तसिंहासननिषेदुष्या समुद्ररशनया वसुन्धरया प्रादुरभूयत, इति वाच्यान्तरम्।

८३। तस्मिन् ज्योतिर्मण्डलमध्ये, नागशिरोभिः उन्नियमाने प्रदीप्ते रत्नसिंहासने समासीना रत्नाकरमेखला मूर्त्तिमती देवी विश्वम्भरा प्रादुर्बभूव, इति विग्रहार्थः। अत्र रामायणकथा यथा,—'तथा शपन्त्या वैदेह्या प्रादुरासीत् तदद्भुतम्। भूतलादुत्थितं दिव्यं सिंहासनमनुत्तमम्॥ ध्रियमाणं शिरोभिस्तु नागैरमितविक्रमैः। दिव्यं दिव्येन वपुषा दिव्यरत्नविभूषितं।' ॥ इति।

৮৩। সেই প্রভামণ্ডলমধ্যে নাগফণোৎক্ষিপ্ত সিংহাসনে আসীনা সমুদ্ররশনা মূর্ত্তিমতী বসুন্ধরা দেবী প্রাদুর্ভূত হইলেন।

83. In the centre of that circle of light, seated on a throne heaved upward by the hoods of the serpents, appeared the Goddess Earth herself with the broad sea encircling her waist.

सा सीतामङ्कमारोप्य भर्त्तृप्रणिहितेक्षणाम्।
मामेति व्याहरत्येव तस्मिन् पातालमभ्यगात्॥८४

८४। सेतिः— सा वसुन्धरा, भर्त्तरि प्रणिहितेक्षणां दत्तदृष्टिं, सीताम्, अङ्कम्, आरोप्य, तस्मिन् भर्त्तरि 'मा' 'मा' इति व्याह-

[८३] (१) सद् with नि, to sit, क्वसु aff. (स्त्रियाम्). (२) वसु wealth, धृ to hold, खच् aff. fem. टाप् aff.

रति (१) वदत्येव व्याहरन्तमनादृत्य इत्यर्थः। षष्ठी चानादरे इति सप्तमी। पातालम् (२) अभ्यगात्।

८४। सा, भर्तृप्रणिहितेक्षणा सीताम् अङ्कम् आरोप्य तस्मिन्, (भर्त्तरि) 'मा' 'मा' इति व्याहरति एव पातालम् अभ्यगात्।

८४। भर्त्तरि प्रणिहिते ईक्षणे यया सा ताम्। तया भर्तृप्रणिहितेक्षणा सीता अङ्कम् आरोप्य पातालम् अभ्यगामि, इति वाच्यान्तरम्।

८४। आत्मविलयकार्ये पतितैव निर्भरं निरोधमाना सीताम् वसुन्धरया आरोप्यमाणा दृष्ट्वा यावदेव रामो 'मा' 'मा' इति निषेधाक्षरम् उच्चारयति तदैव सीतासहिता वसुन्धरा पाताले विलयमगमत् इति निष्कर्षः। सीता [illegible] तत् [illegible] रामकर्णं [illegible] तस्यौ पतिपादपङ्कजयमा [illegible] विविन्द। [illegible] उत्पादकस्य [illegible] सीवसर्वेगोऽच [illegible]। पाठमात्रे [illegible] मूर्च्छितमिव धु[illegible]मिव जायते हृदयम्। यथाच अपूर्वकरुणरसस्य मूर्त्ति [illegible] रौद्ररसस्य मूर्त्तिर्यथा कुमारे —'क्रोध प्रभो। संहर संहरेति यावद्गिरः खे [illegible] चरन्ति। तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार'॥ इति। [illegible] करुणरसस्य मूर्त्तिर्यथा शाकुन्तले,—'सा निन्दन्ती स्वानि भाग्यानि बाला [illegible] रोदितुञ्च प्रवृत्ता। स्त्रीसंस्थानं चाप्सरस्तीर्थमाराद् उत्क्षिप्यैनां ज्योति[illegible] तिरोऽभूत्'॥ इति। अत्र रामायणकथा यथा —'तस्मिंस्तु धरणी देवी [illegible] [illegible] मैथिलीम्। स्वागतेनाभिनन्द्यैनामासने चोपवेशयत्। तामासनगता [illegible] प्रविशन्तीं रसातलम्। पुष्पवृष्टिरविच्छिन्ना दिव्या सीतामवाकिरत्। साधु [illegible] सुमहान् देवाना सहसोत्थित'॥ इति।

८४। [illegible] সীতার [illegible] পতিত [illegible] [illegible] [illegible] [illegible], এবং রাম, "না" "না" ইহা বলিতে বলিতেই [illegible] [illegible] [illegible]।

84. Even whilst Ráma was exclaiming—'no' 'no,' the

(८४) (१) ह with वि and आ, to speak, शतृ सप्तमी (अनादरे)। (२) पाताल from पत to fall, आलञ् unádi aff (पतन्ति अस्मिन् कर्म्मभिः इति पातालम्, [illegible], पतितव्यस्थानमिति [illegible])

Goddess Earth placing on her lap Sítá with her eyes now fi on her husband, vanished away into the regions below.

धरायां तस्य संरम्भं सीताप्रत्यर्पणैषिणः ।
गुरुर्विधिबलापेक्षी शमयामास धन्विनः ॥८५॥

८५। धरायामिति। सीताप्रत्यर्पणम् इच्छति इति तथोक्त धन्विनः (१) आत्तधनुषः, तस्य रामस्य, धरायां विषये संर विधिबलापेक्षी दैवशक्तिदर्शी, गुरुः ब्रह्मा, शमयामास (२), अवश्य म्भावी विधिः इति भावः।

८५। सीताप्रत्यर्पणैषिणः धन्विनः तस्य धरायां सरम्भं, विधिबलापेक्षी,गु शमयामास।

८५। विधिबलम् अपेक्षते इति। विधिबलापेक्षिणा गुरुणा तस्य सर शमयाञ्चक्रे, इति वाच्यान्तरम्।

८५। उन्मत्त इव रामः पृथिवीसकाशात् सीतामत्याहरणाय सीतापहारि पृथिवीं शरैर्विदारयितु कोपात् धनुर्जग्राह, स तथा प्रवृत्त दृष्ट्वा अथ विश्वगुरुर्ब्र दैवशक्तेरनतिक्रमणीयताम् बोधयन् तस्य कोपशान्तिमकरोत्, इति विमर्शः 'धरायां तस्य संरम्भम्' &c —अत्र रामायणे—'वसुधे देवि भवति! सीत निर्यातयता मम। दर्शयिष्यामि वा रोषं यथा मामवगच्छसि॥ न मे दास्यति चे सीता यथारूपा महीतले। सपर्वतवनां कृत्स्नां व्यथयिष्यामि ते स्थितिम्' इति। 'गुरुर्विधिबलापेक्षी' &c —अत्र रामायणे,—'एवं ब्रुवाणे काकुत्स्थे क्रोध शोकसमन्विते। ब्रह्मा सुरगणैः सार्द्धमुवाच रघुनन्दनम्। राम! राम! न सन्ता कर्त्तुमर्हसि सुव्रत!'। इत्यादि।

৮৫। রাম, সীতাকে ফিরাইয়া লইবার জন্য ধরার উপর মহাক্রোধে ধনু গ্র করিলেন, লোকগুরু ব্রহ্মা,—এ সকলই নিয়তির বল—ইহা বুঝাইয়া রামের কোপ শান্তি করিলেন।

---

[८५] (१) धन्वी from धनुः bow, इनि aff. (धनुरस्यास्तीति, व्रीह्यादि त्वात् इनिः). (२) शम् to cease, (णिच्),—शमयति। अशमयत्। अशीशमत्। शमयामास। &c.

85. Brahmá who beheld in this the decree of fate, appeased Ráma who enraged against the Earth had taken up his bow in order to compel her to give back Sítá

कपीन् विसृज्य यज्ञान्ते सुहृदश्च पुरस्कृतान्।
रामः सीतागतं स्नेहं निदधे तदपत्ययोः॥८६॥

८६। कपीनिति। राम, यज्ञान्ते, पुरस्कृतान् पूजितान् कपीन्, सुहृदश्च (१) विसृज्य सीतागतं स्नेहं तदपत्ययोः कुशलवयोः निदधे।

८६। रामः यज्ञान्ते पुरस्कृतान् कपीन् सुहृदश्च विसृज्य सीतागतं स्नेहं तदपत्ययोः निदधे।

८६। रामेण सीतागतः स्नेहः तदपत्ययोः निदधे इति वाच्यान्तरम्।

८६। अश्वमेधयज्ञान्ते रामः तान् कपीन् सर्वान् बन्धुजनांश्च यथाविधि [illegible] च, [illegible] इति विमृश्य। सीतायाम् [illegible] सीता [illegible] इति भावः।

[illegible]

